A.C. Joshi Library
P.U. Chandigarh

MSS No. 451 (VOL-II) Subject Dharamsastra

Name of MSS Shri Gautam Dharam Sutra Bhashay Maskariyam

Author

Period — Folios 450 Pages

Script Devnagiri Source Madras; Govt. MSS. Lib.

Missing Folios

II

764



॥ श्रीः ॥

॥ गौतमधर्मसूत्रभाष्यम ॥
मस्करीयम

copied from D.15267. Vol. II.

of G.O. mss. Library. Madras.

Copied by. V. Rajagopala Sarma

॥ श्रीः ॥

॥ गौतमधर्मसूत्रभाष्यम् ॥

मस्करीयम्

॥ अथ चतुर्दशाध्यायप्रारम्भः ॥

443 ओम् विहिताकरणे दण्डप्रायश्चित्तावृत्तौ तस्मिन्काले विहितमकुर्वतो नेष्यत इत्यत आह—

॥ शावमाशौचं दशरात्रमनृत्विग्दीक्षितब्रह्मचारिणां सपिण्डानाम् ॥

शवनिमित्तोऽशुचिभावो दशाहोरात्राणि भवन्ति। केषाम्। सपिण्डानां तत्स्वरूपं वक्ष्यति। ऋत्विगादिवर्जितानां ऋत्विग्याजकः प्रवृत्तकर्मा गृह्यते।

दीक्षितसाहचर्यात्। यदि भूतपूर्वगति-
राश्रियते ऋत्विग्श्वशुर इत्यादिवद्दी-
क्षितब्रह्मचारिणोरप्येवं प्रसज्येत।
444 ततश्च सर्वस्य भूतपूर्वगत्या सर्वेषां ब्रह्म-
चारित्वादृत्विग्दीक्षितग्रहणमनर्थकं
स्यात्। तस्मात्सर्व एव प्रवृत्तक्रिया गृह्य-
न्ते। दीक्षितो यजमानः ब्रह्मचारी यावद्ब्र-
ह्मचर्यमुपरिष्टात् क्षत्रियाणामुपदेशात्
ब्राह्मणविषयमिदम्। सूतकस्य वक्ष्य-
माणत्वादाशौचं दशरात्रमित्युक्त एव
शवनिमित्तस्य सिद्धे शवग्रहणं
शवप्रभृति दिवसगणना कर्तव्येत्येव-
मर्थम्॥

ननु च स्मृत्यन्तरे संस्कारप्र-
भृति श्रूयते—"अरण्ये काष्ठवत्त्यक्त्वा
क्षपेत त्र्यहमेव तु" इति पूर्वकाल-

क्रियया तथा आहिताग्निश्चेत्प्रवसन् म्रियेत। पुनस्संस्कारं कृत्वा शववत् शौचमिति तेनेदं विरुद्धमिति।

अत्रोच्यते। विषयविभागेनाविरोध
445 इति। तथाच व्याघ्रः— धर्मे विषयविभागप्रतिपादनपरं वाक्यं श्रूयते—

मरणादेव कर्तव्यं संयोगो यस्य नाग्निषु।
दहनाद्ये(दे)व कर्तव्यं यस्य वैतानिको विधिः॥

इति। पतितचण्डालसूतिकोदक्या शवस्पृष्टीसनेन शवनिमित्ताशुचिस्पर्शने स्नानविधानादेवाशुचिभावे सिद्धे आशौचग्रहणमध्ययनादेरधिकारशापनार्थम्। तथाच मनुः—

उभयत्र दशाहानि कुलस्यान्नं न भुज्यते।
दानं प्रतिग्रहो यज्ञः स्वाध्यायश्च निवर्तते॥

इति। शवाशौचमिति वक्तव्ये शव-

माशौचमिति विसमासकरणं शावा-
ङ्गभूतानामस्थ्नां यावत्संचयनं तावदे-
व परस्पर्शनं प्रत्यशुचिभावज्ञापना-
र्थं तथा च संवर्तः —
अस्थिसंचयनादूर्ध्वमङ्गस्पर्शो विधीयते ॥
इति। अस्थिसंचयनस्वरूपं स्मृत्यन्त-
राद्वगन्तव्यम्। तथा च व्याघ्रः —
प्रथमे च द्वितीये च तृतीये च चतुर्थके।
अस्थिसंचयनं कार्यं बन्धुभिर्हितमीप्सुभिः ॥
इति। तत्र सद्यःशौचाधिकारिणां प्र-
थमेऽह्नि एकाहस्संबन्धिनां द्विती-
446 येऽह्नि त्र्यहस्संबन्धिनां तृतीयेऽह्नि
चतुरहस्संबन्धिनां दशाहस्संबन्धि-
नां च चतुर्थेऽह्नीति द्रष्टव्यम् ॥
तथा तत्रैवापरं वाक्यं श्रूयते —
चतुर्थे पंचमे चैव सप्तमे दशमे तथा।

अस्थिसंचयनं कार्यं वर्णानामनुपूर्वशः ॥

इति। तत्र ब्राह्मणस्य चतुर्थे क्षत्रियस्य पञ्चमे वैश्यस्य सप्तमे शूद्रस्य दशम इति द्रष्टव्यम्। ब्राह्मणस्योक्ता एवं क्षत्रियवैश्ययोरपि वृत्तस्वाध्यायापेक्षया स्वल्पाशौचिनां स्वल्पाशौचेन न्यायेन कल्प्यमिति। ब्रह्मचारिग्रहणं परिव्राजकादीनामपि उपलक्षणम्।

तथा च बृहस्पतिः —

नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम्।
नाशौचं सूतके प्रोक्तं शावे चापि तथैव च ॥

इति। दीक्षितग्रहणं चान्द्रायणादौ प्रवृत्तानाम्। तथा च वसिष्ठः —

441 न राज्ञामघदोषोऽस्ति व्रतिनां सत्रिणां तथा।
ऐन्द्रस्थानमुपासीना ब्रह्मभूता हि ते सदा ॥

इति। श्रुत्वा चोर्ध्वं दशाहात् पक्षिणी-

मे काद्शरात्रं क्षत्रियस्येति लिङ्गादेव द-
शरात्रं (~~क्षत्रियस्येति लिङ्गादेव दशा-~~
~~सत्रं~~) गृहीतुं शक्येत। [क्षत्रविट्छूद्र-
दायादे ब्राह्मणबान्धवाः तेषामाशौचे]
दशरात्रग्रहणं ब्राह्मणस्याशौचे क्ष-
त्रियादेरपि दशरात्रमेवेति नियमा-
र्थं — तथाच स्मृत्यन्तरं — 'विप्रस्य
दशाहं सूतकं भवेत्' इति विप्रस्याशौ-
चे प्राप्ते तेषां दशाहमेवेति। तत्रार्थः।
तथाच मनुरपि —
सर्वे तूत्तरवर्णानामाशौचं कुर्युरादृताः।
तद्वर्णविधिदृष्टेन स्वं तु शौचं स्वयोनिषु॥
इति॥

२. ॥ एकादशरात्रं क्षत्रियस्य ॥
ऋत्विग्दीक्षितब्रह्मचारिवर्जितानां शाव-
ति। ब्राह्मणाशौचे तेषां तेषां दशाहो—

पक्षेशात् तेषामाशौचे विप्रस्य स्मृत्यन्तरोक्तं द्रष्टव्यम् । तथाहुः लौकाक्षिः —

दशाहं शावमाशौचं जन्मनाशौ स्वयोनिषु ।
448 पक्षिणीरेकं तथा प्रोक्तं क्षत्रविट्छूद्रयोनिषु ॥
इति ॥ ह

एकादशरात्रं क्षत्रियस्य ।

ऋत्विग्दीक्षितब्रह्मचारिवर्जितानां शावमाशौचमिति वर्तते ।

द्वादशरात्रं वैश्यस्य ॥

पूर्ववदनुवर्तते ॥

अर्धमासमेके ॥

पञ्चदशाह इत्येव वृत्तस्वाध्यायादिविकल्पो द्रष्टव्यः । एवं च ब्राह्मणादीनामपि वृत्तस्वाध्यायापेक्षास्तीति गम्यते । तथा च पराशरः —

एकाहाच्छुद्ध्यते विप्रो योऽग्निवेदसमन्वितः।
त्र्यहात्केवलवेदो निर्गुणो दशभिर्गुणैः॥
इति। मनुरपि —
दशाहं शावमाशौचं सपिण्डेषु विधीयते।
अर्वाक् संचयनादस्थ्नां त्र्यहमेकाहमेव वा॥
इति। अत्रोपसंचयनादिति वचनाद्दि-
ति चतुरहोपलक्षणं इति एकगुण-
551 योगे चतुरहेणैव हेणा२ शुद्धिः। द्विगु-
णयोगे त्र्यहेण। सर्वगुणयोगे तु
एकाहेन। सर्वगुणयोगे यदा वृत्ति-
संकोचोऽपि तदा सद्यः शौचमिति
भाष्यकारेणोक्तं, तथापि क्षत्रियस्या-
पि वाक्यचतुष्टयमारभ्यते। एका-
दशरात्रेणेति गौतमः। पञ्चदशाहे-
नेति वसिष्ठः। द्वादशरात्रेणेति
याज्ञवल्क्यः। दशरात्रेणेति

पराशारः। ब्राह्मणस्य दशाराशवत्
क्षत्रियस्य पञ्चदशाहः एव निहः।
तत्र एकगुणयोगे द्वादशारात्रं द्विगु-
णयोगे एकादशारात्रं, सर्वगुणयोगे
दशारात्रम्। निर्गुणस्य पंचदशाहः।
तथा वैश्यस्यापि। एकगुणयोगे
अर्धमासमेके इत्यर्धमासः। द्विगुण-
योगे - द्वादशारात्रं वैश्यस्येति।
वैश्यस्य सर्वगुणयोगे पराशारो-
क्तमेकादशारात्रं निर्गुणस्य विंश-
तिरात्रं वासिष्ठोक्तं तदेव निसामि-
सेव कल्पना द्रष्टव्या।

॥ मासं शूद्रस्य ॥

अत्र दोषाद्यभावात् सपिण्डानामि-
सेव वृत्ताद्यभावाच्च तदेव असच्छू-
द्रविषयं चेदम्॥ सच्छूद्रस्या-

450

र्थं मासं इ(?)शौचानसवचनात् ॥

॥ तच्चेदन्तः पुनरापतेच्छेषेण
शुद्ध्येरन् ॥

तदेव समानजातीयं मरणे मरणं जननेजननमिति द्रष्टव्यम् । तद्ग्रहणात् पुनर्भूयोऽपि अनेकशोऽपीत्यर्थः । आपतेदागच्छेत् । ततः पूर्वशौचावशिष्टेन कालेनैव शुद्धिः स्यात् आगतस्य कालप्रतीक्षणं कर्तव्यं इत्यभिप्रायः । अन्तर्ग्रहणं विस्पष्टार्थं शेषेण शुद्ध्येरन् ॥

॥ रात्रिशेषे द्वाभ्याम् ॥

"प्रभाते तिसृभि" रित्येतैरेव मध्यस्य शंतु शक्यत्वात् अन्येऽपि जननेऽप्येवमिहातिदेशादेव सिद्धे तद्ग्रहणात् समानकालापेक्षामाहुः ॥ यथा

451 द्वारात्रप्रमाणाशौचे द्वरात्रप्रमाण-
शौचमिति यदि स्वल्पप्रमाणे मह-
त्प्रमाणमागच्छति ततस्तत्पूर्वेणै-
व न गच्छेदिति। तथाच पैङ्ग्य-
गृह्यस्मृतिः — अघवृद्धौ पश्चिमेन
समापयेदिति। अघवृद्धावितुक्ते अ-
ल्पाघं गच्छेदेवेति द्रष्टव्यम्।
2 ॥ रात्रिशेषे द्वाभ्याम् ॥
यद्येकरात्र्यवशिष्टे पूर्वाशौचे ऽन्यदा पतेत्
ततो न पूर्वेणैव शुद्धिः। किन्तु द्वा-
भ्यां रात्रिभ्यामेवं त्रिरात्रं परिगृ-
हीतं भवति॥
॥ प्रभाते तिसृभिः॥
प्रभाते स्नानात् पूर्वं सङ्गवकालात्
पूर्वमित्यर्थः। अघभाजस्सङ्गवकाले
स्नात्वा ग्रामं प्रविशेयुरित्यर्थवाददर्श-

नात् यद्यापतेत् ततो रात्रित्रयेण शुद्धिः।

452 ॥ गोब्राह्मणहतानामन्वक्षम् ॥

गवार्थे ब्राह्मणार्थे वा हतानां यावद्दर्शन-
माशौचं सद्यश्शौचमित्यर्थः। तथा च
मनुः —
गोब्राह्मणस्य चैवार्थे यस्य चेच्छति भूमिपः॥
इति सद्यः शौचाधिकारः। इदमुक्तं
गोब्राह्मणानामन्यतर प्रमापितानां वा।
तथा हारीतः — गोभिर्हतानां ब्राह्म-
णेन वा हतानां च सद्यः शौचमिति॥

॥ राजक्रोधाच्चायुद्धे ॥

अन्वक्षमिति वर्तते। चशब्दोऽपिश-
ब्दस्यार्थे भिन्नक्रमश्च। राजक्रोधा-
दयुद्धेऽपि। अपिशब्दाद्युद्धेऽपि। त-
था च मनुः —
उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य तु।

सद्यस्संतिष्ठते यज्ञस्तथा शौचमिति स्थितिः॥

इति। च शब्दस्समुच्चयार्थो वा। तत्र द्व-

453 यं राजक्रोधात् घातयेद्युद्धे तस्य च

सद्यः शौचं युद्धे अक्रुद्धे नाभिहतस्येति

केचिदेवं व्याचक्षते।

राजक्रोधाद्धतानामयुद्धे च जनपदक्षो-

भादिभिर्हतानामिति। यथाह- मनुः—

डिम्बाहवहतानां च विद्युता पार्थिवेन च।

गोब्राह्मणस्य चैवार्थे यस्य चेच्छति पार्थिवः॥

इति। अन्ये विवाहकालमाहुः। अयुद्धे

राजक्रोधाद्धतानां सद्यः शौचं विवाहका-

ले च सद्यः शौचमिति। यथाह-

बृहस्पतिः—

कृच्छ्रे विवाहे यज्ञे च संग्रामे देशविप्लवे।

आपद्यपि च कष्टायां सद्यः शौचं विधीयते॥

इति॥

(क)

॥ प्रायोनाशित शस्त्राग्निविषो-
दकौ (दकौ) द्बन्धनप्रवचनैश्चे-
च्छताम् ॥

अन्वक्षमिति वर्तते। बुद्धिपूर्वं प्रा-
454 यादिभि राजानं व्यापादयतां सद्यः
शौचं, प्रायो महाप्रस्थानं तदनिच्छ-
तो राजभयादिना संभवतीति इ-
च्छतामित्युक्तम्। अनाशकमभोजनं
एतदपि दुर्भिक्षादावनिच्छतोऽपि
संभवतीति। शस्त्रं खड्गं खड्गादि
तत्रापि प्रमादादपि संभवत्येव।
गन्या अग्न्यादीनि प्रसिद्धानि तत्र सर्वत्रापि
प्रमादात्संभवत्येव। एवं चाबुद्धिपूर्व-
मेव हतानां यथाप्राप्तमेव इति द्रष्टव्य-
म्। चकारादन्यैरपि एवं भूतैरात्महनन
हेतुभिः॥

इदानीं सपिण्डस्वरूपमाह —

॥ पिण्डनिवृत्तिस्सप्तमे पञ्चमे वा ॥

षट्पुरुषानतीत्य सप्तमे प्राप्ते पित्रादिभ्यः
त्रिभ्यः पिण्डदानं तेषु तु जीवत्सु येभ्य
एव पिता दद्यात् तेभ्यः पुत्रोऽपीति परे-
455 भ्यस्त्रिभ्य इति षट्पुरुषाः आद्य पिण्डसंब-
न्धिनः। यदा जीवपितृकस्य न जीवन्त-
मति ददातीति जीवपितामहाय प्रपि-
तामहाय दद्यादित्याश्रियते, तदा
पञ्चमे निवृत्तिस्त्रीणामप्येतत्तुल्यं
पितृपक्षे वा सप्तमे निवृत्तिः। मातृपक्षे
पञ्चमः इति ॥

॥ जननेऽप्येवम् ॥

दशाह एवैकोऽतिदिश्यते। अन्यथा
मातुरपि सद्यःशौचं प्राप्नोति। तदा-
चारेण विरुध्येत। गृह्यस्मृत्या च-

दशरात्रं दम्पती सूतकिनौ भवत इति।

ततः यदेव शावे द्वैधं दशरात्रं तत्

सपिण्डानां सर्वेषां भवतीति प्रतिपत्त-

व्यम्। तथा च मनुः —

दन्तजातेऽनुजाते च कृतचौले च संस्थिते।

अशुद्धा बान्धवास्सर्वे सूतके च तथोच्यते॥

तथा च व्याघ्रोऽपि —

सूतके तु सपिण्डानां पित्रोर्वा मातुरेव वा।

558 आशौचं दशरात्रं स्यात्त्र्यहं तोयदा-

यिनाम्॥ इति।

तत्रापि दीक्षितादिवर्जं द्रष्टव्यम्।

अपिशब्दात्तच्चेदन्तः पुनरापतेद्दिशादि च॥

॥ मातापित्रोः॥

मातापित्रोर्वा सूतकमिति उपरितन-

वाशब्दोऽग्राह्याहृतव्यः। तथा च

वासिष्ठोऽप्यत्रैव वाशब्दमुक्तवान्।

मातापित्रोर्वा तन्निमित्तत्वादिति तन्मातु-
र्वा तस्यैव वा जातस्य मातुर्न सपत्न्या इत्यर्थः।
व्यवस्थितविकल्पो द्रष्टव्यः। यदि सर्वे
प्रवृत्ति (वृत्त) हीनाः तदानीं सर्वेषां
सूतकं स्यात्। सर्वे प्रवृत्तवन्तः पिता
वृत्तहीनाः तदा मातापित्रोः पिता च वृत्त-
वान् सङ्कोचवृत्तिश्च भवति। तदा मा-
तुरेवेति। यदि तु पिताग्निहोत्री संकोच-
457 वृत्तिर्न भवति, तदा उपस्पृश्याग्निहोत्रं हु-
त्वा पुनराशौचं गृह्णीयादिति द्रष्टव्यम्।
कुतः गर्भमाससमारात्रिस्रंसने गर्भस्य
त्र्यहं वा गर्भस्य स्रंसने यावन्मासो गर्भ-
स्तावन्त्यहोरात्राणि भवन्तीत्यर्थः। आ-
पञ्चमान्मासात् गर्भस्रंसनं ऊर्ध्वं तु प-
क्वामिति बोद्धव्यम्। कुतः। पञ्चमे मा-
सि गर्भो विक्रियत इति ब्राह्मणलिङ्गः।

ततश्च यावन्मासि स्रंसते तत्तुल्यान्य-
होरात्राणि भवन्तीत्यर्थः। त्र्यहं वा
द्विमासिकत्रिमासिकगर्भस्रंसने त्र्यह-
मूर्ध्वं तु मासतुल्यमिति व्यवस्था
द्रष्टव्या। पतनेऽपि मासतुल्यमेवा-
शौचं द्रष्टव्यम्। गर्भपतने तन्मास-
तुल्यमहोरात्रमाशौचमिति पैठ्ठीन-
सिवचनात् आशौचं मातुरेव तद-
धिकारात्। तथाच तत्रैव गृह्यव-
चनं गर्भस्थे प्रेते मातुरेव स्यादा-
शौचमिति। मासतुल्यन्यायेनैव ज-
ननोत्तरकालं मृतस्यापि दशरात्रम्।
सिद्धम्। गर्भस्थे प्रेते मातुरेवैवका-
राज्जननोत्तरकालं पित्रोर्भवति इति
गम्यते। तथाच व्याघ्रः —

458 जाते(काले) मृते सपिण्डानां सद्यः शौ-

यं विधीयते। दशाहेनैव दम्पत्योः
सोदराणां तथैव च॥ इति॥
सोदराणां दशाहवचनं नामकरणादू-
र्ध्वं द्रष्टव्यम्। तथाच पैङ्गयगृह्यस्मृ-
तिः- गर्भस्थे प्रेते मातुरेव इत्येकका-
रात् स्यादशौचं जात उभयोः आर्य-
कृतनाम्नि सोदराणां आपन्नदासित्येके।
दन्तजाते कृतचौले सर्वेषामित्यादि।
सर्वेषां दौ दपुत्राणां दशाह इत्येव द्र-
ष्टव्यम्। मासस्रमारात्रिस्रसने गर्भ-
स्थेत्येव सिद्धे गर्भग्रहणं गर्भसंनिकृ-
ष्टाया मातुरेवेदमाशौचमिति नियमा-
र्थम्॥

॥ श्रुत्वा चोर्ध्वं दशाभ्याः पक्षिणी॥
दशमीग्रहणं सर्वाशौचप्रदर्शनार्थम्।
पक्षिणी अहर्द्वयमध्यगतरात्री

4 ^ तीस्रश्चिरसुक्तत्वात कृतशौचानां - 20

रात्रिद्वयमध्यगतमहर्वा सपिण्डमर-
459 णं जननं श्रुत्वा पक्षिण्याशौचं भ-
वति। चण्डालशवस्पर्शे च अकृतशौ-
चानां ^ मिदं द्रष्टव्यम्। चतुरहस्संबन्धि-
नस्तु देशान्तरस्थे प्रेते ऊर्ध्वं दशाहात्
श्रुत्वैकरात्रमाशौचमिति वसिष्ठोक्तं द्र-
ष्टव्यम्। एकाहस्संबन्धिनो बाल देशा-
न्तर इत्यनेन सद्यः शौचम्। दशाह-
संबन्धिनस्तु "अतिक्रान्ते दशाहे तु
त्रिरात्रमशुचिर्भवेत्" इति मनुनोक्तं
त्र्यहं द्रष्टव्यम्। सर्वेषां संवत्सरादू-
र्ध्वं स्नानमेव। संवत्सरव्यतीते स्पृ-
ष्ट्वैवापो विशुद्ध्यतीति मनुवचनात्।
॥ असपिण्डे योनिसंबन्धे
सहाध्यायिनि च ॥
असपिण्डस्समानोदकः। तस्मिन्मृते

समानोदकानां पक्षिणी इदमपि
460 चतुरहस्संबन्धिनः एकाहस्संबन्धि-
नस्सर्वः शौचं, कालदेशान्तर इत्य-
नेन त्र्यहस्संबन्धिना एकाहः कल्प्यः।
दशाहसंबन्धिनः त्र्यहात्तूदकदायिना-
मित्यनेन त्र्यहमित्येतद्द्रष्टव्यम्। यौनि-
संबन्धिनो मातुलमातृभागिनेयपैतृ-
ष्वस्रेयादयः। तेषु मृतेषु पक्षिणी।
तथा सहाध्यायिनि। सहाध्यायी = एको-
पाध्यायकः। चशब्दात्सुहृदि च।
॥ सब्रह्मचारिण्येकाहम्॥
सब्रह्मचारी = समानचरणः। तस्मिन्मृ-
ते एकरात्रमाशौचं गृह्णीयादित्यर्थः।
सर्वत्र गृह्णीयादिसध्याहारात्॥
॥ श्रोत्रिये चोपसंपन्ने॥
एकरात्रं गृह्णीयादिति वर्तते। श्रोत्रियेः

षडङ्गवेदाध्यायिनि उपसंपन्ने ज्ञा-
461 नानुष्ठानसंपदुपेते असब्रह्मचारिण्यपि
उपसंपन्नो वा केनचित्कारणेनाश्रितः
समीपनिवासी वा। चशब्दाद्राजा च॥
॥ प्रेतोपस्पर्शने दशरात्रमाशौ-
चमभिसंधाय चेत् ॥
प्रेतस्य मृतस्य उपस्पर्शने निर्हरण इत्य-
र्थः। उपशब्दप्रयोगात् न स्पर्शनमात्रे
दशरात्रमाशौचमभिसंधाय चेत् यदि
दृष्टार्थमङ्गीकृत्य स्पृशति न धर्मार्थ-
मतो वा असंसर्गमात्रमाशौचं न तु व-
क्ष्यमाणं, अधः शय्यासनिन इत्यादि-
आशौचाधिकारे पुनराशौचग्रहणात्
अत्रैव विषयविभागः प्रतिवक्तव्यः। स-
पिण्डानां मध्ये यः कश्चिद्वहति सं-
स्कारं वा करोति तस्य विशेषो नास्ति।

तत्प्रतिपादकवचनाभावात्। समानोद-
कानां दशरात्रमाशौचं-"रजन्यां हैव चैके-
न त्रिरात्रैरेव च त्रिभिः।
शवस्पृशो विशुध्यन्ति त्र्यहात्तूदकदायिनाम्॥
462 इति समानोदकानां मध्ये ये प्रेतनिर्ह-
रणं कुर्वन्ति। संस्कारं वा कुर्वन्ति ते-
षां दशरात्रमाशौचम्। इतरेषां त्रिरा-
त्रमिति भाष्यकारेण व्याख्यातत्वात्।
ये च समानोदकेभ्योऽन्ये तेषां मनु-
नोक्तं द्रष्टव्यम्॥-
असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत्।
विशुध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान्॥
यद्यन्नमत्ति तेषां तु सद्दशाहेन शुध्यति।
1 अनदन्नन्नमह्नैव न च तस्मिन्गृहे वसन्॥
इति। अत्र शवनिर्हरणं संस्कारं वा
कृत्वा कटकरणं च करोति।

तदन्नं चाश्नाति चेत् दशाहः कटकरणमैत्रमेव कृत्वा तदन्नं नाश्नाति त्र्यहः कटकरणं चेन्न करोति, तदूहेऽपि न वसति चेदहोरात्रं ग्रामं च न प्रविशति चेत् अद्वैवेत्येवकारात् सद्यो

463 भवति। सपिण्डमसपिण्डं वा दृष्टार्थमङ्गीकृत्य वहति तस्येदं विधेयमिति। ब्राह्मणस्य ब्राह्मणशवस्पर्शने एवैतद्वैश्यशूद्रयोः पृथगारम्भात्। क्षत्रियस्यापि क्षत्रियशवस्पर्शने आत्मीयमेव आद्यन्ताभिधाने मध्यमप्रसिद्धेः उक्तः। वैश्यशूद्रयोः समानजातीयप्रेतोपस्पर्शने आत्मीयमेव निर्हरणोपाचरणाशौचं तद्वती सर्वः॥

॥ आर्तवीर्वा ॥

ऋतुसमानसंख्या वा वैश्यशूद्रयोरा-
शौचम्। षड्डेति वक्तव्ये आर्तवीग्र-
हणं पञ्च षड्भर्तवो भवतीति ज्ञापना-
र्थम्। तत्र शूद्रस्य षट् वैश्यस्य पञ्चेति
द्रष्टव्यम्। वैश्य पञ्च वृत्तवता आवृत्तवतः
आत्मीयं शूद्रविषयेऽपि सच्छूद्र-
स्य वृत्तवतः षडितरस्यार्धमासमस-
च्छूद्रस्य वृत्ताभावान्मासमेवेति ॥

॥ पूर्वयोश्च ॥

464 पूर्वयोर्ब्राह्मणक्षत्रियोरार्तवीर्या पूर्वोक्तं
वा विकल्पोऽनुकर्षणार्थश्चकारः॥

॥ त्र्यहं वा ॥

पूर्वयोरिति वर्तते। तत्र ब्राह्मणस्यावृ-
त्तवतो द्वशरात्रं। वृत्तवतः पञ्च। आ-
हिताग्नेस्त्र्यह एव क्षत्रियस्यापि
कल्प्यमित्येवं द्रष्टव्यम्॥

॥ आचार्यतत्पुत्रस्त्रीयाज्यशिष्येषु चैवम् ॥

आचार्ये तत्पुत्रे तत्पत्न्यां च प्रेतायां याज्ये शिष्ये च मृते चशब्दाचा- र्याचार्ये च एवं शब्दात् त्र्यह एवै- कोऽतिदिश्यते। आचार्यादौ प्रेते त्रिरात्रमित्यादि स्मृत्यन्तरदर्शनात् पूर्वं समानजातावुक्तं असमानजातेस्तु॥

॥ अवरश्चेद्वर्णः पूर्वं वर्णमुप- स्पृशेत्तत्र शावोक्तमाशौचम् ॥

465 अवरो जघन्यः क्षत्रियादिवर्णग्रहणं प्रतिलोम संसर्गे ना (शवदर्शनेना) शौचमात्रं भवति। किं तर्हि, प्रायश्चि- त्तमपि भवतीति। यद्यप्यनुलोमा अपि न वर्णशब्देन वाच्याः। तथापि प्रतिलो- मास्तु धर्महीना इति प्रतिलोमानामेव

धर्महीनत्वात् अनुलोमानां मातृजातिवत्
कल्प्यमिति पूर्वं ब्राह्मणाद्यावहेतु ।
उपशब्दप्रयोगात् पूर्वा वा क्षत्रियादि तत्र
परस्परो वहने यच्छाव उक्तमाशौचं तदे-
व भवति । यथा क्षत्रियस्य ब्राह्मणशवस्प-
र्शने दशरात्रं, तथा ब्राह्मणस्य क्षत्रिय-
शवस्पर्शने पञ्चदशरात्र इति ॥
एवं सर्वत्राशौचाधिकारे पुनराशौचग्र-
हणं तद्वदाशौचार्थम् । न पुनस्स्वा-
ध्यायाद्यभावमात्रमिति । शावाशौच-
मिति वक्तव्ये उक्तग्रहणं भोजनादि-
व्यवहारेऽपि तदाशौचप्रवेशार्थमेवं
चातिदेशाहे परत्राव इत्यादि यत् स्मृत्य-
५८८ न्तरे प्रायश्चित्तं श्रूयते तदाशौचोत्तर-
कालं द्रष्टव्यम् । तत्रोक्तमाशौचमिति
वक्तव्ये शवग्रहणं शवनिमित्तस्य सर्व-

स्य प्रवेशार्थम्। ततश्च दृष्टार्थमङ्गीकृत्य
परस्परवहने स्मृत्यन्तरोक्तं द्रष्टव्यम्॥
यथाह व्याघ्रः
(म)
अवरश्चेद्वरं वर्णं वावरं वा वरो यदि।
वहेच्छवं तदाशौचं दृष्टार्थे द्विगुणं भवेत्॥
इति। तथाप्यदृष्टार्थेऽपि—
अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः।
पदे पदे यज्ञफलं आनुपूर्व्याद्व्रजन्ति ते॥
इत्यादि। तच्छवावमाशौचमिति वक्तव्ये
तत्र ग्रहणं वृत्तस्वाध्यायापेक्षयोपेक्षा-
योक्त्व आशौचं माभूदिति॥
एवं च यथा ब्राह्मणस्य दशाहो नित्यः
.467 एवं क्षत्रियादीनामपि पञ्चदशाहादयो
वेदितव्या वहने यदुक्तमाशौचं तदेव
संस्कर्तर्यपि वेदितव्यम्। कुतः—
६७
संस्कर्ता चैव वोढा च त्रिरात्रेणैव शुध्यति॥

समानोपदेशात् समानजातावस-
मानजातावपि शववहननिमित्तमाशौ-
चं उक्त्वेदानीं बुद्धिपूर्वं तत्स्पर्शन-
माह —
॥ पतितचण्डालसूतिकोदक्या-
शवस्पृष्टितत्स्पृष्ट्युपस्पर्शने
सचैलोदकोपस्पर्शनाच्छुध्येत ॥
पतितो ब्राह्मणादिः। चण्डाल उक्तलक्षणः।
सूतकेन तद्वा अनुच्यते। उदक्या: रज-
स्वला। शवग्रहणेन शवनिमित्तं सर्वमु-
च्यते। यच्चैवं ये च तदाशौचभाजः
468 ये च कटकरणं कुर्वन्ति, ये च वहन्ति
ये च संस्कुर्वन्ति इत्यादि उपस्पर्शन-
शब्दः प्रत्येकमभिसंबध्यते। पतित-
चण्डालसूतिकोदक्या शवोपस्पर्शने
स्पृष्ट्युपस्पर्शने तत् स्पृष्ट्युपस्पर्श-

न इति । स्पृष्टिः पतितादीनां साक्षात्
स्पृष्टा तत्स्पृष्टिः = पतितादिस्पृष्टिः
स्पृष्टा । उपशब्दो बुद्धिपूर्वोऽर्थः ।
शवस्य बुद्धिपूर्वस्पर्शने अलङ्कारा-
द्यर्थं केवलेच्छया वा समानजातीयशवं
समानजातीयं वा विशेषाभावात् ।
बुद्धिपूर्वं तु मानवं द्रष्टव्यम् । यथाह—
दिवाकीर्त्यमुदक्यां च पतितं सूतिकां तथा।
शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति ॥
इति ॥— द्वयोराशौचमाम्नातं गौ-
तमस्तु स्त्रीयाणामिति ॥
सचेलस्सवस्त्रः उदकोपस्पर्शनमेवं
च स्नायादिति वक्तव्यमिति चेत्—
नैष दोषः । पूर्वं दण्डवदाप्लुत्य पुनर्या-
469 वत्स्नायादिसेवमर्थः । उदकोपस्पर्श-
नादिसूक्तं इति । सचेल उदकमुप-

स्पृशेदिति वक्तव्ये उदकोपस्पर्शना-
च्छुध्येत इत्युपादानं नैमित्तिकस्नानेऽ
पि तर्पणानुप्रवेशार्थम्। तथाच भार्गवीये —
नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते।
तर्पणं त्रिविधस्यापि प्रजापतिरुवाच ह॥
इति॥ — ॥ पुनश्च ॥
उपस्पर्शने सचेल उदकोपस्पर्शनाच्छु-
ध्येदिति वर्तते। स्पृष्टितस्पृष्टिनिवृत्त्य-
र्थं पृथग्ग्रहणम्। सृगालादीनामप्यु-
पलक्षणम्। चकारादस्थि च। तदपि
सस्नेहं - यथाह मनुः —
नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुध्यति।
आचम्यैव तु निस्नेहं गां स्पृष्ट्वा वीक्ष्य वा रविम्॥
इति॥ एतत्त्वबुद्धिपूर्वस्पर्शने वसिष्ठोक्तं
470 द्रष्टव्यम्। इच्छानुगमने त्रिरात्रं च प्राय-
श्चित्तं द्रष्टव्यम्। मानुषास्थि स्निग्धं

(6) यथाह मनुः — अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा। स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति॥ इति। सर्वेषां स्वजातिविषयमेवेदम्। क्षत्रियवैश्यानुगमने तु वासिष्ठोक्तं द्रष्टव्यम्॥

स्पृष्ट्वास्थि सस्नेहं स्नात्वा त्रिरात्रमा-
शौचमाचरेदित्यहोरात्रमिति। च-
कारात् काकादि वा। केचित् शवानु-
गमनमाहुः।
तत्र सचैलस्नानं घृतप्राशनं च द्र-
ष्टव्यम्। शूद्रानुगमने त्रिरात्रं च
प्रायश्चित्तं द्रष्टव्यम्। यथाहाङ्गिराः—
प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः।
नीयन्तमनुगच्छेत त्रिरात्रमशुचिर्भवेत्॥
त्रिरात्रे तु ततः पूर्णे नदीं गत्वा समुद्रगाम्।
प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति॥
इति॥

क्षत्रियस्य वैश्यानुगमने वैश्य-
स्य शूद्रानुगमने ब्राह्मणवत् कर्तव्यम्।
क्षत्रियस्य शूद्रानुगमने एकरात्रस-
हितं प्राणायामं द्रष्टव्यम्॥

6)।

(न्या)
॥ यदुपहन्यादि सेके ॥

एके यदेवाङ्गमुपस्पृशति श्वा तस्यैव प्र-
क्षालनमिच्छन्ति। सोऽयं विकल्पः
उपरिकायस्पर्शने स्नानमधः कायस्प-
र्शने तु प्रक्षालनमिति द्रष्टव्यम्।
तथाच पक्षिस्पर्शनेऽपि। तथाच
जातुकर्णिः—
ऊर्ध्वं नाभेः करौ मुक्त्वा यदङ्गं स्पृशते नरः।
स्नानं तत्र विधातव्यं शेषे प्रक्षाल्य शुध्यति॥
इति। एवं च श्वविषयेऽपि कुरवर्जं
द्रष्टव्यम्॥

॥ उदकदानं सपिण्डैः कृतजटस्य॥

अधिकारात् प्रेतस्य कृतचौलस्य स-
पिण्डैरुदकं देयं सर्वैरशुचिभिः।
उदकदानचोदनयैवाशौचमपि द्रष्टव्य-
म्। उदकक्रिया चौलं (च) चेति।

४७२ वासिष्ठेन सहानिर्देशात् यस्योदकक्रि-
या तस्याशौचमिति। तत्र सहानिर्दे-
शस्य प्रयोजनमिति तत्सम्बन्धान्तरा-
त् त्रिरात्रं द्रष्टव्यम्। यथाह मनुः —
निवृत्तचौलकानां तु त्रिरात्राच्छुद्धिरि-
ष्यते ॥ इति ॥
क्षत्रियादीनामप्येवं तत्तुल्यमेव। विशे-
षाभावात्। वयोऽवस्थापेक्षया त्र्यह-
माशौचकल्पाः श्रूयन्ते तेऽपि सर्वेषां
तुल्यरूपेण द्रष्टव्या विशेषाभावात्।
ये पञ्चषेवृत्ताद्यपेक्षया पञ्चदशाहाद-
यः परिकल्पिताः, ते तु कृतोपनयने
मृते ज्ञेयाः। तथा च देशान्तराशौचम्।
तथा च व्यासः —
तुल्यं वयसि सर्वेषामाशौचं परिकीर्तितम्।
उपनीते तु विषमं तस्मिन्नेवातिकालजम्॥

473. इति। अतिकालजमित्युक्तत्वात् अस-
माप्ताशौचकालात् प्राक् श्रूयते। यच्चो-
पं इत्याद्यस्येत्यादि तदुपनयनात्
प्रागपि द्रष्टव्यम्। कृतजटस्याग्नि-
संस्कारमपि द्रष्टव्यम्। स्मृत्यन्तर-
दर्शनात्। यथाह लोकाक्षिः —
तूष्णीमेवोदकं कुर्यात् तूष्णीमेवाग्निमेव च।
कृतजटानां तु सर्वेषामन्यत्रापीच्छया द्वयम्॥
इति। एवं च कृतजटस्याग्निसंस्कारः
नियमतः उदकदानं चाकृतचौलस्या-
नियमत इति द्रष्टव्यम्। तथा च मनुः —
नात्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया।
जातदन्तस्य वा कुर्यान्नाम्नि वापि कृते सति॥
इति॥ — ॥ तत्स्त्रीणां च॥
तदुदकदानमग्निसंस्कारसहितं तद्ग्र-
हणात् स्त्रीणां च कर्तव्यम्। कृतजटा-

नुकर्षणार्थश्चकारः। आशौचलाघवा-
र्थं पृथग्ग्रहणम्। तत्स्मृत्यन्तराद्धवग-
474 न्तव्यम्। तत्र—
अप्रौढायां तु कन्यायां सद्यः शौचं विधीयते।
इति प्राक् चूडाकरणात् सद्यः शौचं
प्रौढाशब्देन चूडाकरणमुच्यते। अह-
स्त्वदत्तकन्यासु बालेषु विशोधनं इति
चूलाकरणादूर्ध्वं प्रदानकालात् प्राक्
एकाहः। —
स्त्रीणामसंस्कृतानां च त्र्यहैः शुध्यन्ति
बान्धवाः॥ इति॥
अनेन प्रदानकालादूर्ध्वं अवृत्तायास्त्रिरा-
त्रमिति। —
यथोक्तेनैव कालेन शुध्यन्ति तु सनाभयः॥
इति॥ अत्र दण्डापूर्विका स्त्रीविषयेऽपि
पित्रोर्दशाहः एवं द्रष्टव्यम्। सपिण्ड-

विषये त्रिपुरुषं द्रष्टव्यम्। अवृत्तानां तु स्त्रीणां त्रिपुरुषमिति वसिष्ठवचनात्॥

॥ एके प्रत्तानाम्॥

उदकपाण्यवृत्तानामपि परपक्षैरेव कर्तव्यमित्येके मन्यन्ते। गौतमस्तु—

475 अद्भिर्वाचा च दत्ताया म्रियेतादौ वरो यदि।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा॥

इति कन्यावदतिदेशात् पित्रादिभिरेव देयमिति। तत्र पितृपक्षाभावे परपक्षैः कर्तव्यमिति द्रष्टव्यम्॥

इदानीं कथमाशौचकाले वर्तेयुरित्यत आह—

॥ अधः शय्यासानिनो ब्रह्मचारिणस्सर्वे॥

अधः भूमावेव शयीरन्। आसीरंश्च मैथुनं वर्जयेयुः। यावदाशौचं तावत्। सर्वे ग्रहणं समानोदकानामप्येवमिति

ज्ञापनार्थम् ॥

॥ न मार्जयीरन् ॥

उज्वलवेषधारिणश्च न स्युरित्यर्थः।
गात्रमलापकर्षणं वर्जयेयुः॥

॥ मांसं न भक्षयेयुराप्रदानात् ॥

476 आ श्राद्धकर्मण आमिषं प्राणात्यया-
दावपि न भक्षयेयुः।

॥ प्रथमतृतीयसप्तमनवमेषू-
दकक्रियाः॥

प्रथमादिष्वहस्सु सपिण्डैरुदकदा-
नं कर्तव्यम्। पुत्रैस्तु प्रतिदिनं द्रष्ट-
व्यम्। क्रियाग्रहणं गृह्योक्तोदकदा-
नविध्युपसङ्ग्रहार्थम्। यथा प्रेताय
सकृदुदकं प्रोहतीत्यादि॥

॥ वाससां च त्यागः॥

उदकदानकालधारितानां वस्त्राणां च

त्यागः। अन्यानि धारणीयानीत्यर्थः।
चशब्दात्केशादीनि च। तथाच स्मृत्यन्तरम्॥

द्वितीयेऽहनि कर्तव्यं क्षुरकर्म प्रयत्नतः।
तृतीये पञ्चमे वापि सप्तमे वा प्रदानकृतः॥

॥ अन्त्ये (न्ते) त्वन्त्यानाम॥

अन्त्ये नवमे। अन्त्यानां श्मश्रूणां वाससां च त्याग इत्यनुवर्तते। तुशब्दो विशेषार्थः। उदकदानं प्रथमादिषु कर्तव्यम। वाससां त्यागो दन्त एवेति।
अन्त्यानामिति बहुवचनमनुलोमानां संव्यवहार्याणामप्येवमेवेति॥ (सू.) दन्तजन्मादि मातापितृभ्यां॥ दन्तजन्म प्रभृति नियमतो मातापितृभ्यामुदकदानं कर्तव्यम। एवं च तयोरपि प्रागनियम इति द्रष्टव्यम॥

॥ बालदेशान्तरप्रव्रजितासपि-
ण्डानां सद्यः शौचम् ॥

नामकरणात् प्राक्। ततश्च नामकर-
णादूर्ध्वं प्राग्दन्तजननात् स्मृत्यन्त-
रोक्तमेकाहं कृष्ण्यम्।

नृणामकृतचौलानामशुद्धिर्नैशिकी स्मृता ॥

इति। दन्तजननादूर्ध्वं प्राक् चूडाकरणा-
त्त्र्यहं। — अरण्ये काष्ठवत्त्यक्त्वा
क्षपेत त्र्यहमेव तु ॥

इति। देशान्तरे यो मृतः तस्मिन्नेव
काले न श्रूयते। प्रव्रजितनैष्ठिकवान
प्रस्थपरिव्राजकाः तस्मिन् मृते सपि-
ण्डानां सद्यः शौचम्। असपिण्डस्स-
मानोदकस्तस्य चोक्तो विषयः।

॥ राज्ञां च कार्यविरोधात् ॥

सद्यः शौचमिति वर्तते।

राज्ञामिति बहुवचनं राजसदृशानाम-
मात्यानां ग्रहणार्थं चकारः यद्यस्य
चेच्छति पार्थिवः इति। कार्यं रक्ष-
णादिविरोधासम्भवः॥

४२४ ॥ ब्राह्मणस्य च स्वाध्यायनिवृ-
त्त्यर्थं (स्वाध्यायनिवृत्त्यर्थम्)
स्वाध्यायाविघातकार्यं हेतुवचनं वृत्त-
स्वाध्यायापेक्षया आशौचं भवतीति
ज्ञापनार्थं चकारः। क्षत्रियादेरपि स्वा-
ध्यायनिमित्तप्रवेशार्थः प्रतिपादितानि
विषयाणि। द्विरुक्तिरध्यायपरिस-
माप्त्यर्था ॥ – ३० ॥

इति मस्करीये गौतमभा-
ष्ये चतुर्दशोऽध्यायः॥

॥ श्रीः ॥

॥ अथ श्राद्धममावास्यायां पितृभ्यो दद्यात् ॥

अथ श्राद्धं पञ्चविधं· यथाह व्याघ्रः —

४७१ नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धमथापरम् ।
पार्वणं चेति विज्ञेयं श्राद्धं पञ्चविधं स्मृतम् ॥

पञ्चविधं स्मृतमिति । तत्राहरहर्य-
त्क्रियते तन्नित्यम् । यथाह मनुः —

दद्यादहरहः श्राद्धं अन्नाद्येनोदकेन वा ।
पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन् ॥

इति । तथा तत्रैवोक्तम् ॥ —

एकमप्याशयेद्विप्रं पित्रर्थं पाञ्चयज्ञिके ।
न चैवात्राशयेत्कंचिद्वैश्वदेवं प्रतिद्विजम् ॥

इति । तथा च स्मृत्यन्तरम् —

ब्रह्मचर्यमनध्यायं मुक्त्वा श्राद्धं तु नैत्यकम् ।

यदुक्तमेकोद्दिष्टं नैमित्तिकं, एकमेवो-

द्दिश्य क्रियमाणत्वादेकोद्दिष्टम् ।
यथाह कात्यायनः — अथैकोद्दिष्टमे-
को द्विजः, एकं पात्रं, एकं पवित्रं,
480. एकोऽर्घ्यः, एकः पिण्डः, नावाहनं,
नाग्नौकरणमिति । तदाद्यौ चानन्तर-
मारभ्य सपिण्डीकरणात् प्राक् कर्त-
व्यम् । यथाह लोकाक्षिः —
एकोद्दिष्टं तु कर्तव्यं प्रतिमासं तु वत्सरम् ।
प्रतिसंवत्सरं चैवं आद्यमेकादशेऽहनि ॥
तथा व्याघ्रोऽपि —
एकादशेऽह्नि कर्तव्यं त्रिपक्षे वा तथैव च ।
षण्मासे च तथा कुर्यादेकोद्दिष्टं प्रयत्नतः ॥
इति । तत्र संवत्सरे परिपूर्णे सपिण्डी-
करणं कर्तव्यम् । यथाह जातुकर्ण्यः —
ततः संवत्सरे पूर्णे त्रिपक्षे वा तथैव च ।
सपिण्डीकरणं कुर्यात् अर्वाग्वा वृद्धिकं भवेत् ॥

त्रिपक्ष इत्याहिताग्निविषयम्। कुतः।
बृहस्पतिवचनात्। यथाह —
484 अनन्तरममावास्यां द्व्यागस्य चेद्भवेत्।
सपिण्डीकरणं तत्र कुर्याद्वेकाग्निमान्स्वतः॥
तदलाभे त्रिपक्षात्तु सपिण्डीकरणं स्मृतम्॥
इति। पक्षात्सपिण्डीकरणं स्मृतमिति।
त्रिपक्षात्सपिण्डीकरणं स्मृतमिति जा-
बालश्रुतौ श्रूयते। स्मृतमिति सपि-
ण्डीकरणादूर्ध्वं संक्रान्त्यादौ पिण्डत्रय-
निर्वापेण श्राद्धं कर्तव्यम्। प्रतिसंवत्सरं
त्रिपदहन्येको द्विष्ट- यथाहोशना —
संक्रान्त्यामुपरागे च पर्वायनमहायने।
त्रीन् पिण्डान्निर्वपेत्तत्र त्रिपदह्येकमेव तु॥
इति। प्रतिसंवत्सरमाग्रहायण्या ऊर्ध्वं
अष्टका च कर्तव्या। यथाह गृह्यकारः —
ऊर्ध्वमाग्रहायण्यास्त्रियोपरपक्षा-

482 स्तेषामेकैकस्मिन्नेकैकाष्टका भवति।
शाकाष्टका, मांसाष्टका, पूपाष्टकेति।
अत्र काम्यं कामनया यत्क्रियते तथा
शकादश्यां पुत्रकाम इत्यादि वृद्धि श्रा-
द्धं नान्दीमुखं पार्वणश्राद्धं मासश्रा-
द्धं, अथवा पिण्डत्रयानिर्वपणे यत्क्रि-
यते अष्टकादि तन्नियम। शेषं सर्वं नै-
मित्तकमिति। अस्मिन पञ्चविधे स्मृते—
॥ अथ श्राद्धममावास्यायां पितृ-
भ्यो दद्यात ॥
इत्यादि। अथानन्तरं सपिण्डीकरणा-
त कुतः। अमावास्यायां पितृभ्यः
श्राद्धं दद्यादित्यारम्भात इदं मासश्रा-
द्धमिति ज्ञातुं शक्यत्वात। स्मृत्यन्त-
रेऽपि सपिण्डीकरणादूर्ध्वं मासश्रा-
द्धप्रतिषेधात। यथाह बृहस्पतिः —

सपिण्डीकरणादूर्ध्वं पार्वणं यः करोति तु।
483 कृमीभूतस्य विष्ठायां पितृभिस्सह मज्जति॥
इति। एवं तर्हि सपिण्डीकरणादूर्ध्वं
यानि श्राद्धानि तान्येव कर्त्तव्यानीति चेत्
अत्रोच्यते। केषांचित् तदभावसूचनार्थमनन्तरं पार्वणमेव कर्तव्यमिति।
यथाह बृहस्पतिः—
यतीनां तु मृतानां च क्रिया काचिन्न दृश्यते।
अहन्येकादशे प्राप्ते पार्वणं तु विधीयते।
नैष्ठिकानां वनस्थानां मुक्तानां च तथैव च।
सपिण्डीकरणं नोक्तं एकोद्दिष्टं तथैव च।
इति। श्राद्धमिति कर्मनामधेयं, अतिशयश्रद्धासाध्यत्वात् श्रद्दधान एव प्रतिपाद्यते। यथाह- पुत्रैर्दत्तेन यत्र तत्रस्थाः
पितरः तदुपभोगेन सुखमासत इत्यर्थवाददर्शनात् अमावास्यायां सूर्या-

५४५ चन्द्रमसोः परस्मिन् संनिकर्षे पितृभ्यः
पितॄनुद्दिश्य बहुवचनप्रयोगात् पितामह-
प्रपितामहयोरपि देयम् ॥
(सू) ॥ पञ्चमीप्रभृति चापरपक्षस्य ॥ यथाश्राद्धं
कृष्णपक्षस्य वा पञ्चम्या आरभ्य तं
कुर्यात् ॥ (सू) यथाश्राद्धम् ॥ यथा श्राद्धस्थितिः
तथा कर्तव्यमित्यर्थः ।
अष्टकाश्राद्धं पञ्चमीप्रभृति कुर्यादित्यभि-
प्रायः । अपरपक्षग्रहणममावास्याधि-
कारात् पूर्वपक्षो माभूदिति ॥
॥ सर्वस्मिन् वा ।
अपरपक्षे प्रतिपत्प्रभृति वा कुर्यादित्य-
र्थः । प्रभूतद्रव्यस्यायं द्रष्टव्यः ॥
॥ द्रव्यदेशब्राह्मणसंनिधाने वा ॥
द्रव्यस्य रजतादेः । यथाह व्याघ्रः
५४६ रजतं काञ्चनं चैव खड्गं मत्स्यामिषं मधु ।

आनन्त्यायैव कल्पते मुन्यन्नानि च सर्वशः ॥
इति। देशस्य पुष्करादेः। यथाह व्याघ्रः —
पुष्करेष्वक्षयं श्राद्धमन्यक्षेत्रे तथैव च।
नद्यां प्रभोदयं चैव ह्रदे गोष्ठे तथा गिरौ।
इति। ब्राह्मणानां यतिवर्गपाङ्क्तपातकानाम्।
यथाह व्याघ्रः —
स्वधा च राजतं पात्रं दौहित्रः कुतपास्तिलाः।
वस्त्रश्च पावनीयानि त्रिदण्डी योगिरेव च॥
इति। संनिधाने उपपत्तौ पूर्वपक्षेऽपि
कुर्यादित्यभिप्रायः॥
॥ कालनियमः शक्तितः॥
यथास्य द्रव्यादेरसम्भवोऽत्यन्तं तदा-
ग्रहायण्या ऊर्ध्वमित्युक्तकालनियमो
नास्ति। यस्मिन्मासेऽत्यन्तं सम्भवस्त-
स्मिन्नेव कर्तव्यमित्यभिप्रायः। द्रव्याद्य-
सम्भवे यथा पक्षविलोपो नास्ति तथा

मासविशेषो नास्तीत्यभिप्रायः॥

एवं चानेन न्यायेन तिथिनियमस्याप्य-
भावः प्रतिपादितः॥

४८६.२॥ सर्वदा च श्राद्धे, प्रकर्षं गुणसंस्कार-
विधीनन्न(धिरन्न)स्य ॥

प्रकर्षातिशयेन कुर्यात्। अन्नस्य भक्ष्य-
भोज्यादेः गुणाः शातिविशेषात् शा-
कसूपादीन विधीन। संस्कारान सुस्नि-
ग्ध सुरभित्वादीन दर्भलोपसंख्यादीन॥

॥ न वा वरान् भोजयेत॥

सति सामर्थ्ये। एवमसति।

॥ अयुजो वा यथोत्साहम॥

अयुग्मान्यथोत्साहं यथासामर्थ्यं, अर्वा-
न्ङ्नवभ्यः पूर्व एवावर ग्रहणादूर्ध्वं नव-
भ्यः प्राप्त्यभावात॥

ननु च 'अयुजो वे'त्येव वक्तव्यम॥

ततश्चोर्ध्वं नवभ्यो ऽप्राप्तित्वात् अ-
नप्राप्तिणार्थ एवारम्भस्स्यात्। ततश्चा-
सामर्थ्यकृत एव विकल्पो भविष्यती-
ति यथोत्साह इत्यतिरिक्तं उच्यते।
उत्साहेऽपि सति सत्क्रियाद्यविरोधेन
४८७ भोजयितव्यम्। इति। यथाह-वसिष्ठः—
द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा।
भोजयेत्सुसमृद्धोऽपि न प्रसज्येत विस्तरे॥
सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदम्।
पञ्चैतान् विस्तरो हन्ति तस्मात्तत्परिवर्जयेत्॥
इति। देवाः २ विश्वेदेवाः। तदङ्गभूताः।
यथाह व्यासः—
दक्षस्य दुहिता साध्वी विश्वा नाम प्रकीर्तिता।
तस्याः पुत्रा महात्मानो विश्वेदेवा महाबलाः॥
क्रतुर्दक्षो वसुस्सत्यः कालकामौ धुरी रुची।
पुरूरवाद्रवश्चेति विज्ञेयास्ते दशामराः॥

इति ॥

इष्टिश्राद्धे क्रतुदक्षौ अष्टकयां कालकाम्यकौ ।
नान्दीमुखे वसुसत्यौ काम्ये चापि धुरी रुची ॥
पुरूरवाद्रवश्चेति पार्वणे तु नियोजितौ ।
५४४ आद्रवेश्वामतस्तेषां तत्र तत्र नियोगतः ।

इति । तथाच स्मृत्यन्तरम् ॥ —

देवाद्यन्तं भवेच्छ्राद्धं पित्राद्यन्तं न तद्भवेत् ।
पित्राद्यन्तं यदि भवेत्तद्धि रक्षांसि भुञ्जते ॥

इति ॥ तथाच भार्गवीयमपि ॥ —

एक एव यदा विप्रो द्वितीयो नोपपद्यते ।
पितॄणां ब्राह्मणं योज्य दैवं हस्ते नियोजयेत् ॥

इति । तथाच बृहस्पतिरपि —

द्वौ दैवेऽथर्वणौ विप्रौ प्राङ्मुखौ विनिवेशयेत् ।
त्रीनप्युदङ्मुखान्पित्र्ये ऋग्यजुस्सामगान्द्विजान् ॥

इति ॥ — कीदृशान्द्विजयेदित्यत आह —

॥ श्रोत्रियान्वाग्रूपवयःशीलसंपन्नान् ॥

श्रोत्रियान् छन्दोऽध्यायिनः वाक्संप-
न्नान् संस्कृतभाषिणः। रूपसंपन्नान्
मनोज्ञवपुषः। वयस्संपन्नान् परिणत-
481 वयसः। शीलसंपन्नान् प्रशान्तमनसः
एवं गुणान् ब्राह्मणान् भोजयेत्॥
वयस्संपन्नत्वस्यापवादमाह —

॥ युवभ्यो दानं प्रथमम्॥

यत् प्रथममेकोद्दिष्टं तत् तरुणेभ्यो
देयम्॥

॥ एके पितृवत्॥

यद्वयसः पित्रादयः प्रमिताः तद्वयोभ्यः
एव दद्यादित्येके मन्यन्ते॥
सपिण्डीकरणे यदेकोद्दिष्टं तद्विषयमिदं
वेदितव्यम्। सपिण्डीकरणे ह्येकोद्दिष्टमु-
क्तमेवं स्मृत्यन्तरे यथाह — यमः —
सपिण्डीकरणे प्राप्ते कुर्याच्छ्राद्धं द्वयं तथा।

सपिण्डीकरणे विप्रान् भोजयेत्पार्वणे यथा ॥
पृथक्च कल्पयेदन्यदेकोद्दिष्टविधानतः ।
इति ॥ — अथवा "पितृवदिति" पितर-
५१० मुद्दिश्य तरुणं भोजयेत् । पितामहमुद्दि-
श्य वृद्धं कुर्वन्तीति प्रपितामहमुद्दिश्य
वृद्धतरमिति ॥

॥ न च तेन मित्रकर्म कुर्युः ॥

तेन श्राद्धेन न मित्रकर्म कुर्यात् । अन्यो-
न्यं न कुर्यादित्यर्थः । चकाराद्धमित्र-
संवननमपि ॥

॥ पुत्राभावे सपिण्डा मातृसपिण्डाः
शिष्याश्च दद्युः ॥

अयं तावत्प्रथमः कल्पः । यत् पुत्राः श्राद्धं
कुर्वन्तीति तदभावे तु सपिण्डः कर्ता, तद-
भावे मातृसपिण्डाः मातुलादयः । तदभा-
वे शिष्याः । संबन्धिशब्दादाचार्यादयः ।

चर्त्वाचार्य्यश्च ऋत्विज इत्यादि।
एकोद्दिष्टविषयं चेदं मातृसपिण्डशिष्य-
याज्यानां मातृत्वेनोपदेशात्। न ह्येकस्य
५७। मातृसपिण्डः तत्पितुरपि मातृसपिण्डो
भवति। एवं च शिष्ययाज्यावपि मातृस-
पिण्डीकरणादावन्यः क्रमो द्रष्टव्यः।
यथाहोशना —
पुत्राभावे सपिण्डास्समानोदकास्तद्योगा-
स्समानार्षेयाश्चेत्यादि। एकैकेनैकोद्दिष्टं
कार्यं नाशौचवत्सर्वैरिति विसमासः॥
॥ तदभावे ऋत्विगाचार्यौ ॥
ऋत्विग्याज्याय आचार्यः शिष्याय
तदभावे सर्वेषामभावे। पृथक्करणं श्रा-
द्धमकुर्वतामृत्विगाचार्याणां प्रायश्चित्ता-
भाव ज्ञापनार्थम्। एवं च पूर्वेषामवश्यं
प्रायश्चित्तं कर्तव्यमिति द्रष्टव्यम्।

ऋत्विगाचार्याणां श्राद्धं कुर्वतामभ्युदय-
श्च द्रष्टव्यः। चोदनासामर्थ्यात्तदभावग्र-
५१२ हणं पूर्वत्र मातृसपिण्डाः। शिष्याश्चे सगा-
धिकारज्ञापनार्थं योग्यानामेव श्राद्धं द्रष्ट-
व्यम्। कुतः स्मृत्यन्तरसामर्थ्यात्॥

यथाह प्रजापतिः —

गोब्राह्मणहतानां च विद्युता पार्थिवेन च।
आत्मनस्त्यागिनां चैव पतितानां तथैव च॥
सर्वैर्हतानां विप्राणां चरन्तीनां च कामतः।
पाषण्डानाश्रितानां च प्रेतकर्म न विद्यते॥
प्रेतकार्यं भयादिभ्यो यस्तत्कुर्यान्नराधमः।
चण्डालेन हतस्यापि तस्य वक्ष्यामि निष्कृतिम्॥
येषामन्यतमं प्रेतं यो वहेत दहेत वा।
चरेत् सान्तपनं कृच्छ्रं मत्या चेत्तप्तकृच्छ्रकम्॥
तच्छवं केवलं स्पृष्ट्वा पाययित्वाश्रु वा तथा।
एकरात्रं तु नाश्नीयात्त्रिरात्रं बुद्धिपूर्वके॥

५१३ श्राद्धं कृत्वा चरेत् कृच्छ्रं भुक्त्वा सान्तपनं चरेत्।
तथा श्राद्धभुजां चैव द्विगुणं ब्रह्मचारिणाम्॥
इति ॥

॥ न भोजयेद्धि स्तेनक्लीबपतित-
नास्तिकतद्वृत्तिवीरहाग्रेदिधि-
षुदिधिषुपतिस्त्रीग्रामयाजका-
जपालोत्सृष्टाग्निमद्यपकुचर-
कूटसाक्षिप्रातिहारिकान् ॥

श्रोत्रियादिगुणयोगे नैषां प्राप्तौ सत्यां
प्रतिषिध्यते। स्तेनो हिरण्यस्तेनादु-
न्यः। तस्य पतितत्वादेव प्रतिषेधात्।
क्लीबो भग्नोत्साहः। यथाह भगवान्
वासुदेवः — "मा क्लैब्यं गच्छ
कौन्तेय" इत्यादि। न तृतीया प्रकृतिः
तस्याः श्रोत्रियत्वाभावेन प्राप्त्यभावात्।
पतितो ब्रह्महादिः। नास्तिकः = परलो-

४९४ काभावात् व्यवस्थितग्रहः सोऽपि मनो-
दुष्टः क्रियादुष्टस्य तु निन्दितकर्माभ्या-
सात् पतितत्वोपदेशात् । तद्वृत्तिस्तेनैव
च नास्तिक्येन च उपजीवति लोकयात्रा
शास्त्रद्वारेण वीरहा = पुरुषमात्रघातकः ।
अवीराश्च योषित इत्यादौ पुरुषे वीर-
शब्दप्रयोगात् । वृथा सोमाभिषवको
वापि । वीरहा वा एष देवानां यस्सोम-
मभिषुणोति इति श्रुतिदर्शनात् ।
अग्रे दिधिषु दिधिषूपतिरिति । पति-
शब्दः प्रत्येकमभिसंबध्यते । ज्येष्ठायाः
पूर्ववृत्ता अग्रे दिधिषु पुनस्सा ज्येष्ठा
दिधिषू । तथा च मनुः —
ज्येष्ठायां यद्यनूढायां कन्यायामूह्यतेऽनुजा ।
495 सा चाग्रेदिधिषूर्ज्ञेया पूर्वा च दिधिषूः
स्मृता ॥ इति ॥

तयोर्भर्ता। अथवा पतिशब्दयुक्तस्स
एव। यथाह प्रजापतिः —
भ्रातुर्मृतस्य भार्यायां योऽनुरज्येतकामतः।
धर्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः॥
तथापि जीवतो भ्रातुस्स चाग्रे दिधिषू
स्मृतः॥ इति व्याघ्रोक्तौ वा।
परपूर्वा पतिं धीरा वदन्ति दिधिषूपतिम्।
इष्टोऽग्रे दिधिषूर्विप्र सैव यस्य कुटुम्बिनी॥
स्त्रीग्रामयाजकः। याजकशब्दः प्रत्ये-
कमभिसंबध्यते। स्त्रीणां कामदेव
प्रजां स्मृति यो या जयति स स्त्रीया-
जकः। ग्रामयाजको बहुयाजकः। अ-
जपालोऽजरक्षणोपजीवकः॥
उत्सृष्टाग्निः शास्त्रेण विना श्रौतस्य
त्यागं करोति यः स उत्सृष्टाग्निः।
496 मद्यपो नालिकेरादेर्मद्यरक्षणोपजीवकः

सुराव्यतिरिक्तमद्योपभोक्ता। कुचरः कुत्सिताचारः। पुरा चार्यत्वादि देवता-भ्यर्चनया च न शीलत्वादिः। कूटसाक्षी प्रसिद्धः। प्रातिहारिक इन्द्रजालोपजीवकः। एतान्न भोजयेत्॥

पतितानां स्पर्शनप्रतिषेधादेव भोजनप्रतिषेधे सिद्धे कृतप्रायश्चित्तानामपि भोजनप्रतिषेधार्थ आरम्भः॥

॥ उपपतिर्यस्य च सः॥

उपपतिर्भार्याजारो यस्य च व्यभिचारिणी यस्य भार्या स इत्यर्थः। चशब्दादुपपतिश्च॥ एतौ न भोजयेत्॥

॥ कुण्डाशी सोमविक्रय्यगारदाही-गरदावकीर्णिगणप्रेष्यागम्या-गामिहिंस्रपरविवित्तिपरिवेत्तृ-पर्याहितपर्याधातृ त्यक्तात्मा-

497 दुर्बलकुनखिश्यावदन्तपौनर्भव-
तितवाजपराजप्रेक्ष्याप्रातिरूपिक-
शुद्रापतिनिराकृतिकिलासिकु-
सीदिवाणिकाशिल्पोपजीविज्या-
वादित्रतालनृत्तगीतवाद्यशीलान् ॥
कुण्डग्रहणं गोलकस्याप्युपलक्षणम् ।
तयोरन्नं योऽश्नाति स कुण्डाशी । प्रति-
षेधार्थतः कुण्डगोलकयोरपि प्रतिषेध
सिद्धः। तयोस्स्वरूपं स्मृत्यन्तरे ज्ञात-
व्यम् । यथाह मनुः —
परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ
पत्यौ जीवति कुण्डस्तु मृते भर्तरि गोलकः ।
इति । सोमविक्रयी लतासोमस्य वि-
क्रेता, तत्साध्यकर्मविक्रयी वा । अगा-
रदाही वेश्मोद्दीपकः । विषस्य दाता
498 गरदः । अवकीर्णी बुद्धिपूर्वं खण्डित-

ब्रह्मचर्ये ब्रह्मचारी यथाह मनुः —
कामतः रेतसस्सेकं व्रतस्थस्य द्विजन्मनः।
अतिक्रमं व्रतस्याहुर्धर्मज्ञा ब्रह्मवादिनः॥
इति। गणप्रेष्यो गणानां प्रेषणकृत्। अगम्यागामी कन्यादूषकः समानप्रवरस्त्रीगामी। एके सपिण्डयोनौ सगोत्रशिष्यभार्यासु स्नुषायां गवि च तल्पसम इति साम्योपदेशात् पतितग्रहणेन गृह्यत इति।

हिंसाः प्राणिनां वधरुचिः। परिवित्तिर्ज्येष्ठेऽकृतविवाहे कनीयान् यो विवाहं करोति स परिवित्तिः। ततस्स ज्येष्ठः परिवेत्ता पर्याहितः तस्मिन् कृताधाने कनीयानाधानं करोति स पर्याहितः ततस्स ज्येष्ठः पर्याधाता॥ ननु च परिवित्तिपरिवे-
499 तृशब्दौ क्रमेण पर्याहितपर्याधात्रोरपि

र्तते। स्मृत्यन्तरे तथा दृष्टत्वात्। यथाह

मनुः —

दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते।

परिवित्तिस्स विज्ञेयः परिवेत्ता तु पूर्वजः॥

इति। ततश्च पर्याहितपर्याधातोः पृथ-

गारम्भोऽनर्थक इति॥ अत्रोच्यते -

यश्च कन्यां ददाति। यश्च याजनं करोति

तयोरपि ग्रहणार्थमुभयोरुपादानम्।

यथाह मनुः —

परिवित्तिः परिवेत्ता यया च परिविद्यते।

सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः॥

इति। अस्यापवादो द्रष्टव्यः॥



यथाहोशना —

पितृव्यपुत्रान् सापत्नान् परनारीसुतांस्तथा।

500 दाराग्निहोत्रसंयोगे न दोषः परिवेदने॥

इति। तथा च वसिष्ठोऽपि —

उन्मत्तः किल्बिषी कुष्ठी पतितः क्लीब एव च।
राजयक्ष्मा मयावी च न न्याय्यः स्यात्प्रतीक्षितुम्॥ इति। तथा च शातातपे —
क्लीबे देशविनष्टे च पतिते प्रव्रजिते तथा।
योगशास्त्राभियुक्ते च न दोषः परिवेदने॥
इति। तथा च कण्वः —
व्यसनासक्तचित्तो वा नास्तिको वा भवेद्यदि।
कनीयसो वृत्तवतो न दोषः परिवेदने॥
इत्यादि। सक्तात्मा साहसिकः। शास्त्रपाणिरित्येके। दुर्बलः शीपिविष्टः। हीनप्रजनन इत्येके। खलतिरित्यन्ये। कुनखी अकारणेन विनष्टनखः। श्यावदन्तकः कृष्णदशनः रागेण विना। पौनर्भवः स्वैरिणीपुत्रः। कितवो द्यूतकरः शीलः तद्ग्रहणं मृन्मयैर्हस्त्यश्वादिभिर्व्यापारस्याप्युपलक्षणम्। अजप उपनीत-

१ शिल्पोपजीवी तक्षचित्रकमाद्युपजीवी

मात्रः अश्रोत्रियः। राजप्रेष्यः राज्ञः प्रेषणकृद्दूतादिप्रतिरूपकः। कूटतुलामानादिव्यावहारिकः येन केनचित्प्रकारेण वञ्चको वा शूद्रापतिस्सैव भार्या यस्य निराकृतिः। न क्वचिदाश्रमे व्यवस्थितः। किलासी = कुष्ठी भूमिहर्ता वा। कुसीदी = वार्धुषिकः। प्रतिषिद्धेन मार्गेण वणिक् सति सम्भवे वैश्यवृत्त्युपजीवी। तेषां सकाशे विद्याशिक्षकश्च। उपशब्दप्रयोगात्। ज्याशीलो धनुर्वेदोपजीवी। वादित्रशीलो वंशवीणाद्युपजीवी। तालशीलो भेर्यादिताडनोपजीवी। नृत्तशीलो नृत्तोपजीवी। गीतशीलो गीतेनजीवी

५०२ एतान्न भोजयेत्। एतस्मादेव प्रतिषेधादेतेषामकार्यकारित्वमपि सिद्धमपि अकृतस्तेयादि न कार्यम्॥

॥ पितृ चाकामेन॥ विभक्तान् ॥

ये च पितृ अनिच्छया विभक्ताः। चशब्दान्मातृ च तांश्च न भोजयेत् ॥

॥ शिष्यांश्चैके सगोत्रांश्च ॥

चशब्दाद्याज्यांश्च। द्वितीयाच्चशब्दासमानार्षेयांश्च, एके ग्रहणात् भोजनीया एवेति गौतमः। तत्र यदि गुणवन्तः तदा भोजयेत्॥ यदि गुणहीनाः तदा न भोजनीया इति द्रष्टव्यम्। तथा च वासिष्ठः - शिष्यानपि गुणवतो भोजयेदिति। तत्रापिशब्दात्सगोत्राणामपि ग्रहणम्॥

॥ भोजयेत् ऊर्ध्वं त्रिभ्यः॥

'अयुजो वा यथोत्साहं' इत्यनेनाविशेषेण प्राप्ते विशेषार्थमिदम् सत्युत्साहे त्रिभ्य ऊर्ध्वमयुजो भोजयेदिति॥

॥ गुणवन्तम् ॥

गुणवन्तमेकमपि भोजयेदिति एक-
वचनप्रयोगात्। तथाच वसिष्ठः—
5·3 अपि वा भोजयेदेकं ब्राह्मणं वेदपारगम्॥
श्रुतशीलवृत्तसंपन्नं अवलक्षणवर्जितम्॥
इति। बाहुल्यदोषात् दाभ्यामप्यनु-
ज्ञानार्थम्। तथाह मनुः—
एकैकमपि विद्वांसं दैवे पित्र्येऽपि भोजयेत्।
पुष्कलं फलमाप्नोति नामन्त्रज्ञान् बहूनपि।
इति॥

(तल्पग)
॥ सद्यः श्राद्धी शूद्रा तल्पग.....
स्तत्पुरीषे मासं नयति पितॄन्॥
अनेनैव भोक्तुर्दातुश्च ब्रह्मचर्यमुच्यते।
तथाच मनुः—
निमन्त्रितो द्विजः पित्र्ये नियमात्मा भवेत्सदा।
नव छन्दांस्यधीयीत यस्य श्राद्धं च

तद्भवेत् ॥ इति ॥ सद्य

सद्य इति क्रियाविशेषणम् । सद्य एव

नयतीति । शूद्राग्रहणं कालपरिमा-

504 णार्थम् । इतरा स्वल्पकालं तरं कालं इति

तत्वग्रहणं भार्यार्थं ततश्चान्यस्यां वि-

शिष्टतरो दोषः तस्याः पुरीषे मासं पितृ-

नाधिवास्य यावद्दिनस्तावता दोषेण सं-

बध्यत इत्यर्थः ॥ (मू) तस्मात्तदहर्ब्रह्मचारी

स्यात ॥ यस्मादयं दोषः तस्मात्तस्मिन्नह-

नि मैथुनवर्जकः स्याद्गतावधि हेतुव-

चनाच्च ॥ (मू)(ख) चण्डालपतिताबेक्षणे दुष्टम् ॥

श्वादिभिर्वीक्षितं अन्नं श्राद्धं वा दोषव-

द्भवति । अन्नपक्षे अभोज्यं, श्राद्धपक्षे

अकृतं भवतीत्यर्थः ॥

॥ तस्मात्तत्परिश्रिते दद्यात् ॥

यस्मादेवं तस्मादेव प्रच्छन्नदेशे दद्यात् ।

हेतुवचनं श्राद्धाकृत्यगापि परिश्रित एव भोक्तव्यम्। इति॥

505 ॥ तिलैर्वा विकिरेत्॥ श्रृते

तिलैर्वा सर्वतः प्रकिरेत्। अपरिश्रृते दोषशमनं भवति। स्मृत्यन्तरसामर्थ्यात् पितॄणां च तृप्तिर्भवति। यथाह भृगुः —
पानीयमपि यद्दत्तं तिलैर्मिश्रं द्विजस्य तु।
पितृभ्यः कामयुक्तं स्यात् पितृगुह्यमिदं तु तत्॥ ॥ पङ्क्तिपावनो वा शमयेत्॥
पङ्क्तिपावनो वक्ष्यमाणः अपरिश्रृत दोषं शमयेत्॥

॥ पङ्क्तिपावनाः षडङ्गवित् ज्येष्ठसामग स्त्रीणाचिकेत त्रिमधु त्रिसुपर्ण पञ्चाग्नि स्नातको मन्त्रब्राह्मणविद्धर्मज्ञो ब्रह्मदेयानुसन्तानः इति॥

एतेऽपि सति श्रोत्रियत्वेऽधिकगुणयो-
506 गात्पङ्क्तिं शोधयन्ति निर्दोषं कुर्वन्तीति
पङ्क्तिपावनाः। षडङ्गवित् षण्णामङ्गा-
नामन्यतमस्यार्थाभिज्ञः। तथा च पुराणे —
चतुर्दशानां विद्यानामेकस्याः पारगोऽपि यः।
आत्मकैवल्यविच्चैव सर्वे ते पङ्क्तिपावनाः॥
इति। ज्येष्ठसामगः ज्येष्ठसामच्छन्दो-
गानां सामविशेषः तदध्यायी ज्येष्ठ-
सामगः। त्रिणाचिकेतनामाऽध्वर्यूणामृ-
क्विशेषः। त्रिमधुः बह्वृचानां सूक्त-
विशेषः। त्रिसुपर्णो बह्वृचानां तैत्तरीया-
णां च पञ्चाग्निस्सभ्यावसथ्योभयानां
सह स्नातकः विद्यावृत्तस्नातकः। मन्त्र-
ब्राह्मणवित् विनाप्यङ्गविज्ञानेन धर्मज्ञो
507 धर्मशास्त्रज्ञः ब्रह्मदेयानुसन्तानो ब्राह्मविवा-
होढा सन्ततिः। इतिकरणं प्रकारवाची

यथाह वसिष्ठः —

त्रिणाचिकेतस्त्रिसुपर्णश्चतुर्मेधा वाजसनेयी षडङ्गविच्छन्दोगज्येष्ठसामगः मन्त्रब्राह्मणवित् यत्र धर्मानधीयते यस्य च दशपुरुषं मातृपितृवंशाः श्रोत्रियो विज्ञायते विद्वांसः स्नातकाश्चैते पङ्क्तिपावना भवन्तीति ॥

एवमादीनां स्मृत्यन्तरोक्तानामपि ग्रहणार्थम् ॥ [षष्ठ्यै]

॥ हविःषु चैवम् ॥

हविःषु अभ्युदयकर्मसु बहुवचनं न केवलं पित्र्याङ्गभूते दैव एव किंतर्हि सर्वदाभ्युदयेष्वपीति । चशब्दाद्दैव सिद्ध एवं शब्दः परिश्रितपङ्क्तिपावनार्थः

॥ दुर्बलादीन् श्राद्ध एवैके —

श्राद्ध एवैके ॥

508 दुर्बालादारभ्य येऽनुक्रान्तास्तान् श्रा-
द्ध एव न भोजयेत्। न तु दैवे एके
ग्रहणान्न तु गौतमः सम्भवासम्भवकृ-
तो विकल्पः॥— ३ॐ ॥

इति मस्करीये गौतमभाष्ये
पञ्चदशोऽध्यायः॥

509 सामान्योऽयं द्विजातिधर्म इ-
त्यत आह—

॥ श्रावणादि वार्षिकं प्रोष्ठपदीं
वोपाकृत्याधीयीत छन्दांसि ॥

श्रवणेन युक्ता पौर्णमासी श्रावणी। त-
द्धित विकल्पो द्रष्टव्यः। तदादि तत आ-
रभ्य वर्षासु भवं वार्षिकमेतदपि त-
त्संज्ञार्थं ततश्चा भितो वार्षिकमिति व्यव-

हारसिद्धिः। प्रोष्ठपदीं वा पौर्णिमासी-
मादौ कृत्वा उपाकृत्य उपाकरणं कृत्वाऽ
धीयीत। अध्ययनं चापूर्वाधिगमो गृ-
हीताभ्यासश्च छन्दांसि मन्त्रब्राह्मणम्।
एतदुक्तं भवति। श्रावण्यां प्रोष्ठपद्यां वो-
पाकृत्य तदादि वेदानां वर्षकालसम्ब-
न्धिनमध्ययनं कुर्वीत॥ इति॥

5 कियन्तं कालमधीयीतेत्यत आह—

510 ॥ अर्धपञ्चमान् मासान् पञ्च
दक्षिणायनं वा॥

उपाकरणोत्तरकालं विकल्पः। कृता-
र्थाकृतार्थापेक्षया विकल्पो द्रष्टव्यः
य अधीयानः।

॥ ब्रह्मचार्युत्सृष्टलोमा न मांसं
भुञ्जीत॥

ब्रह्मचारी मैथुनवर्जकः। उत्सृष्टलोमा।

अकृतश्मश्रुः। लोमग्रहणं नखादीनामपि उपलक्षणम्। न मांसं भक्षयेद्देवार्चनादीष्टमपि गृहस्थस्यायं नियमः ब्रह्मचारिणः प्राप्त्यभावात्। ब्रह्मचर्यरक्षणमृतुगमनादन्यत्र कुतः —

गृहस्थस्यर्तावेव गमनं ब्रह्मचर्यमुपदिशन्तीति स्मृतेः।

श्मश्रुरूप लोमशब्देन कृत्स्नरोमत्वं

5 ॥ परिगृह्यते। तथा न रूढश्मश्रुरकस्मादिति हनेनैव सिद्धत्वादनारम्भः प्राप्नोति। तस्मादारम्भसामर्थ्यात् अकृतत्वमेव गृह्यते॥

॥ द्वैमास्यो वायं नियमः॥

अयं ब्रह्मचर्यादिनियमो मासद्वयं वा। शक्त्यपेक्षया विकल्पः। नियमग्रहणमवश्यकर्तव्यतार्थम्। एवं च नियमाभावेऽप्य-

येनेप्रसङ्गनिवृत्तिर्द्रष्टव्या ॥

द्रावमधीयानः।

॥ नाधीयीत वायौ दिवा पांसुहरे ॥

यावद्दिवा पांसुसमूहनो वायुर्महाति ता-

वन्नाधीयीत। दिवा पांसुहर इत्येव सि-

द्धे वायुग्रहणं वासायामपि नाधीयीत

इत्येवमर्थम्॥ तथा चाहोशना —

512 वासा सपिशाचिका तस्मात्तस्यां नाधी-

यीतेति। दिवाग्रहणाद्रात्रौ न दोषः। यदि

रात्रावपीष्यते तदा दिवेत्यारम्भेणैव

सिध्यतीति ॥

॥ कर्णश्राविणि नक्तम् ॥

यदा वायू रात्रौ कर्णश्रावी भवति। श्रोत्रं

शब्देन पूरयाति, तदा नाधी~~यीत~~ यीत।

नक्तग्रहणाद्दिवा न दोषः॥

॥ वाणभेरीमृदङ्गगर्तार्तशब्देषु॥

वाणो वीणा बाणः शततन्तुर्भवतीति महाव्रते दर्शनात्। भेरीमृदङ्गौ प्रसिद्धौ। गर्तः शब्दयष्टिः। आर्तशब्दो रुदितध्वनिः। आक्रोशादिर्वा शब्दः प्रत्येकमभिसंबध्यते। यावदेतेषां ध्वनिस्तावदनध्यायः॥

॥ श्वसृगालगर्दभसंह्रादे ॥

ह्रादि(द) शब्दः प्रत्येकमभिसंबध्यते। श्वादीनां समुदितानां शब्दे, श्वसङ्घातसंह्रादे सृगालसङ्घातसंह्रादे गर्दभसङ्घातसंह्रादे। समिषारम्भात समिहैकीभाव इति भाष्यकारेणोक्तत्वात् कुण्डापूपिकया त्रयाणां समुदितानामपि द्रष्ट-

5।3 व्यम्। एवं चैकस्य न दोषः॥

॥ लोहितेन्द्रधनुर्नी(र्नी) हारेषु ॥

लोहितेन्द्रधनुषि नीहारे च नाधीयीत। लोहितमाकाशस्य लोहितवर्णत्वं त—

स्मिन्दृष्टे नाधीयीत । तथा इन्द्रधनुषि ।
तत्प्रसिद्धम् । नीहारो हिमः । यावदेषां
दर्शनं तावन्नाधीयीत ॥
॥ अभ्रदर्शने चापर्तौ ॥
अनृतौ सोदकमेघदर्शने यस्य कस्यचि-
च्चकारादिद्युद्दर्शने च यावद्दर्शनमार्गं
तावन्नाधीयीत । तथाच कवर्षः विद्युद्दर्श-
ने नाधीयीतेति ॥
॥ मूत्रित उच्चारितः ॥
यावन्मूत्रोच्चारणादुत्पद्यते तावदनुत्स-
514 र्गेऽप्यनध्यायः । कुतः । उत्सर्गे मासम-
प्यशुचैरिति वक्ष्यमाणत्वात् ॥
॥ निशासन्ध्योदकेषु ॥
निशाशब्देनार्धरात्र उच्यते । न तु रात्रि-
मात्रम् । विद्युति नक्तं चेत्यादिविशेषा-
रम्भात् । तेनार्धरात्रे सन्ध्यायां च उदके

चावस्थितो नाधीयीत ॥

॥ वर्षति च ॥

यावद्वर्षकर्म तावन्नाधीयीत । चशब्दादु-
नृतौ च वर्षत्यहोरात्रं च ॥

॥ एके वलिकसन्तानम् ॥

एके विच्छिन्नधारे वर्षे नाधीयीतेतीच्छ-
न्ति । अधीयीतेति गौतमः कृतार्थाकृता-
र्थापेक्षया विकल्पः ।

॥ आचार्यपरिवेषणे ॥

5।5 आचार्यौ सुरासुरयोः शुक्रबृहस्पती । त-
यो: परिवेषणे नाधीयीत । इति । आचा-
र्यपरिवेषणमुपाध्यायस्यान्नोपहरणमि-
त्येके ॥

॥ ज्योतिषो श्च ॥

आदित्यचन्द्रमसोः । द्विवचननिर्देशात्
परिवेषणे नाधीयीत । चकाराद्वाचार्ये

व्यसनं गते ॥

॥ भीतो यानस्थः शयानः प्रौढपादः ॥

भीतो वर्तमानभयः। यानस्थो अश्वाद्यधि-
रूढः। शयानः शय्यामासेवमानः।
प्रौढपादः पादे एकपादारूढः। पीठिका-
द्यारोपितचरणो वा। वृक्षारूढस्यापि
ग्रहणार्थो विसमासः॥

॥ श्मशानग्रामान्तमहापथा-
शौचेषु ॥

श्मशानं = शवदहनस्थानं तत्समीपे
ग्रामान्तो ग्रामसीमा ग्रामसमीपतः
महापथो राजमार्गः। आशौच मशुचि-
स्थानं एवंविध स्थितो नाधीयीत ॥
जननमरणनिमित्तमिसेके ॥ तदुक्तम् ॥
5 16 पूर्वमुक्तत्वात्। सद्यः शौचपक्षेऽपि अ-
ध्ययनाभावज्ञापनार्थं इत्यन्ये ॥

शौचपक्षे दानप्रतिग्रहभोजनान्येव कर्त-
व्यानि । नत्वध्ययनम् ॥

दशरात्रादूर्ध्वमित्यपरे । मातापित्रो-
स्तन्मातुर्वेत्यस्मिन् पक्षेऽपि सपिण्डा-
नामप्यध्ययनाभावज्ञापनार्थं इति
केषांचिद्दर्शनम् ॥

आशौचवतां समीपे नाध्येतव्यं इत्येव-
मर्थ उपदेशः ॥ गङ्गायां घोष इत्यादिव-
दिति श्मशानग्रहणं च मृतपूर्वगत्या प्र-
तिषेधार्थं इदानींतनस्य श्मशानाध्ययने
चैवं इत्यनेनोक्तत्वात् ॥

ततश्च श्रवणपरं परायां यत्स्थानं श्मशा-
नमिति श्रूयते । तत्र नाध्येतव्यमिति ॥

॥ पूतिगन्धान्तः शवदिवाकी-
र्त्यशूद्रसंनिधाने ॥ १६

517 पूतिगन्धे दुर्गन्धे अन्तः शवे ग्रामे अनिर्हृते

दिवाकीर्त्यो नापितः अशूद्रोऽपि। न तु
चण्डालः। तस्य शूद्रप्रतिषेधादेवार्थतः
प्रतिषेधे सिद्धे। तस्य समीपे न पठेत्।
दिवाकीर्त्यग्रहणेन वा तत्कर्म गृह्यते ॥
ततः कृतश्मश्रुरकृतशौचो नाधीयीत इति
केचिद्दिवाकीर्त्यशब्देन चण्डालमेवामनन्ति। अन्तः शब्दमप्यविकृत्य व्याचक्षते।
अन्तश्चण्डाली ग्राम इति।
तथा चापस्तम्बः — अन्तः शवमन्तश्चण्डालमनभि निर्हृतप्रेतानां तु सीम्न्यनध्याय इति शूद्रस्य च संनिधाने
बहिरस्यापि कुतः —
अथ हास्य वेदमुपशृण्वत इत्यनेनैव
सिद्धे इह पुनरारम्भात् ॥

518 ॥ शुक्ते चोद्गारे ॥

आम्ल उद्गारे नाधीयीत। चकाराद्न्य-

स्मिन् ज्वरादौ ॥

॥ ऋग्यजुषां च सामशब्दो यावत् ॥

ऋग्यजुषां चानध्यायः यावत्सामध्वनिः श्रूयते। शाखान्तरे साम्नोऽप्यनध्यायार्थश्चकारः। तथा च स्मृत्यन्तरशाखान्तरे च –

साम्नामनध्याय इति द्विवचने वक्तव्ये ऋग्यजुषामिति बहुवचनं तदङ्गभूतानां स्रुगादीनामप्युपसंग्रहार्थम्। ध्वनिमात्रश्रवणेऽपि नाध्येतव्यमिति। यावद्ग्रहणं अन्यथा ऋग्यजुषां च सामशब्द इत्येवावक्ष्यदिति ॥

॥ आकालिकानि घातभूमिकम्पराहुदर्शनोल्काः ॥

५१७ यस्मिन् काले जाते भवन्ति तस्मात्कालाद्द्वितीयादनध्यायकारिण्य इति आका-

लिका: निर्घातो ऽशनिपात:। भूमिकम्पो
भूमिचलनं। राहुदर्शनं ग्रहणम्।
उल्का उल्कापात: त्र्यहं नकीर्तयेत्।
ब्रह्मराज्ञो राहोश्च सूतक इत्यादिभिर-
धि विकैकाहः प्रतिपादकैः स्मृत्यन्तरे कृता-
र्था कृतार्थापेक्षया विकल्पो द्रष्टव्य:।
॥ स्तनयित्नुवर्षविद्युतश्च
प्रादुष्कृताग्निषु ॥
प्रु अग्नि प्रकाशितेष्वाग्निहोत्रकाले सन्ध्यायां-
मित्यर्थ:। एते स्तनयित्नुप्रभृतयो
भवन्त आकालिका भवन्ति। समुच्चया-
र्थश्चकार:। एकैकस्य द्वयोर्वा माभूदिति॥
520 ॥ अहहृता ॥(अह ऋतौ)
ऋतौ वर्षासु सन्ध्यायामेते भवन्तो
नाकालिका अहर्मात्रानध्यायकारिण:।
अह: शब्देन रात्रिरप्यभिधीयते।

अहश्च कृष्णमहरर्जुनं चेत्यादि श्रुतिद-
र्शनात्। तत्रश्च प्रातस्सन्ध्यायामेते भ-
वन्तो नाकालिकाः अहर्भागानध्यायकारि-
ण, उपलभ्यमाने त्वहरनध्यायकालस्सा-
यं सन्ध्यायां रात्रिरिति द्रष्टव्यम्।
॥ विद्युति नक्तं चापररात्रात्॥
विद्युति सन्ध्यायामृतौ दृश्यमानायां
केवलायां त्रिभागादर्वाग्रात्रिरनध्या-
यश्चकारात् प्रातरुपलभ्यमानायां अह-
श्च सर्वमनध्यायः न रात्रिर्वा त्रिभा-
५२। गादर्वाक्ष्विद्युति प्रातरहरनध्याय
इति जाबालिगृह्यदर्शनात्॥
॥ त्रिभागादिति प्रवृत्तौ सर्वम्॥
या संध्यायामुपलभ्यते तस्या अहः
पूर्वभागमतिक्रम्य तत आरभ्य प्रवृ-
त्तिरस्ति चेत् सर्वं नक्तमनध्यायः॥

॥ उल्का विद्युत्समे ह्येकेषाम् ॥

उल्का च विद्युत्समा तुल्या यथा विद्युत्स्वनध्यायस्तथोल्कापातेऽपि द्रष्टव्य इत्येके मन्यन्ते। न तु गौतमः। कृतार्थाकृतार्थापेक्षया विकल्पः॥

॥ स्तनयित्नुरपराह्णे ॥

स्तनयित्नुरपराह्णे भवद्विद्युत्समो भवति। नक्तमपररात्राद् अनध्यायं करोति इत्यर्थः॥

॥ अपि प्रदोषे ॥

प्रथमेऽपि रात्रिभागे प्रवृत्तं पूर्ववद्-

522 पररात्राद् अनध्यायः करोति॥

॥ सर्वं नक्तमर्धरात्रात् ॥

प्रथमाद्रात्रिभागादारभ्य अर्धरात्रा-त्प्रवृत्तौ सर्वं नक्तमनध्यायः॥

॥ अहश्चेत्सज्योति:॥

प्रागपराह्णात् स्तनयित्नुर्भवति । तत-
स्सज्योतिरनध्यायः । दिवसमेवेत्यर्थः ॥

॥ विषयस्थे च राज्ञि प्रेते ॥

विषयस्थे स्वराष्ट्रस्थ इत्यर्थः । राजनि
प्रेते प्रमीते आकालिकानुकर्षणार्थश्च-
कारः । ततश्चाकालिकोऽनध्यायः ॥

॥ विप्रोष्य चान्योऽन्येन सह ॥

यदा शिष्याचार्यौ सहाध्यायिनौ वा परस्प-
रं विद्रुताः प्रवसेयुः । तदा चाकालिकोऽ-
नध्यायः । चशब्दात्समेत्य च ॥

॥ संकुलोपाहितवेदसमाप्ति-
च्छर्दिश्राद्धमनुष्ययज्ञ-
भोजनेष्वहोरात्रम् ॥

संकुलः = केनचित्कारणेन ग्रामाद्युपद्र-
वः । उपाहितोऽग्निसंभ्रमः ; अग्निदाहः
स्यावृत्त
523 वेदसमाप्तिर्वेदस्या प्रकरणसमाप्तिः ।

ग्रामो दग्ध इत्यादिवत् शास्त्रासमाप्तौ वा।
छर्दनं प्रसिद्धं, श्राद्धं एकोद्दिष्टादि। तत्र
भोक्तुः मनुष्यस्य ज्ञो मित्रमेलकभोजने अ-
नेकब्राह्मणभोजने एतेष्वहोरात्रम-
नध्यायः॥

॥ अमावास्यायां च ॥

अमावास्यायां चाहोरात्रमनध्यायः। च-
शब्दात्पौर्णमास्यां च॥

॥ द्व्यहं वा ॥

पूर्वोक्तमहोरात्रं वानध्यायः। उभयत्र
चतुर्दश्यामिति द्रष्टव्यम्। तत्र वेदस्य
द्व्यहमङ्गादेरहोरात्रमेवेति व्यवस्थि-
तविकल्पो द्रष्टव्यः॥

तथा चाहोशना —

पर्वणीतिहासवर्जितानां सर्वासां वि-
524 द्यानामनध्यायः। इति॥

॥ कार्तिकी फाल्गुन्याषाढी पौर्णमासी ॥

चशब्दात्पूर्वमनध्यायप्रापणादिह पौर्णमासीशब्देन प्रतिपदो गृह्यंते। एता अनध्यायाः॥ -एवं चान्यासु प्रतिपत्सु न दोषः। तत्र प्रतिपत्सु न चिन्तयेदिति शौनकवचनेन कृतार्थाकृतार्थापेक्षया विकल्पो द्रष्टव्यः।

॥ तिस्रो ऽष्टकास्त्रिरात्रम् ॥

तिस्र ऊर्ध्वमाग्रहायण्या अपरपक्षेषु अष्टका त्रिरात्रमनध्यायकारिण्यः। अतस्तासु त्रिरात्रमनध्यायो भवति सप्तम्यामष्टम्यां नवम्यामिति॥

॥ अन्यामेके ॥

अन्त्यामष्टकामेवानध्यायमिच्छन्त्येके।

525 पूर्ववद्विकल्पः॥

॥ अभितो वार्षिकम् ॥

अभितः आद्यावन्ते चेत्यर्थः। वर्षकाले भवं वार्षिकमिति। तत्कालसंबन्धध्ययनमुच्यते। यत्कृत्वा तत्प्रारभते आद्यावन्ते च यत्क्रियते अभितः शब्देन तद्द्वयं लक्ष्यते। त्रिरात्रमनध्याय इत्यनुवर्तते। उपाकर्मणि चोत्सर्गे त्रिरात्रमनध्यायः इत्यर्थः। तथा चाहोशना — उपाकर्मणि चोत्सर्गे त्र्यहमनध्याय, इति॥

॥ सर्वे वर्षविद्युत्स्तनयित्नुसंनिपाते ॥

सर्वे आचार्याः वर्षादीनां संनिपाते त्रिरात्रमनध्यायमिच्छन्ति॥

गौतमस्तु स्तनयित्नुवर्षविद्युतः प्रादुष्कृताग्निषु आकालिकं तत्र पूर्ववद्विकल्पः॥

 ॥ प्रस्यन्दिनि ॥

विद्युत्स्तनयित्नुसंनिपाते सर्वं त्रिरा-
त्रमिति वर्तते। यस्मिन्नहन्यविरलशो
वर्षति देवस्तस्मिन्नेवाहनि विद्युदादी-
नां संनिपातश्च तत्रापि त्रिरात्रमिच्छन्ति॥

॥ ऊर्ध्वं भोजनादुत्सवे ॥

सर्वाभ्युदये भोजनादूर्ध्वं तदहोरात्रमन-
ध्यायः। उपनयनाद्यानुत्सवे भुक्त्वा
तदुत्तरकालेऽनध्याय इत्यर्थः।

॥ प्राधीतस्य च ॥

अध्येतुः प्रथमं प्रवृत्तस्यानुत्सवेऽपि
भोजनोत्तरकालमनध्यायः। चकाराद्वे-
दान्ताध्येतुः भोजनोत्तरकालमनध्यायः॥

॥ निशायां चतुर्मुहूर्तं ॥

५२२ रात्रौ प्रथमांश्चतुरो मुहूर्तान्नाधीयीत।
स्मृत्यन्तरसामर्थ्यात् त्रयोदश्यां - यथाहो-
रात्र —— त्रयोदश्यां निशायां प्रथ-

मांश्चतुरो मुहूर्तान्नाधीयीत। इति॥

॥ नित्यमेके नगरे॥

ग्रामे सर्वदैवानध्यायमिच्छन्ति न तु गौतमः। ग्रामनिवासिनां सर्वदैवानध्यायप्रसङ्गात् तत्र शूद्रादिभूयिष्ठेऽनध्यायः। द्विजातिबहुलेऽध्येतव्यमिति द्रष्टव्यम्॥

॥ मानसमप्यशुचिः॥

अप्रयतो मनसाऽप्यध्ययनं न कुर्यात्। एवं चान्येष्वनध्यायेषु मनसाध्ययनं न प्रतिषिध्यते। नैत्यार्थं वा मानसग्रहणं अशुचिस्सन्नैत्यकमपि नाधीयीतेति॥

528 एवं च नैत्यकेऽन्येऽनध्याया न सन्तीति द्रष्टव्यम्। तथा च मनुः—

नैत्यके नास्त्यनध्यायो होममन्त्रेषु चैव हि॥

इति॥

॥ श्राद्धिनामाकालिकम् ॥

1 ॥ दातॄणां भोक्तॄणाम् ॥

सङ्ख्लोपाय इत्यत्रोक्तत्वात् बहुवचनं
सर्वश्राद्धवचनार्थम्। एकोद्दिष्टदातॄणा-
मेव माभूदिति ॥

॥ अकृतान्नश्राद्धिकसंयोगे च ॥

यदकृतान्नं पितृनुद्दिश्य दीयते भोजनासं-
भवे तदकृतान्नश्राद्धिकम्। तत्संयोगे दातृ-
प्रतिग्रहीत्रोः उभयोस्संयोगवचनादाका-
लिकोऽनध्यायः। चकारादन्यत्रापि पित्र-
र्थे। यथाह मनुः—

प्राणि वा यदि वाप्राणि यत्किञ्चिच्छ्राद्धिकं भवेत्।
52 तदारभ्याप्यनध्यायः पाण्यास्यो हि
द्विज स्मृतः ॥

आमश्राद्धस्य चैतदेव लिङ्गम् ॥

॥ प्रतिविद्यं च यां स्मरन्ति ॥

प्रतिवेदं प्रतिशास्त्रं च यानमध्यायात्।
गृह्यकारा स्मरन्ति चकाराद्धर्मान्तरे-
ष्वधीनाधीयीत इति संबन्धः॥ ॐ॥

इति मस्करीये गौतम-
भाष्ये षोडशोऽध्यायः॥

॥ ॐ ॥

मानसमप्यशुचि इत्यभिहितमात-
दशुचित्वमाहारजमपि भवतीति भो-
ज्याभोज्यविवक्षयाऽऽह —
॥ प्रशस्तानां स्वकर्मसु द्विजा-
तीनां ब्राह्मणो भुञ्जीत ॥
५३० प्रकर्षेण स्तुतानां स्वकर्मसु नक्षत्रिया-
दिकर्मसु अर्थकामपरित्यागेन मुख्यकर्मा-
नुष्ठानरता इत्यर्थः। तेषां द्विजातीनामुप-
नीतानां भोजनस्यार्थ्यप्राप्तत्वात् परिसं-

रण्यार्थमिदं वचनम्। ब्राह्मणग्रहणं द्वि-
जातिप्रदर्शनार्थम्। क्षत्रियादीनां अप्रश-
स्ताभ्यनुज्ञानार्थं इत्येके। भुञ्जीत भोजनं
कुर्यात्। प्रशस्तानां स्वकर्मस्विति उक्ते आ-
होपरूढिकयापि प्रशस्तता भवतीति
स्वग्रहणम्। प्रशस्तानां स्व इत्येव सिद्धे
कर्मग्रहणं काम्यनिवृत्त्यर्थम्। स्वकर्म-
स्विति बहुवचनं ज्ञानकर्मसमुच्चयका-
रिणां प्राधान्यज्ञापनार्थम्। किञ्च—

॥ प्रतिगृह्णीयाच्च ॥

एषां धनं एतानध्यापयेत्। याजयेच्चेति च-
कारः। एवमपि ॥

५३। । एधोदकयवसमूलफलमध्वभया-
भ्युद्यतशय्यासनावसथयानप-
योदधिधानाशफरीप्रियङ्गुस्र-
ङ्मार्गशाकान्यप्रणोद्यानि सर्वेषाम् ॥

एधः काष्ठः। उदकं कूपादिस्थमपि। यव-
सं तृणादि। मूलफले प्रसिद्धे। मधु मा-
क्षिकं। अभयं परित्राणं। शय्यासनानि
प्रसिद्धानि। आवसथं प्रतिश्रयम्। धा-
नादीनि प्रसिद्धानि। शफरी मत्स्यवि-
शेषः। धान्यविशेषः। प्रियङ्गुः स्रग्ग्रथि-
तानि कुसुमानि। मार्गं मृगमांसं। शाकं
प्रसिद्धम्। अप्रणोद्यानि अप्रत्याख्येया-
नि अयाचितानि अप्रणोद्यग्रहणात्।
अस्मिन् सूत्रेऽभ्युद्यतशब्देन प्रति-
गृहीतसकाशं यदानीतं तदुच्यते।
तत्र जातिविशेषो नास्ति। यथाह मनुः—
532 उद्यतामाहृतां भिक्षां पुरस्तादप्रचोदिताम्।
भोज्यां प्रजापतिर्मेने अपि दुष्कृतकारिणः॥
अस्यापवादः—
श्रद्दधानस्य भोक्तव्यं चोरस्यापि विशेषतः।

न त्वेवं बहुयाज्यस्य यश्चोपनयते बहून्॥
तथाच पराशरः —
चिकित्सकस्य मृगयोः शल्यहन्तुश्च पापिनः।
षण्डस्य कुलटायाश्च उद्यतापि न गृह्यते॥
तत्रापि भोज्यद्रव्यमेव प्रतिगृह्णीयात्।
"भोज्यां प्रजापतिर्मेने" इति लिङ्गात्। एवं
चाभ्युद्यतमप्यभोज्यं न प्रतिग्राह्यं अन्न-
णोद्यवचनात्॥
प्रणोदने दोषः। तथाच वसिष्ठः —
नाश्नन्ति पितरस्तस्य दशवर्षाणि पञ्च च।
न च हव्यं वहत्यग्निर्यस्तामवमन्यते॥
इति। अप्रशस्तेभ्योऽपि द्विजातिभ्यः
पृथग्ग्रहणात्। सर्वग्रहणात् शूद्रादपि।
533. सर्वेभ्य इति वक्तव्ये सर्वेषामित्युपा-
दानं आत्मसंबन्धज्ञापनार्थम्। एवं च
परकीयं मुषित्वा यो ददाति तस्य अ-

हणे न दोषः॥

॥ पितृदेवगुरुभृत्यभरणे चान्यत् ॥

भरणवचनमवश्यकर्मार्थम्। पितृभरण-
मेकोद्दिष्टौन्यद्धिच्छेदेन श्राद्धकरणम्।
देवभरणं सायं प्रातराग्निहोत्रहोमादि।
गुरवः पित्रादयः। भृत्याः पुत्रदारादयः।
तेषां भरणं भक्ताच्छादनादीनां प्रदानम्।
एतेषु निमित्तेषु अन्यदुत्पाणोद्यम्। चशब्दा-
द्दादेधोदकादि च भरण इत्युक्तत्वात् न
स्वयं ततो गृहीत्वा पुष्टो भवेत्। केचि-
च्चकारादातिथ्यार्थमाहुः॥ तथाच वसिष्ठः—
गुर्वर्थं दारमुज्जिहीर्षणं देवतातिथीन्।
535 सर्वतः प्रतिगृह्णीयात् न तु तृप्येत्स्वयं ततः॥
इति। आपदि तु याजनाध्यापनप्रतिग्रहा-
स्सर्वेषामिसनेन याचित्वा प्रतिग्रहण-
मुक्तम्। इह तु लभ्यमानस्याप्रणोदः।

यथा

एवं चापद्यचिताल्लाभ एवं याचिता प्र-
तिग्रहणमिति द्रष्टव्यम् ॥
आपद्विषयत्वादनापदि न ग्राह्यमिति
द्रष्टव्यम् ॥
॥ वृत्तिश्चेन्नान्तरेण शूद्रात् ॥
अग्राह्यमिति वर्तते । नञ् पूर्वेण संब-
न्धः । न प्रवृत्तिश्चेदिति जीवनं न शूद्र-
प्रतिग्रहमन्तरेण निर्वर्तते शूद्रात्प्रति-
गृह्णीयात् । न तु याजनभोजनप्रवचनादी-
नि न कुर्यात् । तथा च मनुः —
नाद्याच्छूद्रस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः ॥
इत्यादि याजने तु वक्ष्यति । शूद्रयाजकं
535 शूद्रार्थं याजकमित्यादि । तथाध्यापने
तु शूद्रशिष्यो गुरुश्चेत्यादि अस्यापि
वादः ॥
॥ पशुपालः क्षेत्रकर्षकः कुलसङ्गतः

कारयिता पितृपरिचारका
भोज्यान्नाः ॥

तथाच क्षेत्रकर्षकश्च। तथाहोशना—
स्वगोपो भोज्यान्नः स्वक्षेत्रकर्षकश्चेत्यादि
कुलसङ्गतः पारम्पर्येण मित्ररूपेण सं-
गतः। कारयिता नापितः। परिचारको
दासः। एकस्माल्लिङ्गान्नापितस्य शूद्र-
त्वमध्यवसीयते। तथाच मनुः—
क्षेत्रकः कुलमित्रश्च गोपालो दासनापितौ।
एते शूद्रेषु भोज्यान्नाः ॥
इत्यादिप्रकरणाद्यदि शूद्रान्नभोजनम-
536 न्तरेण प्राणधारणं न स्यात् ॥ तदा
एतेषामन्नं मदनीयं कुतः। कुलसङ्गतका-
रयितृपरिचारकाणां भोज्यमिति वक्त-
व्ये भोज्यान्ना इति लिङ्गात् तत्भो-
ज्यमिति द्रष्टव्यम् ॥

॥ वाणिज्यवाऽशिल्पी ॥

भोज्यान्न इत्यनुषङ्गः। वाणिज्योपजीवी च शूद्रो भोज्यान्नः। स चेदशिल्पी। कुम्भकारादिको न भवति। चशब्दादशूद्रोऽपि शिल्पी अभोज्यान्नः॥

अनेनैव प्रसङ्गेनान्यद्द्रव्यभोज्यमाह —

॥ नित्यमभोज्यं केशकीटावपन्नम् ॥

यत्राहरहरनाथादीनां यद्दीयते नित्यं तन्न भोक्तव्यम्। नित्यं वा सर्वदा परगृहे नापद्यभोक्तव्यम्। यथाह मनुः —

उपासते गृहस्था ये परपाकमबुद्धयः।

५३० तेन ते प्रेत्य पशुतां व्रजन्त्यन्नाद्यदायिनाम्॥

इत्यादि। केशकीटावपन्नं, केशग्रहणं सर्वगात्रलोमोपसङ्ग्रहणार्थम्। कीटग्रहणमशुचिप्राणिदर्शनार्थम्। अवपन्नं पचनकाल एव संबद्धमित्यर्थः। एवं च ब्रुवन्

पश्चनोत्तरकालसंबन्धस्यापि प्रायश्चि-
त्तं भोक्तव्यमिति ज्ञापयति। तथाच
वसिष्ठः — कामं तु केशकीटानुवृत्ता-
न्निः प्रोक्ष्य भस्मनाऽवकीर्य वाचा च
प्रशस्तं भुञ्जीतेति। कालस्य पचन-
कालसंबन्धस्यापि प्रायश्चित्तं द्रष्ट-
व्यम्। यथाह मनुः —
पक्षिजग्धं गवा घ्रातमवधूतमवक्षुतम्।
दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति॥
इति। अत्र पक्षिग्रहणं काकादन्यत्र द्रष्ट-
व्यम्। तस्य प्रायश्चित्तान्तरदर्शनात्।
यथाह पराशरः —
शृतं द्रोणाधिकं चान्नं काकैरुपघातितम्।
न त्याज्यं तस्य शुद्ध्यर्थं ब्राह्मणेभ्यो निवेदयेत्॥
534 गायत्र्याष्टसहस्रेण मन्त्रपूतेन वारिणा।
भोज्यं तत्प्रोक्षितं विप्रैः पर्यग्निकृतमेव च॥

इति। बहुत्वमपि देशकालाद्यपेक्षया द्र-
व्यम्। यथाह व्याघ्रः —

देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम्।
उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत्॥

इति॥

॥ रजस्वलाकृष्णशकुनिपादोपहतम्॥

अभोज्यमिति सर्वत्रानुवर्तते। एवं रजस्व-
लाग्रहणं सर्वाशुचिप्रदर्शनार्थम्। कृ-
ष्णशकुनिः काकः तद्ग्रहणमशुचिपक्षि-
प्रदर्शनार्थम्। पादग्रहणमप्यशुचिश-
रीरावयवोपसंग्रहार्थम्। एतैरुपहतं =
स्पृष्टम्॥

॥ भ्रूणघ्नावेक्षितं गवोपघ्रातं
भावदुष्टम्॥

531 भ्रूणहा = ब्रह्महा। तथा च वासिष्ठः — ब्राह्मणं
हत्वा ब्रह्महा भवतीति तद्ग्रहणं श्वचण्डाल-

पतितानामप्युपलक्षणम्। श्वचण्डाल-
पतितापेक्षणे दुष्टमिति सहोपदेशात्।
ननु च यद्येवं सहोपदिष्टानामपि
ग्रहणं स्यात्, तदा पतितचण्डाल इत्य-
स्मिन् सूत्रे सहनिर्देशात् श्वचण्डाल
इत्यस्मिन्सूत्रे चण्डालपतितयोरन्यतरो-
पदेशेनान्यतरस्यापि लक्षणया सिद्ध-
त्वादुभयोरुपादानमनर्थकम्।। इति।
अत्रोच्यते। नियमार्थ आरम्भः।
अवेक्षणे त्रयाणामेव प्रतिषेधः। न पतित-
सूत्रोपात्तानां सूतकादीनामपीति। तस्मा-
दिह भ्रूणहा ग्रहणेन श्वादीनामपि ग्रहणं
युक्तमित्युक्तमेव। एवं सति विरोधाभावात्
रजस्वलाकृष्णशकुनि रित्यस्मिन्सूत्रे रज-
540 स्वलाग्रहणेन एकसूत्रोपात्तानां पतिता-
दीनामपि ग्रहणम्। ततश्च रजस्वलास्पृ-

ष्टमेव नावेक्षितं, भ्रूणहादिभिरवेक्षितं स्पृष्टं चेति दुष्टान्यम्। गवा च सामीप्ये-नाघ्रातं भावदुष्टं भोजयितापङ्क्त्यानेन दत्तं भोक्तुर्मनसोऽतुष्टिकरं वा ॥

॥ शुक्तं केवलमदधि ॥

यदाम्लरसं भवति तच्छुक्तं, न तु स्वभावत एवाम्लं मद्ध्वीत्यनेनापवाददर्शनात् केवलं द्रव्यान्तरासंस्पृष्टं काञ्चिकादिवदुत्तदभोज्यमदधि केवलमपि द्रव्यान्तरेण तक्रादिना संस्पृष्टमपि ॥

॥ पुनस्सिद्धम् ॥

यत्पूर्वपाकतुल्यतामापाद्यते न तु शीतलत्वादपक्वत्वाद्वा पुनर्ग्रहणात् ॥

॥ पर्युषितमशाकभक्ष्यस्नेह-
मांसमधूनि ॥

५४। पर्युषितं रात्र्यन्तरितं शाकादिवर्जं पर्यु-

षितमपि शाकादि भोज्यं शाकमस्नेह-
संयुक्तमपि। भक्षाः पिष्टादयः। स्नेहं
घृतादिसंस्पृष्टमपि द्रव्यं, स्मृत्यन्तरद-
र्शनात्। यथाह मनुः —
यत्किञ्चित्स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितम्।
तत्पर्युषितमप्याद्यः हविःशेषं च यद्भवेत्॥
इति। मांसं चास्नेहसंयुक्तमपि स्नेहग्र-
हणेनैव सिद्धे मधुनः पृथग्ग्रहणं अप-
र्युषितस्यापि मधुनः स्त्रियः प्रतिषेधा-
र्थम्। तथाच तलवकाराणामुपनिषद्भवे-
त् तस्मादुत स्त्रियो मधुनाश्नन्तीति संस-
र्गदुष्टं कालदुष्टमप्यभोज्यमुक्त्वा सांप्रत-
माश्रयदुष्टमाह —
॥ उत्सृष्टपुंश्चल्यभिशस्तानपदे-
श्यदाण्डिकतक्षकदर्यबन्धनिक-
चिकित्सकमृगयध्वानिषुचार्युच्छ-

ष्ट भोज्यगणविद्विषाणा नाम ॥

उत्सृष्टमस्वामिकम् । पुंश्चली व्यभिचारि-
णी स्त्री । अनेनैव गणिकायाश्चार्थः सि-
542 द्धः । तथाच वसिष्ठः - गणान्नं गणिका-
न्नं चेति । अभिशस्तो दोषेण विख्यातः ।
अनपदेश्यस्त्रीलिङ्गेन पुंलिङ्गेन वा
अनिर्देश्यः तृतीया प्रकृतिरित्यर्थः । द-
ण्डिको राज्ञा निग्रहे नियुक्तः । तक्षा रथ-
कारः । कदर्योऽसभ्यभाषणरतः । नाश्ली-
लं कीर्तयेद्य यश्लीलं कीर्तयेत् । तं कदर्य-
माहुरिति ब्राह्मणदर्शनात् । बन्धनिको
गुप्तिपालः । चिकित्सको वैद्यः । ब्राह्मणः
तस्माद्ब्राह्मणेन भेषजम् । अकार्यमिति ।
तैत्तरीयब्राह्मणदर्शनात् । तथाच वसिष्ठः -
विना नृब्राह्मणो भवति भवनवणिक्कुशीलवः ।
न शूद्रप्रेषणं कुर्वन् न स्तेनो न चिकित्सकः ॥

इति। तेनाजीवित इत्येके। शल्यहर्तेत्यपरे।
543 चिकित्सकस्य मृगयोः शल्यहर्तुश्च पाशिनः।
इति दर्शनात्। मृगयुर्लुब्धकः। स चेद्-
निष्टचारी वागुरिकः। उत्सृष्टभोजी उत्सृ-
ष्टभोजनः। गणो जनसमुदायः। विद्विष-
णः शत्रवः। एषामन्नमभोज्यम्। प्रशस्ता-
नां भोजनोपदेशात्। आपद्यप्येषामन्नम-
भोज्यम्॥

॥ अपङ्क्त्यानां प्राग्दुर्बलात्॥

ये चापङ्क्त्याः प्रागुपदिष्टा स्तेनादयः
हस्त्यात्मपर्यन्ता स्तेषामकृतप्रायश्चित्ता-
नामन्नमभोज्यम्। ब्रह्महादीनां कृतप्रा-
यश्चित्तानामपि नास्याऽस्मिं लोके प्रत्या-
पत्तिर्विद्यते कल्मषं तु निर्हन्यते इत्यापस्त-
म्बदर्शनात्॥

॥ वृथान्नाचामनोत्थानव्यपेतानि॥

^ 6 उत्थानव्यपेतं 107 यदुर्ध्वभुक्त उत्थायोत्थाय पुनस्तदेव भुङ्क्ते।

वृथान्नं यद्यातिथ्याद्यनुद्देशेनात्मार्थं प-

544 च्यते। तथा बह्वृचानामृक्। मोघमन्नं वि-

न्दते अप्रचेताः। सत्यं ब्रवीमीति वध इत्स-

तस्य। नार्यमणं पुष्यति नो सखायं के-

वलाघो भवति केवलादी इति। आचमनव्यपेतं यदूर्ध्वभु-

क्तमाचम्य पुनस्तदेव भुङ्क्ते। एतान्निवि-

धमभोज्यम्। आचमनोत्थानव्यपेक्षितमि-

ति वक्तव्ये बहुवचनमेकपङ्क्तावन्यतरे-

णाचमने चोत्थाने कृते अन्यतरस्याभो-

ज्यमिति। तथाचाहोशनाः — अगुरूभिः

आचमनोत्थानं चेति। एवं च गुरूभिः कृ-

ते न दोषः॥

॥ समासमाभ्यां विषमे समे पूजातः॥

समेन विद्याकुलादितुल्येन सह वि-

षमां पूजां आसनपरिचरणादिकां कृत्वा

असमेन च समां कृत्वा यत्रान्नं दीयते

तत्र प्रजातो विषमे च समे च सति न
भोक्तव्यम् ॥

॥ अनर्चितं च ॥

न मन्त्रेण नमस्कृतं यथाह वासिष्ठः -
रोचत इति सायं प्रातरशनान्यभिपू-
जयेत् इति। चकारात् को भोक्ष्यत इति
चाकुष्टम्। तथा च वसिष्ठः - को भोक्ष्य-
त इति चाकुष्टमिति ॥

॥ गोश्च क्षीरमनिर्दशाहायास्सूतके ॥

545 गोः प्रसूताया अनतिक्रान्तदशाहायाः
क्षीरमभोज्यम्। चशब्दाद्दध्यादि च।

॥ अजामहिष्योश्च ॥

अनिर्दशाहयोः क्षीरमपेयम्। दध्या-
दीनामधिकारार्थश्च शब्दः। पृथ-
ग्ग्रहणं गोक्षीरस्य कदाचित्सप्तरा-
त्रादूर्ध्वमदोषार्थः ॥

॥ नित्यमाविकमपेयमौष्ट्रमेकशफं च ॥

नित्यग्रहणं न केवलं दशाह एवेति विका-
रस्यापि निर्देशस्तु मृगाद्यन्यासामपेयमि-
ति । एवं च पूर्वेषां मृगादिपेयमित्यव-
गम्यते । एकशफा एकखुराः वडवा-
दयः इतरे प्रसिद्धाः । असमासो मृगादी-
नामारण्यानां सर्वेषामुपसंग्रहार्थः ।
तथा च मनुः —
आरण्यानां च सर्वेषां मृगाणां माहिषं विना ॥
५४६ इति । चकारान्मनुष्यस्त्रीक्षीरं च । कृत-
मप्यपेयग्रहणं क्रियते नित्यत्वार्थम् ।
ततश्चाजामाहिष्योरसन्तापद्यानिर्दशाह-
योरप्यनुग्रहार्थम् ।

॥ स्यन्दिनीयमसूसंधिनीनां च ॥

नित्यं स दध्यादिक्षीरमपेयमित्यनुषङ्गः ।
स्यन्दिनी नितान्तं गलितस्तना । यम-

सूर्यमलापत्या। संधिनी एकां वेलाम-
न्तरीकृत्य या दुह्यते वत्सान्तरेण वा। ग-
र्भिणी या दुह्यते सा संधिनीत्येके॥ चशा-
ब्दाच्चाधितायाश्च॥

॥ विवत्सायाश्च॥

विवत्सायाश्च नाशमरणाभ्यां वत्सैर्वि-
युक्ता यास्तासामपेयं क्षीरं पृथग्ग्रहणं
दध्यादीनामप्रतिषेधार्थम्। क्षीरमात्र-
स्यैव प्रतिषेधस्स्यादिति अजामहिष्यो-
रप्युपसंग्रहार्थश्चशब्दः॥

547 सांप्रतं ये स्वरूपत एवाभक्ष्याः
ते उच्यन्ते।

॥ पञ्चनखाश्शल्यकशशश्वाविद्-
(धा)
गोधाखड्गकच्छपाः॥

अभक्ष्य इत्युत्तरत्र वक्ष्यति। तस्येहानुष-
ङ्गः। पञ्चनखाः येषां हस्तचरणयोः

पञ्च पञ्चनखाः सृगालवानरादयः ते
चाभक्ष्याः। शल्यकादीन्वर्जयित्वा। च श-
ब्दः पयोमूत्रोच्छिष्टानामप्युपसंग्रहार्थः।
शल्यकः कण्टकवराहः। शशः प्रसिद्धः
श्वाविद् उलूकी गोधा प्रसिद्धः। खड्गः
शृङ्गमृगः। कच्छपः प्रसिद्धः। ये अभक्ष्या-
स्तेषां मूत्रोच्छिष्टाद्यपि द्रष्टव्यम्॥ —
अभक्ष्याणां तु यन्मूत्रं तदुच्छिष्टं तथैव च।
अभोज्यमिति निर्दिष्टं विष्ठा चैव तथैव च॥
५४८ इति। वत्सवचनात् पञ्चनखाश्चेति प्रथमा
निर्देशः। शरीरावयवानां च सर्वेषां ग्रह-
णं यथा स्यादिति। यदि मांसमेवाभीष्टं
तदा षष्ठ्या निर्देशो युक्त इति। एवं च
रुधिरादयश्चाप्यपेयाः। एवं सर्वत्र द्रष्टव्यम्॥
॥ उभयतोदत्केश्यलोमैकशफकल-
विङ्कप्लवचक्रवाकहंसाः॥

उभयतो दन्ताः मानुष्यादयः। एषां पञ्च-
नखादेव प्रतिषेधे सिद्धे प्रायश्चित्तगौर-
वार्थं पुनरभिधानम्। एवमन्यत्रापि वि-
शेषनिर्देशो द्रष्टव्यम्। कोशीकाः केशा-
तिशययुक्ताश्च मत्स्यादयः। अलो-
मास्सर्पादयः। एकशफा अश्वादयः। क-
लविङ्को ग्रामचटकः। प्लवः शकटबिलः।
चक्रवाकहंसौ प्रसिद्धौ ॥

॥ काककङ्कगृध्रश्येना जलजा
रक्तपादतुण्डा ग्राम्यकुक्कुट-
सूकराः॥

549 काकादयः पक्षिणः प्रसिद्धाः। जलजा-
स्सर्व एवाविशेषेण रक्तपादा रक्ततुण्डा-
श्च। ग्राम्यशब्दः कुक्कुटसूकरयोस्सं-
बध्यते। एवं चारण्यानामप्रतिषेधः।
विसमासोऽन्येषां क्रव्यादादीनामप्रति-

केध्यार्थः॥

॥ धेन्वनडुहौ च ॥

धेनुः पयस्विनी गौः। अनड्वान् बलीवर्दः
तयोर्ग्रहणं मत्स्यादीनामप्युपलक्षणार्थः।
एवं तर्हि गौश्चेति वक्तव्यमिति चेत् –
अत्रोच्यते। भक्ष्यत्वसमुच्चयार्थश्चकारः।
तस्मिन् भक्ष्यत्वपक्षे तयोरेव ग्रहणं
स्यात्। न वत्सादीनामित्येवमर्थ उपदेशः।
तथाच वासिष्ठः – भक्ष्यौ तु धेन्वनड्वाहौ।
वाजसनेयके विज्ञायत इति तत्रातिथि-
550 रूपेणागतस्य भक्ष्यौ धेन्वनडुहौ। इत-
रेषामभक्ष्यमिति द्रष्टव्यम्। वासिष्ठलिङ्गात्।
तथा पितृदेवतातिथिपूजायामप्येवंमहन
पशून् हन्यादिति मानवः। अथापि ब्राह्म-
णं भवति – ब्राह्मणाय वा राजन्याय वा-
भ्यागताय महोक्षाणं महाजं वा पचे –

डेवमेवास्मा आतिथ्यं कुर्वीतेति ॥

॥ आपन्नदावसन्नवृथा मांसानि ॥

आपन्नद: पतितदन्त:। अवसन्नो व्याधित:। स्वयं मृत इत्यपरे। वृथा मांसमात्मार्थमेव पक्वं वृथान्नग्रहणादेव सिद्धे प्रायश्चित्तगौरवत्वार्थ: पुनरुपदेश:। एतद्भक्ष्याविषयं द्रष्टव्यम्। अभक्ष्ये प्राप्त्यभावात् ॥

॥ किसलयक्याकुलशुननिर्यासा लोहिता: ॥

किसलयस्सर्वेषां भग्नप्ररोह:। क्याकु-
रहिच्छत्रकं लशुनं प्रसिद्धम्। निर्यासा
55। लोहितश्चेत्। तथाच मनु: — 'लोहितान्
वृक्षनिर्यासान्' इत्यादि। एवं च हिङ्ग्वादीनां प्रतिषेधासिद्धि:॥

॥ व्रश्चनजाश्च ॥

श्लेष्मप्रभवा वृक्षाणामन्तरिजा इत्यर्थः। लोहिताश्चालोहिताश्चाभक्ष्याः। एवं च श्लेष्मभवत्वादलोहितप्रभवत्वात् कर्पूरादीनां प्रतिषेधः॥

केचित् लोहिता व्रश्चनाश्चेति सूत्रच्छेदं कुर्वन्ति। तेषां पक्षे कर्पूरादीनामप्रतिषेधः। अन्ये निर्यासा अलोहिता इति व्याचक्षते। तेषां हिंङ्ग्वादीनामप्रतिषेधः। चशब्दात्पलाण्डुगृञ्जनादीनि स्मृत्यन्तरोक्तानि॥

॥ निचुदारुबकबलाकशुकमद्गुटिट्टिभमान्धालनक्तंचरा अभक्ष्याः॥

निचुदारुः दार्वाघाटः। मद्गुः जले निमज्जनशीलः। टिट्टिभः शब्दानुकर्षणशीलः। मान्धालो पतङ्गः। नक्तंचराः उलूकादयः।

अन्ये प्रसिद्धाः अभक्ष्याः । इति । क्रिया-
552 पदं पञ्चनखा इत्यारभ्य संबध्यत इत्यु-
क्तम् ॥

॥ भक्ष्याः प्रतुदा विष्किराः
जालपादाः ॥

अन्यतरोपदेशादेवान्यतरे सिद्धे उभय-
वर्गोपदेशो येषां विधिः प्रतिषेधो
वा नास्ति तेषामापद्यनुग्रहार्थम् ।
प्रतुद्य प्रतुद्य मुखेन ये भक्षयन्ति मयु-
रादयः । विष्किरा विकीर्य ये भक्ष-
यन्ति लावकादयः अजालपादाः । ये
जालपादा न भवन्ति तुम्बुकादयः ॥

॥ मत्स्याश्चाविकृताः ॥

प्राण्यन्तररूपाः सशल्कसमुच्चयार्थः
चकारः । सशल्काश्चाविकृताश्चेत्युभय-
विशेषणयुक्ता एव भक्ष्याः । नैकविशे-

षणयुक्ता इत्यर्थः। पूर्वमजालपादा इ-
युक्तत्वात् जालपादानां तत्र चैकविशे-
553 षणयुक्तानां च प्रतिषेधो द्रष्टव्यः। एव-
मुत्तरत्रापि द्रष्टव्यम्।

॥ वध्याश्च धर्मार्थे ॥

यज्ञादौ धर्मनिमित्ते ये हताः पूर्वमभक्ष्या
अपि भक्ष्याः। चशब्दात् प्राणानामत्यये
च। तथाच मनुः—
प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानां च काम्यया।
यथाविधि नियुक्तस्तु प्राणानामेव चात्यये॥
इति॥— ननु च यज्ञादौ हतानां श्रुति-
विधिना एव सिद्धत्वादिह उपदेशोऽन-
र्थकः। इति॥

तत्रोच्यते। तत्र ये अदृष्टमेव
उद्दिश्य क्रियन्ते तच्छिष्टभक्षण एव
प्रायश्चित्ताभावः। न शिष्टप्रयोजनशिष्ट-

भक्षण इति। अत एव यज्ञार्थ इत्यनुक्त्वा
धर्मार्थ इत्युक्तम्। अपि अनेनैवावकीर्ण-
554 पशोरपि मांसभक्षणं निरस्तम्। तस्य
च प्रायश्चित्तार्थत्वात्। न त्वदृष्टार्थ-
त्वादिति। एवं च यथा दृष्टप्रयोजन-
मांसभक्षणे स्मार्त प्रायश्चित्तानुप्रवे-
शः, तथा तद्विषयहिंसायामपि तद्व-
धप्रायश्चित्तं भवतीति गम्यते। अ-
नेनैवाभिप्रायेण मनुनाप्युक्तं —
कुर्यात् घृतपशुं सङ्गे कुर्यात्पिष्टपशुं तथा॥
इत्यादि॥

॥ व्यालहतादृष्टदोषवाक्यशा-
स्त्रानभ्युक्ष्योपयुञ्जीत ॥

व्यालैः सिंहादिभिर्हतस्य पशो-
र्मांसमभ्युक्षणमात्रं कृत्वा भक्षयेत्।
अदृष्टदोष इति व्यालहतविशेषणं

तथा वाक्प्रशस्तमिति च व्यालहतस्य
555 पञ्चो मांसं भक्ष्यं तच्चेददृष्टदोषं वाक्प्रश-
स्तं च भवतीति अदृष्टदोषत्वमप्यभ-
क्ष्यवर्गे यदनुपदिष्टं भक्ष्यवर्गे चानु-
पदिष्टं भक्ष्योपदेशादेव सिद्धत्वात्। प्रश-
स्तं चान्यैरेवं च भक्ष्यवर्गे चाभक्ष्य-
वर्गे च यदनुपदिष्टमापदि विहितं
तस्यानेन प्रकारेणाभ्यनुज्ञायते। ब-
हुवचनं विशेषणत्रययुक्तस्यैव प्रशु-
चित्वं नैकविशेषणत्रययुक्तस्येति।
एवं च बैल्वकमप्युपयुञ्जीत इत्यप्य-
दृष्टदोषत्वादिति द्रष्टव्यम्। अश्नी-
यादिति वक्तव्ये उपयुञ्जीतेति वचनं
भक्षणाद्वर्जनमेव श्रेय इति॥
तथा च मनुरपि—
न मांसभक्षणे दोषो न मद्ये न च मैथुने।

प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥

इति ॥ — ॐ ॥

556. इति मस्करीये गौतमभाष्ये सप्तदशोऽध्यायः ॥

॥ श्रीः ॥

सामान्यविशिष्टाश्चाश्रमधर्मा उक्ताः स्त्रिय इदानीं वक्तव्या इत्यत आह —

॥ अस्वतन्त्रा धर्मे स्त्री ॥

अस्वतन्त्रा पराधीना धर्मे पारलौकिके भर्त्रा सह स्वधर्मेऽधिकारः। न तु पुरुषवत्स्वातन्त्र्येण। तथा च मनुः —

नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषितम्।
शुश्रूषयेत भर्तारं तेन स्वर्गे महीयते ॥ इति।

शङ्खेनाप्युक्तम्। — न व्रतोपवासनियमेज्यादानधर्मो वानुग्रहकारणं स्त्रीणाम-
557 न्यत्र पतिशुश्रूषायाः कामं तु भर्तुरनु-

ज्ञया व्रतोपवासनियमादीनामभ्यास
स्त्रीधर्म इति ॥

ननु च श्रौतस्मार्तानां पुरुषोद्देशेन विहितत्वात् स्वातन्त्र्येण स्त्रियाः प्राप्त्यभावात् प्रतिषेधानुपपत्तिः॥ अथोच्यते। यथा स्वातन्त्र्यवचनं सहधर्मक्रिया अपि फलवती स्येवमर्थ इति । तदयुक्तम्। सहधर्मचारिणीत्वादेवास्यार्थस्य लभ्यमानत्वात्। अतः स्वतन्त्र्या स्त्रीति न ज्ञायते। किं तया भवितव्यमिति भर्तृहीनयेति चेत् न उपरिष्टान्नातिचरेत् भर्तारमित्यनेन भर्तृपरतन्त्रत्वस्य वक्ष्यमाणत्वात्। तेनाव्यभिचारो वक्ष्यत इति चेत् नातिचारस्य धर्मार्थकामविषयस्य प्रतिषिद्धत्वादिति। — अत्रोच्यते ॥

५५४ उपवासदानादेर्धर्मसाधनस्य भर्तुरनु-

ज्ञायां सत्यां स्त्रियाः प्रापणार्थोऽयमारम्भः।
आश्रमधर्मस्य भर्तृद्वारेण प्राप्तत्वात्।
तथा च शङ्खवचनं प्रदर्शितम्।
कामं तु भर्तुरनुज्ञेत्यादि। तथा चाधानवि-
षयेऽपि नारद आह—
स्त्रीकृतान्यप्रमाणानि कार्याण्याहुरनापदि।
विशेषतो गृहक्षेत्रदानाधमनविक्रयाः॥
एतान्येव प्रमाणानि भर्ता यद्यनुमन्यते।
इत्यादि। इदं भर्तृधनविषयम्।—
स्त्रीधनस्येशिनी स्त्री स्यात् भर्ता च तदनुज्ञया।
भोक्तुं पालयितुं योग्यो भर्तुर्नाशयितुं न च॥
इति कण्ववचनादिति चेत् न। स्मृत्यन्त-
रदर्शनात्। यथाह व्याघ्रः—
नादातव्यं न दातव्यं स्त्रीधनं जातु केनचित्।
पत्यनुज्ञातपूर्वं चेत्स्त्रिया दातव्यमेव तत्॥
इति। तथा च लोकाक्षिः—

ईशा स्त्री स्वधनस्योक्ता नाधिकानक्रियेषु च।
आध्यादितत्कृतं तस्मान्न सिध्यति कदाचन॥
५५१ इति। एवं च कण्ववचनेऽपि दानाधमन-
विक्रयं वर्जयित्वैव स्वाम्यं द्रष्टव्यम्॥
यत्तूक्तं किं तत्रानया भवितव्यं इति। तत्र
पितृभर्तृपुत्राधीनतया यथाकालं - यथाह
मनुः —
बाल्ये पितुर्वशे तिष्ठेत्पाणिग्राहस्य यौवने।
पुत्रस्य स्थाविरीभावे न स्त्रीस्वातन्त्र्यमर्हति॥
इति। तथा च तत्रैवापरमपि —
बालया वा युवत्या वा वृद्धया वापि योषिता।
न स्वातन्त्र्येण कर्तव्यं कार्यं किंचिद्गृहेष्वपि॥
इति। एवं च धर्मादन्यत्र कामचारे प्राप्ते
आह —
॥ नातिचरेद्भर्तारम्॥
भर्तुरनुज्ञया विना तत्प्रतिषिद्धं वा न

क्वचिदपि प्रवर्तेतेत्यर्थः॥ पतिमिति वक्त-
व्ये यो यो भरणं करोति तं तं प्रसेवामि-
ति भर्तृग्रहणम्। किञ्च —

560 ॥ वाक्चक्षुः कर्मसंयता ॥

स्यादिति शेषः। यावदर्थसंभाषिणी
वाक्संयता अकार्यकृता भीक्षणिकादी-
नां अप्रेक्षणी चक्षुस्संयता गृहव्यापाराभि-
युक्ता कर्मसंयता।

॥ अपतिरपत्यलिप्सुर्देवरात् ॥

अपतिरविद्यमानभर्तृका अयोग्यपति-
र्वा। तथाच बृहस्पतिः —
नष्टे मृते प्रव्रजिते क्लीबेऽथ पतिते पतौ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते॥
इति। अपत्यलिप्सुर्धनपत्या सहापत्यमि-
च्छति पुनर्देवरादुत्पादयेदित्यर्थः॥
देवरो भर्तुः ज्येष्ठाल्लघुः यवीयान्।

पाकेन विधिना उत्पादयेदित्यत आह —

॥ गुरुप्रसूता नर्तुमतीयात् ॥

५८। गुरुभिरनुज्ञाता भर्तृपक्षैः पितृपक्षैश्च वि-
युक्तेत्यर्थः। ऋतुं नातीयात् - ऋतुकालमन्य-
त्र न प्रसज्येत इत्यर्थः। तत्राप्येकस्मिन्दिव-
से यदि गर्भोत्पत्तिर्भवति तत्रैव भवति नो-
चेत्तस्यामृतौ न भवतीति। तथाच तलवका-
राणां ब्राह्मणं — "यद्वा प्रथमेऽहनि रेतः
सिच्यते स गर्भस्संभवत्यथ यत्ततस्सि-
च्यते मृधै(मुधैव) तत्परासिच्यते" इति।
तत्रापि घृतेनाभ्यज्य इति द्रष्टव्यम्।
यथाहोशना — नियुक्ता सर्वाङ्गं घृतेना-
भ्यक्ता तेन सर्वाङ्गं घृतेनात्मानमभ्य-
ज्य गच्छेदिति ॥

॥ पिण्डगोत्रर्षिसंबन्धेभ्यः ॥

उत्तरसूत्राद्द्वादशस्याभाववैकल्पिकार्थ-

स्यानुषङ्गः। ततश्चाधिकाराद्देवराभावे
सपिण्डमात्रादपत्यलिप्सुस्स्यात्। तद-
भावे सगोत्रमात्रात्। अत्र सगोत्रशब्देन
समानोदको गृह्यते। संनिकृष्टं। संनि-
562 कृष्टं गृह्णीयादिति स्मृत्यन्तरदर्शनात्।
ऋषिसंबन्धास्सकुल्याः॥

॥ जातिमात्राद्वा ॥

सर्वाभावे ब्राह्मणजातिमात्राद्वा। मात्रश-
ब्दो धर्मवाची। ततश्च गुणवदभावे निर्गु-
णादिति द्रष्टव्यम्। पृथग्ग्रहणं तत्कु-
लीने सति परगामित्वप्रतिषेधार्थम्।
तथाच वसिष्ठः— न तु खलु तत्कुलीने
विद्यमाने परगामिनी स्यादिति॥

॥ नादेवरादित्येके ॥

अदेवरात्सपिण्डादेस्सकाशादपत्यं न
जनयेदित्येके मन्यन्ते। देवराभावेऽन्य-

सार्थः १
तो ऽपीत्यर्थः ॥

॥ नाति द्वितीयं जनयितुरपत्यम् ॥

द्वितीयमतीत्य तृतीयं नोत्पादयेत् । एवं च द्वितीयमनुज्ञातं भवति । यदि तृतीयमुत्पादयति तज्जनयितुर्देवरादेर्भवति । न क्षेत्रिणः । ततश्च तदयोग्यं भवतीत्येतावदत्र विवक्षितं, न जनयितुः स्वस्वामिसंबन्धः । तथाच मनुः —

563

आनियुक्तासुतश्चैव पुत्रिण्याप्तश्च देवरात् ।
उभौ तौ नार्हतो भागं जारजातौ तु कामजौ ॥
इत्येतावदत्र विवक्षितम् ।

॥ समयादन्यस्य ॥

समयस्तत्परं ममापत्यमित्येवं समयः कृतश्चेत् अन्यस्य क्षेत्रिणो भवति । तृतीयमपि अतस्तदनुष्टमित्यभिप्रायः ।

॥ जीवितश्च क्षेत्रे ॥

अन्यस्ये समनुकर्षणार्थश्चकारः। जीवतः प्रजनना समर्थस्य पत्युः क्षेत्रे भार्यायाः यदपत्यमुत्पाद्यते तत्क्षेत्रिण एव भवति। विनापि समयेन द्वितीयादधिकमपीति अभिप्रायः॥

564 ॥ परस्मात्तस्य ॥

परस्माद्देवरादिव्यतिरिक्तात् व्यतिक्रमाद्वा यदि जीवतोऽपि अपत्यमुत्पाद्यते तत् द्वितीयादधिकमपि तस्यैवोत्पादयितुरेव भवति। न क्षेत्रिणः।

॥ द्वयोर्वा ॥

एवमुत्पन्नमप्यपत्यं बीजक्षेत्रिकयोर्वा भवति। तद्द्यामुष्यायणो वा भवतीत्यभिप्रायः।

॥ रक्षणात्तु भर्तुरेव ॥

रक्षणे भरणपोषण संस्कारादौ क्रियमाणे

भर्त्रा परस्माच्च य एव रक्षणसमर्थः
तस्य वशो भवतीति । एवं यदपत्यमुत्पद्यते
तत् क्षेत्रिण एव भवति । तुशब्दो विशे-
षार्थः । प्रव्रजीत नष्टपतितादेरक्षितोऽपि
भवति । य एव रक्षणसमर्थस्तस्य विशे-
षेण भवति । इति मृते भर्तरि विधिरुक्तः ।
इदानीं नष्ट आह —

॥ नष्टे भर्तरि षड्वार्षिकं क्षपणम् ॥

565 देशान्तर तिरस्कृते भर्तरि षड्वर्षाण्यपत्यो-
त्पत्तिरनया न कार्यम् । ततः परमिच्छया
गुरुनियोगं कारयेत्वापत्यमुत्पादयेदित्य-
भिप्रायः । अनियुक्तायामुत्पादयितुः पुत्रो
भवतीत्याहुरिति वासिष्ठस्मृतिदर्शनात् ।

॥ श्रूयमाणेऽभिगमनम् ॥

षड्वर्षादूर्ध्वं यदि भर्ता श्रूयमाणो भवति ।
तस्मिन् श्रूयमाणे तमेवाभिमुख्येन

गच्छेत्। नान्यस्मादपत्यमुत्पादयेदित्य-
भिप्रायः॥

॥ प्रव्रजिते तु निवृत्तिः प्रसङ्गात्॥

यदि प्रव्राजितो भर्ता भवति तस्मिन् प्रस-
ङ्गात्तं प्रतिगमनान्निवृत्तिः। तं प्रति न
गच्छेदित्यर्थः। अथवा प्रसङ्गादपत्यो-
त्पादनान्निवृत्तिः। तुशब्दो विशेषार्थः।
यदि भर्तुरपत्योत्पादनाभिलाषोऽस्ति
तदानीमपत्यमुत्पादयेत्। अभिलाषा-
566 भावे नोत्पादयेत्। संयतया भवितव्यमि-
ति एके वर्णयन्ति। प्रव्रजितेऽपत्यं नो-
त्पादयेत्। तुशब्दात्स्वयमपि प्रव्र-
जेत्। देशान्तरस्थस्याभिप्रायो ज्ञातु-
मशक्यत इति॥

॥ द्वादश वर्षाणि ब्राह्मणस्य
विद्यासंबन्धे॥

विद्याधिगमनार्थं प्रोषितस्य ब्राह्मणस्य
भार्या द्वादशवर्षाणि क्षपेत । अपत्यो-
त्पत्तिं तदभिगमनं च प्रव्रजिते निवृ-
त्तिं च कुर्यादिति द्रष्टव्यम् । अत्र ब्राह्म-
णग्रहणात् पूर्वं क्षत्रियादिविषयमिति
गम्यते । अथवात्र विद्याग्रहणार्थं गत-
स्य पूर्वमुक्तं उक्तं षड्वर्षं ब्राह्मणस्यैव
स्मृत्यन्तरसामर्थ्यात् कामविषये क्षपणं
नास्तीति । यथाह वसिष्ठः - प्रोषित-
पत्नी पंचवर्षाण्युपासीताप्रजेभ्यो वर्षे-
५८ भ्यो भर्तृसकाशं गच्छेद्यदि धर्मार्था-
भ्यां प्रवसेदथ तु कामाद्यथा प्रेत एवं व-
र्तितव्यं एवं च स्यादिति ॥ एवं च क्षत्रि-
यादेर्विद्यार्थं गतस्य ब्राह्मणादिभ्योऽर्ध-
मर्धं परिकल्प्यम् । अर्थार्थं गतस्य
वासिष्ठोक्तं द्रष्टव्यम् । ब्राह्मणी पंचप्र-

जाता: षट् प्रजाता: चत्वारि राजन्या प्र-
जाता पंचप्रजाता। त्रीणि वैश्या प्रजा-
ता त्रीणि चत्वारि प्रजाता शूद्रप्रजाता
द्वे त्रीणि प्रजातेति। अनेनैव न्यायेन
विद्यासंबन्धेऽपि अप्रजाताया एकवर्ष-
न्यूनभावो द्रष्टव्य:।

॥ भ्रातरि चैवं ज्यायसि यवी-
यान् कन्याग्न्युपयमेषु ॥

भ्रातर्यकृतदारे नाहिताग्नौ च प्रोषिते
ज्येष्ठे यवीयानेवमेवं कुर्यात्। एवंश-
564 ब्दात् सास्तातिदेश:। श्रूयमाणे तदभि-
गमनं प्रव्रजिते तदभिगमननिवृत्तिश्च
ततो द्रष्टव्य:। एवं तर्हि प्रव्रजिते संय-
तत्वमपि प्राप्नोतीति चेत् न तत्रापि
स्मृत्यन्तर सामर्थ्यात्। यथाहोशना:-
प्रव्राजिते ज्येष्ठे क्षपणं नास्ति। सद्य एव

न्निविशेदिति। एवमप्यर्थार्थं गतस्यापद्वार्षिकं प्राप्नोतीति चेन्न। तत्रापि स्मृत्यन्तरसामर्थ्यात्। यथाह वसिष्ठः —

द्वादशैव तु वर्षाणि ज्यायान्धर्मार्थयोगतः।
न्याय्यः प्रतीक्षितुं भ्राता श्रूयमाणे पुनः पुनः॥

इति। चकारात्स्मृत्यन्तरोक्तानामप्युपसंग्रहार्थः। यथाह वसिष्ठः — 'अष्टौ दश द्वादशैव तु वर्षाणि ज्येष्ठं भ्रातरमनिविष्टमप्रतीक्षमाणः प्रायश्चित्तीयो भवति'। इति। तत्र बहुशः श्रूयमाणे द्वादश पुनः पुनरित्युक्तत्वात् किंचिच्छ्रूयमाणे दश सदा श्रूयमाणेऽष्टाविति द्रष्टव्यम्। क्षत्रियादेः पूर्ववदर्धमर्धं परिकल्प्यं। अस्यापवादः —

५६५ उन्मत्तः किल्बिषी कुष्ठी पतितः क्लीब एव च।
राजयक्ष्मामयावी च न न्याय्यः स्यात्प्रतीक्षितुम्॥

इत्यादि स्मृत्यन्तरोक्तं द्रष्टव्यम् ।
ज्येष्ठग्रहणादेव कनीयसास्सिद्धे संब-
न्धशब्दत्वादेकमातृकस्यैव दोष इति
ख्यापनार्थः ॥ स्मार्तस्याप्यग्नेरुपसंग्र-
हणार्थं बहुवचनम् ॥

॥ षडित्येके ॥

षडेव वर्षाणि प्रतीक्षेत इत्येके मन्यन्ते ।
तत्र प्रोषितोऽसन्नवृद्धश्चेत् षड्वर्षं क्षपेत ।
नो चेद्द्वादशवर्षमिति द्रष्टव्यम् ॥
प्रासङ्गिकमुक्त्वा स्त्रीधर्ममेवाह –
॥ त्रीन् कुमार्यृतूनतीत्य स्वयं
युज्येतानिन्दितेनोत्सृज्य
पित्र्यानलङ्कारान् ॥

570. त्रीन् ऋतून् कुमारी कन्या अतीत्य
यद्येनां पित्रादिः न दद्यात् स्वयमेव

भर्तारं प्रतिपद्येतानिन्दितं रूपादिभि-
र्जनादिसमन्वितमिति उत्सृज्य पित्रादि
दत्तानलङ्कारान् पितृग्रहणं प्रदर्शनार्थ-
मिति। तथाह मनुः —

अलङ्कारान्नादद्दीत पित्र्यान् कन्या स्वयंवरा।
मातृकं भ्रातृदत्तं वा स्तेयं स्याद्यदि तं हरेत्॥

इति। तस्मिन्काले पित्रादिभिर्दातव्ये-
त्यत आह —

॥ प्रदानं प्रागृतोः ॥

रजोदर्शनात् प्रागेनां दद्यात्। यतः —

॥ अप्रयच्छन्दोषी ॥

१ न केवलं प्रयच्छतो दाननिमित्ताभ्युद-
याभावः। किं तर्हि दम्पत्योर्ब्रह्महत्यासमं
पापं भवतीति। यथाह वसिष्ठः —

यावन्तः कन्यामृतवः स्पृशन्ति
५७। तुल्यैः सकामामभियाच्यमानाम्।

भ्रूणानि तावन्ति हतानि ताभ्यां
मातापितृभ्यामिति धर्मवादः॥
इति॥ ॥ प्राग्वाससः प्रतिपत्तेरित्येके॥
दुर्विज्ञेयत्वादृतोर्वाससः प्रतिपत्तेः प्राग्दद्या-
त्। यदैव लज्जिता तदैव दद्यादित्यर्थः।
एवमेके मन्यन्ते।
वरसंभवतो विकल्पः यदा पित्रादि
दद्यात्तदा चल्लाद्याच्छ्रुतां दद्यादित्युक्तम्।
द्रव्याभावे कथमित्यत आह —
॥ द्रव्यादानं विवाहसिद्ध्यर्थम्॥
द्रव्यस्य परकीयस्यादानमननुज्ञात-
स्य स्वीकरणं विवाहसिद्धये यावता
विवाहो न वर्तते तावदेव न ततोऽधिक-
मिति। एवं चाधिकग्रहणे स्तेयमेव भ-
वति। आत्मीयाभावे तदपहृत्य कन्यां
512 दद्यादित्यर्थः॥ किञ्च —

॥ धर्मतन्त्रसङ्गे च ॥

धर्मतन्त्रस्याग्निहोत्रादेः प्रवृत्तस्य वि-
च्छेदस्सङ्गः तस्मिंश्च सति परस्वा-
पहरणं कुर्यात्। तन्त्रग्रहणं यत् प्रक्रा-
न्तमवश्यं कर्तव्यं तस्यैव सङ्गे न
त्वप्रवृत्तस्य प्रवृत्त्यर्थमित्यस्यानुकर्ष-
णार्थश्चकारः। यावता निवर्तते ताव-
देव गृह्णीयात्। न ततोऽधिकम्। एवं
चाधिकग्रहणे स्तेयमेव भवति।
कुतस्तदादेयमित्यत आह—
शूद्राद्यज्ञार्थं हि धनं न शूद्रस्य
वैदिकेषु कर्मस्वधिकारः। प्रथमं ताव-
च्छूद्रादाददीत तदलाभे ॥

॥ अन्यत्रापि शूद्रात् ॥

अन्यत्रापीति वक्तव्ये शूद्रग्रहणं वै-
श्यक्षत्रियप्रापणार्थम्। तदलाभे

573 वैश्यात् तदलाभे क्षत्रियात् इति।
तत्रापि —

॥ बहुशो हीनकर्मणः ॥

हीनकर्मा य अननुरूपं करोति। किञ्चिदपि न करोति। बासहीनकर्मा तस्य सकाशादादद्दीत।

॥ शतगोरनाहिताग्नेः ॥

अन्यकर्मकृतोऽपि शतगोरग्न्याधानमकुर्वतः शतगुग्रहणं द्रव्यपरिमाणोपलक्षणार्थं शतनिष्कस्येत्यर्थः। एवं सर्वत्र ॥

॥ सहस्रगोश्चासोमपात् ॥

यश्चाहिताग्निरपि सहस्रगुस्सोमं न पिबति तस्मादप्याददीत। चशब्दादन्यतोऽपि यः प्रभूतधने सत्यपि सति न तदनुरूपं कर्म करोति। तस्मादपि न

केवलं निमित्तद्वय एव परद्रव्यादानम्।
किञ्च —

॥ सप्तमीं चाभुक्त्वाऽनिचयाय॥

574 सप्तमीं वेलामभुक्त्वा साधनक्षयात् परद्र-
व्यादानं कुर्यात्। तथाच मनुः —
तथैव सप्तमे भक्ते भक्तानि षडनश्नता।
न श्वस्तनविधानाय हर्तव्यं हीनकर्मणः॥
इति। न कर्माधिकारश्चकारः। तथोदा-
हृतं च मनुवचनं अनिचयाय उदर-
पूरणमात्रम्॥

॥ अप्यहीनकर्मभ्यः ॥

अस्यामवस्थायां यथाविहितकर्मकारि-
भ्योऽपि अपिशब्दादाहिताग्नेस्सोम-
पाच्च यद्यादाने राजपुरुषैर्नृपसमीप-
मानीयते, चौर्यनिमित्तं च पृच्छ्यते
तदा — ॥ आचक्षीत राज्ञा पृष्टः॥

आचक्षीत कथयेत। न तु भयादपह्नुवीत।
पृष्टस्सन् न तु स्वयं गत्वा कथयेत॥
यस्मात्॥
॥ तेन हि भर्तव्यः श्रुतशीलसंपन्नश्चेत्॥
हि शब्दो यस्मादर्थे। यस्मात्तेन हि
515 भर्तव्यः बिभृयात् ब्राह्मणानिति श्रुति-
शीलसंपन्नो यदि भवति श्रुतेन वेदार्थ-
र्थविज्ञानेन शीलेन तच्चोदितकर्मा-
नुष्ठानेन संपन्नः सम्यक् स्तुतः बिभृयात्।
ब्राह्मणान् श्रोत्रियानिति श्रोत्रियाणां
भरणोपदेशात्। भर्तव्यवचनेनैव
श्रुतशीलसंपन्नता सिद्धेति चेत्।
ननु श्रोत्रियाणामपि भरणोपदेशात्कि-
एसा ~~रुस्त~~ हांश्चाब्राह्मणानिति। एवं च
परस्वापहरणे अब्राह्मणो न भर्तव्यः
इति प्रदर्शितं तेनेति वचनम्॥

राज्ञो धर्मार्थमेवास्य भरणं, न वृत्त्यर्थमिति॥ धर्म —॥ धर्मतन्त्रपीडायां

तस्याकरणे दोष:॥

यस्माद्भर्तव्यस्तस्मादस्य धर्मतन्त्रपीडायां धर्मशब्देनाग्निहोत्रादय उच्यन्ते।
576 तन्त्रशब्देन विवाह:। पीडाशब्देनात्मपीडा। सप्तमीं चाभुक्त्वेति यदुक्तं धर्मविच्छेदे विवाहसिद्धये आत्मपीडायाश्चेत्यर्थ:। तस्य चौर्यस्य करणेऽदोष:। दण्डो नास्तीत्यर्थ:। राज्ञ उपेक्षया धर्मतन्त्रपीडा तां कृत्वा स्वदोषादागते चौर्ये ब्राह्मणस्य दण्डपातमयुक्तमित्यभिप्राय:।

केचिद्व्याचक्षते। श्रुतशीलसंपन्नश्चेत् भर्तव्यत्वाद्व्याचक्षीत।

अश्रोत्रियोऽव्याचक्षीत। यस्मादश्रोत्रियस्यापि धर्मतन्त्रपीडायां दण्डो नास्तीति।

अपरे व्याचक्षते ॥

बिभृयाच्छ्रोत्रियानिति योऽसौ भर्त-
व्यस्सोऽस्मिन्नपराधेऽपि भर्तव्य एव-
शब्दस्यार्थ इति तदनुरूपमर्थं दात-
व्यमित्यर्थः। अश्रोत्रियमपि न दण्डयेत्।
577 ततस्तस्यापि तस्मिन्नपराधे दण्डो ना-
स्ति इति। कुतः। धर्मतन्त्रपीडायामि-
त्यस्य सूत्रस्याश्रोत्रियार्थत्वादारम्भ-
स्येति ॥ ॐ ॥

इति मस्करीये गौतमभाष्येऽष्टादशोऽध्यायः॥

॥ द्वितीयप्रश्नः समाप्तः॥

(अथ तृतीयप्रश्नः)

॥ ॐ ॥

पञ्चविधो धर्मो व्याख्येयतया प्रक्रा-
न्तः। तत्र चतुर्विध उक्तः। इदानीं पञ्चमो
नैमित्तिको वक्तव्यः॥ तदभिधानार्थ-

मुक्तोपसंहारार्थं करोति ॥
॥ उक्तो वर्णधर्मश्चाश्रमधर्मश्च ॥
578 किं पुनरनेन सूत्रेण क्रियते। अनुक्तप्रक-
रणोपन्यासार्थमुक्तोपसंहारः क्रियत
इति चेत्तदयुक्तम्। अनुपसंहारेणा-
प्युत्तरस्याभिधातुं शक्यत्वात्।
तर्हि श्रोतृणामधिकाराकाङ्क्षानिवृत्तिः
क्रियत इति चेत्, तदयुक्तम्। नैमि-
त्तिकारम्भादेव तत्सिद्धेः। किञ्च
एवं चाश्रमग्रहणं च न कर्तव्यम्। तत्सं-
बन्धेनैव धर्माभिधानात्॥ उक्ता धर्मा
इत्येतावतापि तदुपसंग्रहः कृतो भवतीति।
कृत्स्नोपसंहारे वा वर्णाश्रमधर्मगुण-
धर्मयोरपि अभिधानं कर्तव्यमिति नि-
ष्प्रयोजनत्वाच्चकारावप्यनर्थकौ।
तस्मादिदं सूत्रमसमञ्जसमिति ॥

अत्र क्रमः ॥ – केचिद्वर्णयन्ति आधारप्रसिद्ध्यर्थमिदमिति । इदमयुक्तम्।

579 वर्णा आश्रमाश्चेति सूत्रारम्भादेव ज्ञायमानत्वात् । अपरे पुनर्वर्णयन्ति – शूद्रस्याभक्ष्यभक्षणप्रायश्चित्तप्रापणार्थमिदमिति । तदप्ययुक्तम् ॥ प्रशस्तानां स्वकर्मसु स्वजातीनां भक्ष्याभक्षणाधिकाराभावात् प्रायश्चित्तस्याप्यभावोऽर्थसिद्ध इति ॥

अन्ये वर्णयन्ति । उपनयनात् प्रागपि कैश्चिद्वर्णधर्मैरधिकारार्थमिदमिति।

तदप्यसम्यक् । वर्णा आश्रमाश्चेत्युक्तत्वात् ॥ अपरे वर्णयन्ति ॥

वर्णाश्रमधर्माणां स्त्रिया अपि प्राप्त्यर्थमिदमिति ॥ — तदप्ययुक्तम् ॥

विवाहात् पृथगनुपेता सा भवतीति व-
र्णा आश्रमाश्चेत्यत्र वर्णग्रहणेनैव सिद्धे-
मुत्तरकालमभ्युपनीतेत्याश्रमग्रहणाद्‌ा-
श्रमधर्मा अधिक्रियन्त इति।

58 यथाह मनुः —
वैवाहिको विधि स्त्रीणामौपनायनिकः स्मृतः॥
इत्यादि। अतस्तत एव सिद्धे किमनेन सूत्रे-
ण क्रियत इति। आह — उत्तरार्धोऽयम-
नुवादः। येषां वर्णविभागेनाश्रमविभा-
गेन च धर्मा उक्तास्तेषामेव वक्ष्यमाणो-
पीति। ततः शूद्रस्यापि प्रायश्चित्तसि-
द्धिरिति॥ — तदप्ययुक्तम्॥
द्वयमेव प्रायश्चित्तानां निदानं विहि-
ताकरणं, प्रतिषिद्धसेवा च। तत्र विहि-
ताकरणे मनुराह —
वेदोदितानां नित्यानां कर्मणामतिवर्तने।

स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥

58। इति। प्रतिषिद्धसेवायां च बृहस्पतिराह ——

प्रतिषिद्धं नरं कुर्यात् ब्राह्मणस्तु विशेषतः।
एकरात्रमनादेश आदिष्टे तु पृथक् पृथक् ॥

इति। ततश्च यस्य विधिप्रतिषेधयोरधिकारस्तत्प्रायश्चित्तस्याप्यर्थसिद्धिः। ततश्च शूद्रस्याप्यर्थसिद्धत्वात् तत्प्रापणार्थमिदमारब्धव्यमिति ॥

अत्रोच्यते। अशङ्कानिवृत्त्यर्थमिदमुपदिष्टं द्वैदिकानि प्रायश्चित्तानि पुनस्तोमादीन्युदाहरिष्यन्ते। तानि शूद्रस्य तु न संभविष्यन्ति। अतस्तद्व्यतिरेषामपि निवृत्तिर्मा भूदिति आशङ्क्यपनीयते इति वयोवस्थाविशेषापेक्षया वा प्रायश्चित्तस्यानुग्रहार्थं वर्णग्रहणम्। यथाह भृगुः ——

582 अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः।
प्रायश्चित्तार्धमर्हन्ति स्त्रियो ऽव्याधित एव च ॥
इति। कालविशेषाद्वा यथाह भृगुः —
दुर्बलस्यापि तत्प्रोक्तं यदुक्तं बालवृद्धयोः।
संकोचवृत्तिनश्चापि तथा कालविपर्ययः॥
इति। तथा व्याघ्रोऽपि —
देशकालं वयः शक्तिं ज्ञानं बुद्धिकृतं तथा।
अबुद्धिकृतमभ्यासं ज्ञात्वा निष्क्रमणं वदेत्॥
इति॥ — चशब्दोऽप्यवान्तरजोपसं-
ग्रहार्थः। तदुपसंग्रहश्च तेषामपि प्राय-
श्चित्तप्राप्त्यर्थः। ततश्च मातृजातिवत्
परिकल्प्यः। आश्रमग्रहणं प्रायश्चित्तानां
सम्भवप्रापणार्थम्। यथैव पापापेक्षया
प्रायश्चित्तं क्रियते। एवमाश्रमापेक्षयापि।
583 ततश्च जपादीनां सम्भवतो विनिवेशः।

न हि होमदानयोर्भिक्षुके संभवः।
अनग्निकत्वादपरिग्रहत्वाच्च। ~~तथाच~~
तथाच ब्रह्मचारिणो दाने द्वितीयश्च-
कारः स्त्रीधर्मानुकर्षणार्थः॥
वर्णाश्रमग्रहणेनैव सिद्धे तस्य पुन-
रप्यनुवादः प्रायश्चित्तकल्पनार्थः।
तत्र उदाहृतं च भृगुवचनं-'अशीतिर्य-
स्य वर्षाणी'त्यादि। तथाचाङ्गिराः —
नार्यप्यकामतः प्राप्तं पापमल्पं समाचरेत्।
अर्वाक्तु द्वादशाद्वर्षात् पुरुषोऽप्यर्धभाग्भवेत्॥
इति। इदानीं प्रायश्चित्ताकरणमाह —

॥ अथ खल्वयं पुरुषो याप्येन
कर्मणा लिप्यते॥

न च शिष्टस्याक्रिया प्रतिषिद्धसेवनं
च प्रायश्चित्तकारणं तच्चोपरितनसूत्रे
585 प्रतिपादयिष्यते। इत्यनर्थकमेवैतत्सू

त्रामिति ॥ अत्रोच्यते ॥
आत्मानमज्ञानत्वाद्यः कर्म करोति तस्यैव कर्मसंबन्धो न ह्यात्मज्ञानिनो विहिताकरणे प्रतिषिद्धसेवने च लेपसंबन्धोऽस्तीति अनात्मज्ञानिन एव प्रायश्चित्तार्थमिदं, तथाचोपनिषत् —
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥
इति। ततश्चाज्ञानिनः अथ = कर्मानुष्ठानादनन्तरं। खल्विस्यवधारणे। अयमेव पुरुष इति। अयमिति प्रत्यक्षेण शारीरिणं क्षेत्रज्ञं व्यपदिशति अवधारणया परमात्मानं निवर्तयति। तथा चोपनिषत् — "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयो-
585 रन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभि-

रि

चाकशीति" ॥ इति । पुरुशयनात्पुरुषः ।
तथाचोपनिषत् — 'यो वेद निहितं
गुहायां परमे व्योमन्नि'ति । वाच्ये-
याच्येन = गर्ह्येण कर्मणा लिप्य-
ते संबध्यते । यच्चाप्ययं धर्मेणापि
संबध्यते । तथापि धर्मसंबन्धे प्राय-
श्चित्ताभावादधर्मस्यैव उपादानं ख-
ल्वयं पुरुषो याच्येन कर्मणा लिप्य-
त इत्युक्ते विकृतस्य कर्मणोऽवश्य-
संबन्धोऽथ शब्दोऽनर्थक इति
चेत् — न । अनुपलक्षितेऽपि प्राय-
श्चित्ते जपादेरनुष्ठानार्थम् । तथाच
मनुः —

संवत्सरस्यैकमपि चरेत्कृच्छ्रं द्विजोत्तमः ।
अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषतः ॥

इति । एवं चाबुद्धिपूर्वके प्रायश्चित्त-

586 मस्तीति ज्ञापितम्। तथाच मनुः —
अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः।
कामकारकृतेऽप्याहुरेकश्रुतिनिदर्शनात्॥
इति। तत्र बुद्धिपूर्वे गुरुतरमबुद्धिपू-
र्वे कृते लघुतरं द्रष्टव्यम्। तथाच
वक्ष्यति — अन्त्यावसायिनी गमने
कृच्छ्राब्दः अमत्या द्वादश रात्रमित्या-
दि पूर्वजन्मजानामपि संबन्धज्ञापना-
र्थं कर्मग्रहणम्। तथाच मनुः —
इह दुश्चरितैः केचित् केचित्पूर्वकृतैस्तथा।
प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्ययम्॥
इति। तथा तत्रैवाह — ब्रह्महा क्षयरो-
गित्वमित्यादि। एवं च क्षयादिलिङ्गदर्श-
ने पूर्वकृतस्यापि प्रायश्चित्तविधानं
587 कर्तव्यं इत्येवमर्थ उपदेशः। पापकर्मणा
लिप्यत इति वक्तव्ये यात्यग्रहणं

धर्मोऽपि लोकनिन्दितश्चेदधर्मो भवती-
ति ज्ञापनार्थम्। तथाच मनुः —
परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ।
धर्मं चाप्यसुखोदर्कं लोकसंक्रुष्टमेव च॥
इति॥ याज्येनेति विसमासो यद्यप्यात्म-
ना न कृतम्। तथापि परैर्गर्हितत्वा-
दभिशंसनमात्रेणापि प्रायश्चित्तं भव-
तीति ज्ञापनार्थम्। तथाच वसिष्ठः-
ब्राह्मणमनृतेनाभिशस्य पतनीये नो-
पपतनीयेन वा मासं [मप्य] भक्षः शुद्धवतीरा-
वर्तयन् पूतो भवतीति विज्ञायते। एते-
नैवाभिशस्तो व्याख्यात इति कथं या-
ज्येन कर्मणा लिप्यत इति चेत्तदुच्यते।
588 तत्साधनासेवनात्। किं तत्साधनमिति
चेत्तदाह —
॥ यथैतदयाज्ययाजनमभक्ष्य-

भक्षणमवद्यवदनं शिष्टस्याक्रि-
या प्रतिषिद्धसेवनमिति ॥

यश्चैतदिति दृष्टान्तार्थः। अयाज्ययाज-
नं पतितानां याजनम्। अभक्ष्यभक्षणं
लशुनादीनां भक्षणम्। अवद्यवदनमव-
द्यस्यानृतादेर्वदनम्। शिष्टस्य विहित-
स्य नित्यस्य सन्ध्योपासनादेरक्रिया-
करणं प्रतिषिद्धस्य हिंसादेस्सेवनं क-
रणं इति ॥

करणं परिसमाप्त्यर्थं एतावदेवाधर्मसा-
धनमिति। ततश्चापद्यप्यनुष्ठाने प्राय-
श्चित्तसिद्धिः तत्राभ्यनुज्ञातं याजना-
ध्यापनप्रतिग्रहास्सर्वेषामिति। तथा
भक्ष्यभक्षणमपि भक्ष्याभक्ष्यवर्गानुप-
589 दिष्टानामापद्यनुज्ञातम्। आपद्यनृतम-
पि स्मृत्यन्तरेऽभ्यनुज्ञातं यथाह व्याघ्रः —

यस्योत्क्रमात्मनः पीडा नितान्तं भवतीति चेत्।
तत्र वक्तव्यमनृतं व्याघ्रस्य वचनं यथा॥

इति। अनुज्ञानसामर्थ्याल्लघुतरं प्रायश्चित्तं द्रष्टव्यम्। तदपि प्रथमकल्पाच्चतुर्थभागं, यथाहोशना —

आपद्विहितैः कर्मभिरापदं तीर्त्वा पुनस्तेषां प्रायश्चित्तचतुर्भागं कुर्यादिति।

(सू)॥ तत्र प्रायश्चित्तं कुर्यान्न कुर्यादिति मीमांसन्ते॥

तत्र तस्मिन्नाप्यकर्मसंबन्धे तन्निर्यातनार्थं प्रायश्चित्तं कर्तव्यमिति विचारयन्ति॥ ॥ब्रह्मवादिनः। कुर्यादित्येके॥ तावदुपपत्तिबलात् [illegible] कुर्यादित्याहुः॥

आपत्कल्पविषये तावद्विधीयमान-
590 त्वादेव न दोषः। अनापद्यपि विहिताकरणे प्रतिषिद्धसेवने वा प्रायश्चि-

त्तमनर्थकम् । कुतः —

॥ न हि कर्म क्षीयत इति ॥

हि शब्दो यस्मादर्थे । यस्मात्कृतं कर्म फलप्रदानमन्तरेण न क्षीयते प्रायश्चित्तैः । ततश्चात्मसंस्थमाविनाशात् फलं ददाति तथा च शास्त्रं :—

यथा पृथिव्यां बीजानि रत्नानि निधयो यथा ।
एवमात्मनि कर्माणि तिष्ठन्ति प्रसवन्ति च ॥

इति । तत्फलदानोत्तरकालं स्वयमेव विनश्यति बीजस्येवाङ्कुरोत्पत्तौ तथा च श्रुतिः — पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति । — न चेह केवलं सुखोपभोगः । कस्य चिदुपलभ्यते । येनानुमीयेतास्य प्रायश्चित्तेनाशुभः

59। क्षपित इति । यानि तु श्रौतानि प्रायश्चित्तानि भिन्ने जुहोति स्कन्ने जुहोतीत्येव-

मादीनि तानि निमित्ते कर्माङ्गानि
न दोषनिर्घातार्थानि लोके विद्धस्य
दिग्धस्य जलादिना कार्यसामर्थ्या-
पादनं क्रियते न पूर्ववत् प्रत्यापत्तिः।
न चाशुभस्यात्मानं व्याप्यावस्थित-
स्यापनोदः शक्यते कर्तुमुदकव्या-
पिन इव लवणस्य। प्रायश्चित्तजनितेन
धर्मेणाधर्मोऽभिभूयते। न तु विनाश्यते।
औष्ण्येनेवोदकशीतत्वं। पुनरपि
शीतभावदर्शनात्॥

॥ कुर्यादित्यपरम्॥

512 प्रायश्चित्तमिदं परं दर्शनं नास्मात्पर-
मन्यदित्यपरं सिद्धान्तमित्यर्थः।
आपत्कल्पधर्मानुष्ठाने तावद्वचनेन वि-
धीयमानस्य वचनान्तरेण प्रायश्चित्त-
मपि दर्शितम्। अनापद्यपि प्रायश्चित्त-

मर्थवदेव कथं जपादिनिमित्तदुःखो-
पभोगेनैव क्षपयतीति तत्कारणजपादि-
निमित्तस्य दुःखानुभवस्य दैर्घ्यकालिको-
ऽपि अल्पकालेन क्षीयत एव। यथा दैर्घ्य-
कालिको रोगोऽप्यल्पकालिकयथो ~~क्षयेन~~ पथ्येन।
कथं पुनरिदमवगम्यते।
यथा प्रभूतदुःखफलो धर्मोऽल्पेन दुःखो-
पभोगेन क्षीयत इति। आगमार्थं च दर्शयति॥

॥ पुनः स्तोमेनेष्ट्वा पुनस्सवनमा-
593 यान्तीति विज्ञायते, व्रात्यस्तो-
मैश्चेष्ट्वा, तरति सर्वं पाप्मानं
तरति ब्रह्महत्यां योऽश्वमेधेन
यजते, इत्यग्निष्टुताभिशस्य-
मानं याजयेदिति च॥

अयमस्याभिप्रायः। आगमगम्य एवायम-
र्थः। इदं धर्मसाधनं इदं धर्मसाधनमस्मि-

न कृतेऽधर्मः क्षीयत इति नोपपत्ति-
गम्यं प्रत्यक्षप्रमाणान्तराविषयत्वात्।
तेन या उपपत्तय उक्ताः प्रायश्चित्ता-
नारम्भे तास्सर्वा आगमविरोधादेव
निरस्यन्ते। न हि घटस्य छिद्रितस्य
(ज)
जलादिना प्रतिपूरणेन प्रत्यापत्तिरस्ती-
ति॥ तत्रोच्यते॥ - तत्र हि योग्यता-
पादनमात्रमेव विवक्षितम्। न तु घटो-
त्पत्तिरित्यविरोधः।
प्रायश्चित्तेन चाधर्मक्षयद्वारेण पुरुष-
स्य योग्यतैव क्रियते इति। यत्तूक्त-
व्यापिलवणवदात्मानं व्याप्याधर्मो-
594 पनयनमशक्यमिति। तद्वस्त्ररागा-
स्य एव क्षारादिभिरपनयनवदविरुद्ध-
म्। यस्त्वाभिभवाक्तः असावपि सर्व-
पाप्मानं तरतीत्यनेन एव श्रुतिवच-

नेनैव निरस्तः॥ — यद्यभिभवमात्रं
क्रियते तदा तरतीति वाच्यो युक्त्यनुप-
पत्तिः। यत्तु कर्माङ्गानि प्रायश्चित्तानीति
तन्न सर्वत्र। यत्र हि निमित्तं विहिताक-
रणं प्रतिषिद्धसेवनं वा तत्र तद्दोष-
निर्घातार्थाय। यथा तरति ब्रह्महत्यां
योऽश्वमेधेन यजत इत्यादि। यत्र तु-
तदुभयं नास्ति तत्र निमित्ते कर्माङ्गमिति।
ननु च यद्ययमर्थः आगमेन सा-
ध्यते, तदेकमेवोदाहरणं युक्तम्। उ
उदाहरणबहुत्वे प्रयोजनं वक्तव्यमिति।
उच्यते। विषयभेदप्रदर्शनार्थः। अने-
595 कोदहरणोपन्यासः पुनःस्तोमोदाहर-
णेन तावदेतत्प्रदर्शयति। अग्राह्य-
प्रतिग्रहदोषो विनश्यतीति। अप्रति-
ग्राह्यं बहु प्रतिगृह्य पुनस्तोमेन यज-

तीति श्रुतौ अप्रतिग्राह्यवचनं अभक्ष्य-
भक्षणावद्यवदनयोरपि प्रदर्शनं-
अवद्यवदना भक्ष्यभक्षणं पुनस्तोमेन
तरतीति श्रुत्यन्तर प्रदर्शनात्। ततश्च
तैर्यदा सर्वकर्मानधिकृतो भवति, तदा
पुनः स्तोमैनैकाहैनेष्ट्वा पुनस्सवन-
मायान्ति। पुनस्सवनशब्देन कर्मो-
च्यते।- पुनस्तदापत्तिः। पुनरपि
श्रौतस्मार्तकर्मयोग्यो भवतीत्यर्थः।
आयन्तीति बहुवचनमभक्ष्यभक्षणा-
वद्यवदन प्रदर्शनार्थं विज्ञायत इति
श्रुति सूचनार्थः।
व्रात्यस्तोमैश्चेष्ट्वा चकारः पुनस्सवन-
मायन्तीत्यस्यानुकर्षणार्थः। व्रात्यस्तो-
मैरिति बहुवचनं चत्वारो व्रात्यस्तोमाः
श्रुतिप्रसिद्धा इति ज्ञापनार्थम्।

ब्राह्मणानामातीतोपनयनकालः - तेन युज्-
माणत्वात् ब्राह्मस्तोमः तथाच वसिष्ठः -
पतितसावित्रीकः उद्दालकव्रतं चरेत्।
द्वौ मासौ यावकेन वर्तयेत्। मासं पय-
सार्धमासमामिक्षया ष्टरात्रं घृतेन, ष-
ड्रात्रमयाचितं हविष्यं भुञ्जीतात्रिरात्र-
596 मब्भक्षो ऽहोरात्रमुपवसेदश्वमेधावभृ-
थं वा गच्छेत् ब्राह्मस्तोमेन वा यजेतेति।
ब्राह्मग्रहणमप्युपपातकोपलक्षणम्।
आपद्धर्माणां प्राग्दुर्बलात्वात् हो हन्त्रब्रह्मो-
ज्वतन्मात्रकद्वकीर्णो पतितसावित्री-
केषूपपातकमिति ब्राह्मस्योपपातकम-
ध्ये पाठात् ब्राह्मस्तोमेनोपपातकं विन-
श्यतीति श्रुत्यन्तरदर्शनात्।
एवं चानेनोपपातकदोषो विनश्यतीति
प्रदर्शितम्। तरति सर्वं पाप्मानं

तरति ब्रह्महत्यां योऽश्वमेधेन यजते। इति।
सर्वं पाप्मानं तरतीत्यनेन विहिताकरणे
प्रतिषिद्धसेवने च यत्पापं तस्य विना-
शं दर्शयति। ब्रह्महत्यामपि तरति महा-
पातकजस्यापि ब्रह्महत्याया सर्वाधर्म-
गरीयस्त्वज्ञापनार्थं पृथगभिधानम्।
597 अन्यथा प्रतिषिद्धसेवनेन गृह्यमाण-
त्वात्। तथाच व्यासः —
ब्रह्महत्याश्वमेधाभ्यां न परं पुण्यपापयोः॥
इति। अग्निष्टुताभिशस्यमानं याजये-
दिति। च। अग्निष्टुदाहरणेन देहान्त-
राधर्मनिमित्तदोषक्षयं दर्शयति। अभि-
शंसनं विना पुरुषकारेण भवतीति।
चकारस्सर्वत्र विज्ञायत इत्यनुकर्षणा-
र्थः। इतिकरणः पृथक्स्मृत्यन्तरसू-
चनार्थम्। एवं सर्वविषयेऽपि श्रुति-

दर्शनात् प्रायश्चित्तं कर्तव्यमेव ॥

ननु च वचनगम्येऽर्थे योऽयं विचारः करणाकरणयोः प्रायश्चित्तस्य सः नोपपद्यते । — यदि क्षीयते उपनयनं ब्राह्मणस्येत्यतः प्रभृति कर्तव्यमित्युच्यते । महापातकानामभ्यासे समुच्चये
598 च प्रायश्चित्तानामभावज्ञापनार्थोऽयं विचारः । महापातकानामभ्यासे समुच्चये च प्रायश्चित्तं न कर्तव्यं, नहि कर्म क्षीयते इति श्रुत्यन्तरदर्शनात् पृथक् पृथक् कर्तव्यमिति । एवं चान्येषामुपपातकादीनामभ्यासे समुच्चये च प्रायश्चित्तं भवति ।

एके ब्रुवते प्रायश्चित्तस्तुत्यर्थोऽयं विचार इति ॥

अपरे ब्रुवते । अकाम कृत एव

प्रायश्चित्तं न कामकृत इति। तदयुक्तं-
मत्ताबार्धिगमने कृच्छ्राब्दः ज्ञान-
पूर्वं च त्रिरात्रं दोपवाति च कर्मण्य-
भिसन्धिपूर्वेऽपि इत्यादिभिर्विरोध-
प्रसङ्गात्॥

अन्ये ब्रुवते। कामकारस्य गुरु-
त्वख्यापनार्थोऽयं विचारः। इति।
तदप्ययुक्तम्। अथ खल्वयं पुरुष इ-
त्यत्रैव तु ज्ञापितत्वात्॥

599 ॥ तस्य निष्क्रयणानि जपस्त-
पो होम उपवासो दानम्॥

तस्य याप्यस्य कर्मणस्तस्य निष्क्र-
यणानि संशोधनार्थानि। यथैव लोके
कांस्यादीनां भस्मादीनि संशोधनानि
एवमेते अधर्मिणामिति। तस्येहसति
सन्देहः स्यात्। किं पुनः स्तोमादीनि

उत जपादीनि । जपो वक्ष्यमाणस्योप-
निषदादेरभ्यासः प्रकाशोक्त पांशु-
मानसलक्षणः । तथाच मनुः —
विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः ।
उपांशुः स्याच्छतगुणस्साहस्रो मानस
स्मृतः ॥ इति ॥
तपो वक्ष्यमाणं ब्रह्मचर्यादि । होमः आ-
ज्यादेर्द्रव्यस्य व्याहृत्यादिमन्त्रपूतोऽ
ग्नौ प्रक्षेपः ॥
उपवास इन्द्रियाणां सर्वेषां संयमनम् ।
600 तथा पौराणिकाः —
व्यावृत्तस्यैव पापेभ्यस्सहवासो गुणैर्हि यः ।
उपवासस्स तु स्सुविज्ञेयो न शरीरस्य शोषणम् ॥
तत्तु तपोमध्ये शाकं पचति तदसन्त-
भक्तपरित्यागः क्लेशाकैस्सहोपदेशाद-
नाशक इत्युक्तत्वाच्च । दानं हिरण्या-

डेर्द्रव्यस्य । विसमास एकैकस्य नि-
ष्क्रयणज्ञापनार्थम् ॥ तत्र तावत्
जपस्वरूपमाह —
॥ उपनिषदो वेदान्तास्सर्वच्छ-
न्दस्सु संहिता मधून्यघमर्षण-
मथर्वशिरो रुद्राः पुरुषसूक्तं
राजनरौहिणे सामनी बृहद्र-
थन्तरे पुरुषगतिर्महानाम्न्यो
महावैराजं महादिवाकीर्त्यं ज्ये-
ष्ठसाम्नामन्यतमं बहिष्पवमानं
कूष्माण्डानि पावमान्यस्सा-
60। वित्री चेति पावनानि ॥
उपनिषदो रहस्यब्राह्मणानि । वेदान्ताः
आरण्यकानि । सर्वच्छन्दस्सु सर्वप्रवच-
नेषु संहितानि पदानि क्रमो वा । सर्वच्छ-
न्दः स्थिति विशेषणं, न स्वशाखायामे-

वेति। मधूनि = 'मधुवाता ऋतायते' इत्या-
दीनि मधुशब्द (युक्तानि) उक्तानि। अघमर्षणं
'ऋतं च सत्यं च' इत्यादि। अथर्वशिरोऽथ-
र्ववेदे प्रसिद्धम्। रुद्रादि 'नमस्ते रुद्रम-
न्यव' इत्यादि रुद्रशब्दयुक्ताः। पुरुष-
सूक्तं 'सहस्रशीर्षा पुरुष' इत्यादि।
राजनरौहिणे सामनी 'इन्द्रं नरो ने-
मधिता हवन्त' इत्यस्यामृचि गीते। यज्ञ- (ज्ञ)
फोरप्येवं रूपत्वात्सामग्रहणं। बृहद्वा-
मिद्धि हवामह इत्यस्यां, रथन्तरमभि -
6·2 त्वा शूर नोनुम' इत्यस्यां, एते आविगी-
तपुरुषगति 'रहमस्मि प्रथमजा ऋतस्ये'-
त्यस्यां गीतम्। महानाम्न्यो 'विदामघ-
वन्नि'त्यस्यां साम, महावैराजं 'पिबा
सोमम'भि यमि'त्यस्यां, महादिवाकीर्त्यं
'पिब्रा इवबृहा पिबा वि'त्यस्यां साम ज्येष्ठ-
वि-

साम्नां 'शं नो देवीरभिष्टये' 'देवानां मिदम्न-
योस्साम'त्रये चैकं बहिष्पवमानं 'उपा-
स्मै गायता नर' इत्याद्याः। कूश्माण्डानि
'यद्देवा देवहेडनं' मित्यादीनि यजूंषि।
पावमान्यः पावमानलिङ्गानि 'स्वादिष्ठ-
या मदिष्ठये'त्यादीनि। सावित्री प्रसिद्धा।
चशब्दोऽनुक्तोपसंग्रहार्थः। इन्द्ररुद्र-
रुद्रादीनि स्मृत्यन्तरे द्रष्टव्यानि।
इतिशब्दः प्रकारवाची। एवं प्रकार-
एवेति। ततश्च स्मृत्यन्तरपठितानां
603 शिवसंकल्पादीनामेवं द्रष्टव्यम्।
न चापठितानां श्रीसूक्तादीनाम्।
विसमासः एकैकस्य पावनत्वज्ञाप-
नार्थः॥

ननु जपस्य निष्क्रयणेनोक्तत्वात्
तत्साधनत्वाच्चैतेषां पावनत्वं सिद्ध-

मेवेहतस्तदनर्थकं पावनग्रहणम्।
उच्यते। निमित्तादन्यत्राप्येषां पवित्रत्वज्ञापनार्थं पावनग्रहणमिति। इदानीं जपप्रवृत्तस्याहारनियममाह —

॥ पयोव्रतता शाकभक्षता फलभक्षता प्रसृतयावको हिरण्यप्राशनं घृतप्राशनं सोमपानमिति मेध्यानि ॥

पयोव्रतता क्षीराहारता। व्रतग्रहणादु-
पवासन्यायो द्रष्टव्यः। शाकं प्रसिद्धम्।
फलमाम्रादि। प्रसृतयावकः प्रकरणा-
त्प्रसृतयावकाशनमिति वक्तव्ये ऽव-
604 मभिधानं स्मृत्यन्तरोक्तविध्युपसंग्रहा-
र्थः। यथाहोशना — शुचिर्भूत्वोदिते-
षु नक्षत्रेषु ताम्रभाजनं प्रसृतयावकं

श्रपयेत्। यथा यवाग्रूर्भवति। तस्मि-
न् श्रपणकाले रक्षां कुर्यात्। नमो रुद्रा-
य भूताधिपतये पर्वतानां पतये त्वामि-
मां रक्षस्व इत्यनेन मन्त्रेण ततः स्त्र-
णवेनारोप्य देवस्य त्वा सवितेत्यादिना
सूर्यगायत्र्याभिघार्य ततोऽभिमन्त्रयेत। —
यवोऽसि धान्यराजोऽसि वारुणो मधुसंयुतः।
निर्णोदस्सर्वपापानां पवित्रमृषिभिः स्मृतम्॥
वाचा कृतं कर्मकृतं मनसा दुर्विचिन्तितम्।
अलक्ष्मीं कालकर्णीं च सर्वं पुनत मे यवाः॥
महापातकसंयुक्तं दारुणं राजकिल्बिषम्।
6.5 बालवृत्तमधर्मं च सर्वं पुनत मे यवाः॥
सुवर्णस्तैन्यमव्रात्यमयाज्यस्य च याजनम्।
ब्राह्मणानां परीवादं सर्वं पुनत मे यवाः॥
श्वसूकरावधूतं च काकाद्युच्छिष्टमेव च।
मातापित्रोरशुश्रूषां सर्वं पुनत मे यवाः॥

गणान्नं गणिकान्नं च शूद्रान्नं श्राद्धसूतके।
चोरस्यान्नं तथा भक्ष्यं सर्वं पुनत मे यवाः॥
इत्येतैः षड्भिः ततो ब्रह्मा देवानामिति
प्राश्य ततः प्राणा यथाकामं सर्वं प्रा-
श्नीयात् षड्रात्रं ततो नियमातिक्रम-
जात्प्रतिषिद्धसेवनजाद्भक्ष्यभक्षण-
जादुपपातकजाच्च सर्वस्मात् पापात् प्र-
मुच्यते। सप्तरात्रं पीत्वा भ्रूणहत्यां गुरु-
606 तल्पं सुवर्णस्तेयं सुरापानानि पुनाति।
एकादशरात्रं पीत्वा पूर्वकृतमपि पापं निर्णु-
दति। एकविंशतिरात्रं पीत्वा गणान् पश्य-
ति। गणाधिपतिं पश्यति विद्यां पश्यति
विद्याधिपतिं पश्यति। एवमहरहरन-
न्याहारो यवागूं प्राश्नीयात्। प्राश्नी-
यादिति हिरण्यादीनि प्रसिद्धानि।
इतिकरणेन प्रकारवाचिनामन्येषां

पञ्चगव्यादीनामपि भक्षणं द्रष्टव्यम्।
पुनः पुनः क्रियापदाभ्यासमेकैकस्य
मेध्यत्वज्ञापनार्थं विसदृशक्रियाप-
दोपादानं च। मेध्यवचनमन्यत्रा-
भ्युदयार्थेषु मेध्यत्वज्ञापनार्थम्॥
इदानीं जपादीनां स्थानमाह —
॥ सर्वे शिलोच्चयास्सर्वास्स्रव-
न्त्यः पुण्या ह्रदास्तीर्थान्यृ-
षिनिवासा गोष्ठपरिस्कन्धा
इति देशाः॥
शिलोच्चयाः पर्वताः। उपरिष्टात् पुण्या-
607 इत्युपादानादपुण्यानामपि ग्रहणार्थं
सर्वग्रहणं पुण्याः कैलासादयः। अपु-
ण्या अविवक्षिताः। पुण्यनद्यो गङ्गाद-
यः। अपुण्याः क्षुद्रनद्यः। पुण्या ह्रदाः
अशोव्याः पुष्करादयः। तीर्थानि

कन्यातीर्थादीनि । ऋषिनिवासा वसिष्ठा-
द्याश्रमाः । गोष्ठं प्रसिद्धम् । परिस्कन्दं
देवालयम् ॥ —

सुराणां च परिस्कन्दं ब्राह्मणं च वनस्पतिम् ।
कुर्यात्प्रदक्षिणं नित्यं वाराहं वामनं तथा ॥
इति शिष्टस्मरणात् । इतिकरणमन्ये-
षां पुण्यानामरण्यादीनामुपलक्षणम् ।
एवं च नैमिषा(षा)रण्यादयो द्रष्टव्याः ।
विसमासः उक्तप्रयोजनः ॥

इदानीं तपःस्वरूपमाह —

॥ ब्रह्मचर्यं सत्यवचनं सवनेषूदको-
608 पस्पर्शनमार्द्रवस्त्रताधःशायिता-
नाशक इति तपांसि ॥

ब्रह्मचर्यादि प्रसिद्धम् । सवनशब्देन पूर्वा-
ह्णमध्यंदिनापराह्णान्युच्यन्ते । बहुवच-
नादितिकरणं प्राणायामादीनामुप-

सङ्ग्रहार्थम्। तथाच कवर्षः — उपस्थ-
वड्बाहुमनोवाक्श्रोत्रत्वग्घ्राणचक्षु-
र्जिह्वाकृतानां पापानामहरहस्सायं
प्रातस्त्रींस्त्रीन् प्राणायामान्धारयेत्।
शूद्रान्नभोजनतत्स्त्रीगमनतज्जातिग्र-
हेषु समुच्चितेषु सप्ताहं सप्त सप्त प्रा-
णायामान्धारयेत्। पृथक् पृथक् त्र्यह-
मभक्ष्याभोज्यापेयापेयालेह्यानां प्रा-
शने अपण्यानां मधुमांसघृततैलला-
क्षालवणदधिक्षीरवर्जितानां विक्रये
609 च द्वादशाहं द्वादश द्वादश प्राणाया-
मान्धारयेत्। उपपातकेष्वर्धमासं द्वा-
दश द्वादश प्राणायामान्धारयेत्।
पातकसमानाः चतुर्मासं द्वादश द्वादश
प्राणायामान्धारयेत्। अथ पतितानां
षण्मासं द्वादश प्राणायामान्धारयेत्।

गुरुतल्पसमानां संवत्सरं द्वादशा द्वा-
दश प्राणायामान्धारयेत्।
अथाप्युदाहरन्ति सव्याहृतिकाः सप्रण-
वाः प्राणायामास्तु षोडश अपि भ्रूण-
हनं मासात् पुनन्त्यहरहः कृता इत्येव-
मन्येषामाजस्रिकाणां जपाणां(नां)
कालविशेषो विज्ञातव्यो विज्ञातव्यः।
इति। तथा च पौराणिकाः —
प्राणायामं ब्रह्मचर्यं मौनं चैव निराशनम्।
इत्येतत्तपसो रूपं ध्यानं च परमेष्ठिनः॥
6.0 इति। होमाः कूश्माण्डगणहोमादयः
स्मृत्यन्तरे प्रसिद्धाः। यथाहोशना —
अगम्यगमने सुवर्णस्तेये निक्षेपाप-
हरणे गर्हिताशाद्यभक्षणे पर्वमैथुने
रजस्वलाभिगमने ऽयाज्ययाजने
पौर्णमास्यां लुप्तकेशनखश्मश्रुस्ततः

प्रभृति कूश्माण्डैर्जुहुयात् चतुर्भि-
स्ससकृत् घृतं सप्ताहं द्वादशाहमर्द्ध-
मासमिति यथाकर्माभ्यासः पातकोप-
पातकपातकसममहापातकानामन्येषां
च सर्वेषां पापानामपि गणहोमं कुर्या-
त्। सकृत्करणे नापि सर्वं तरतीति किं
पुनरभ्यासेनेति ॥ -अथाप्युदाहरन्ति-
वैश्वानरीं व्रातपतिं पवित्रेष्टिं तथैव च।
वृ ८॥ ऋतावृतौ प्रयुञ्जानः पुनाति दश पूरुषम् ॥
इति। विज्ञायत इति प्रसिद्धत्वादेवा-
ङ्गानुपाङ्गानम्। तथोपवासस्यापि
इदानीं दानसाधनं दर्शयति —
॥ हिरण्यं गौर्वासोऽश्वो भूमि-
स्तिला घृतमन्नमिति देयानि ॥
हिरण्यादीनि प्रसिद्धानि। इतिकरणं र-
त्नादीनामप्युपसङ्ग्रहार्थम् ॥

कालमिदानीमाह—

॥ संवत्सरः षण्मासश्चत्वारस्त्रयो द्वावेकश्चतुर्विंशत्यहो द्वादशाहः षडहस्त्र्यहोरात्रा इतिकालः ॥

इतिकरणात् केवलं रात्रिरहश्च गृह्यते। इदानीं प्रतिपाद्यमानस्य प्रायश्चित्तोपदेशो ह्यशक्य इत्याह—

॥ एतान्येवानादेशे विकल्पेन क्रियेरन् ॥

८।१ (सू)श॥ एनसि गुरूणि गुरूणि लघुनि लघुनि ॥

एतान्येव जपादीन्येवेत्यवधारणार्थः। यदि ह्येतान्यनादेशात् इत्येतावदुच्यते। यत्र स्वशब्देन प्रायश्चित्तानि नोपदिष्टानि तत्रैव जपादीनां कल्पना स्यात्। एतावदुपदिष्टेऽभ्यासादौ प्रतिपूरणासिद्धिः। अनादेशे यत्रान्यप्राय-

श्चित्तं नोक्तमित्यर्थः। अनादेश इत्यस्ये-
त्यादिष्ट एव तैस्सह भवतीति विकल्पेन
विविधाभिः कल्पनाभिरित्यर्थः।
क्वचिज्जप एव क्वचित्तप एवेत्यादि।
क्रियेरन्निति असति यथोपदिष्टानां
जपादीनां द्विसमुच्चय त्रिसमुच्चयादिना
विकल्पेन स्यात्। एवं च क्वचिज्जपः क्वचि-
613 त्तपश्च दानं चेत्यादिकल्पनासिद्धिः।
क्व पुनरेषां कल्पनेत्यत आह -
एनसि पापे गुरूणि महति गुरूणि म-
हान्ति प्रायश्चित्तानि। कथमधर्मस्य
गुरुलघुभावं विज्ञायत इतिचेत्।
उच्यते। अभिसन्ध्यनभिसन्ध्यभ्या-
सादिभिः। यथाहापस्तम्बः —
यः प्रमत्तो हन्ति प्राप्तं दोषफलं सहस-
ङ्कल्पेन भूय एवमन्येष्वपि दोषवत्सु

तथा पुण्यफलेषु यथा कर्माभ्यास इति।
यत्र तु प्रतिषेध एव केवलस्तत्रापि राज-
दण्डापेक्षया स्मृत्यन्तरे वा निन्दार्थवाद-
फलविपाककथनेन पीडातिशयाद्य-
पेक्षया वा गुरुत्वादि वेदितव्यमिति॥

॥ कृच्छ्रातिकृच्छ्रौ चान्द्रायण-
मिति सर्वप्रायश्चित्तम्॥

614 कृच्छ्रादिस्वरूपं वक्ष्यति। सर्वप्रायश्चि-
त्तं न केवलमनादेशेऽपीत्यर्थः। सामर्थ्या-
द्यपेक्षया गुरूणि लघूनि चेति वा प्रका-
शे रहस्ये वेति चान्द्रायणस्य पृथक्त्वा-
भिधानम्। कृच्छ्रातिकृच्छ्रयोः स्थाने
चान्द्रायणस्य केवलस्यैव कल्पनार्थम्।
एवं च तस्यापि स्थाने तयोरपि कल्प-
नासिद्धिः।
व्यस्तानामपि प्रवेशः यथा स्यादिति

सर्वग्रहणं कृच्छ्रातिकृच्छ्रौ संभूय स-
र्वप्रायश्चित्तौ केवलं चान्द्रायणमपि
सर्वप्रायश्चित्तम्। एकवचनं समस्ता-
नामपि कल्पनार्थम्॥

केचिदितिकरणं परा तस्याप्युप-
सङ्ग्रहार्थं व्याचक्षते। यथाह मनुः—

६।५ यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम्।
पराको नाम कृच्छ्रोऽयं सर्वपापप्रणाशनः॥
इति। प्राजापत्यचान्द्रायणयोःस्थाने
पराको द्रष्टव्यः। कुतः। तुल्यदण्डदर्श-
नात्। यथाह लोकाक्षिः—

त्रयस्त्रिंशत्पणानां तु प्राजापत्यस्य दापयेत्।
शतं सपादं दाप्यं स्यात्तथा सान्तपनस्य च॥
अतिकृच्छ्रस्य च तथा सप्तपाष्टे चतुःशतम्।
कृच्छ्रातिकृच्छ्रयोः पयोः पणवं च शतं तथा॥
त्रयस्त्रिंशाधिकं दण्डमिसाहुर्ब्रह्मवादिनः॥
दापयेत्त्र पराकस्य पणपंचशतं तथा।

इति। प्रायश्चित्तं निष्क्रयणमित्यर्थः। एवं
च सर्वनिष्क्रयणमिति वक्तव्यमिति चेत्
अत्रोच्यते।— यन्निष्क्रयणार्थं क्रियते
616 तस्य प्रायश्चित्तमिति संज्ञा भवतीति
अन्वर्थसंज्ञत्वात् गुरुसंज्ञाकरणम्।
यथाह व्याघ्रः—
प्रायो नाम तपः प्रोक्तं चित्तं संयत उच्यते।
तपस्संयमसंयुक्तं प्रायश्चित्तं विदुर्बुधाः॥
इति॥ ॐ।

इति मस्करीये गौतमभाष्ये
एकोनविंशोऽध्यायः॥

॥ ॐ ॥

याप्यकर्मसंबन्धे प्रायश्चित्तविधिरुक्तः।
तत्र यदि पिता याप्यकर्मसंबन्धी भ-
वति, तदा पुत्रः किं कुर्यादिति। अत आह—

॥ त्यजेत्पितरं राजघातकं शूद्र-
याजकं शूद्रार्थयाजकं वेद-
६१७ विप्लावकं भ्रूणहनं यश्चान्त्या-
वसायिभिस्सह संवसेदन्त्या-
वसायिन्याम् ॥

त्यजेद्वक्ष्यमाणेन विधिना पितरमिति।
पितृवचनाद्दण्डापूपिकया पुत्रादीनाम-
र्थसिद्धस्त्यागः। – राजघातकं राजानं
न्यायवृत्तमभिचारेण यो हिनस्ति
स त्यक्तव्यः। एवं चान्यायवृत्तमभि-
चारेण प्रमापयतो नास्ति त्यागः।
तथाच पुराण उक्तम्॥ —

चातुर्वर्ण्यं हतं तेन यो हिनस्ति महीपतिम्।
कलिकार्यस्स सर्वेण पापकर्मा न मन्त्रतः॥

इति। यत्तर्हि वक्ष्यति न कर्हिचिन्माता-
पित्रोरवृत्तिरिति तदतोऽन्यत्र द्रष्टव्यम्।

शूद्रयाजकं शूद्रस्य निषादस्थपती-
ष्टिं करोति तस्येष्टिविधानात्। एवं तर्हि
618 भ्रूणहत्यायां सर्वस्वचोदनावद्द्रष्टव्यम्।
शूद्रार्थयाजकं यः शूद्रादधिगम्यार्थं
यागं करोति। यथाह मनुः — ये शूद्रा-
दधिगम्यार्थमित्यादि। वेदविप्लावकम-
नध्याप्याध्यापकं, भ्रूणहा ब्रह्महा।
तद्ग्रहणं पतितत्वोपलक्षणम्। यथाह मनुः—
पतितस्योदकं कार्यं सपिण्डैर्बान्धवैर्बहिः।
निन्दितेऽहनि सायाह्ने ज्ञात्यृत्विग्गुरुसंनिधौ॥
इति। यश्चान्त्यावसायिभिः सह संवसेत्।
अन्त्यावसायिनश्चण्डालादयः। यथाहा-
619 ङ्गिराः —
चण्डालः श्वपचः क्षत्ता सूतो वैदेहिकस्तथा।
मागधायोगवश्चैव सर्वे ह्यन्त्यावसायिनः॥
इति। तैः सहैकत्र स्थाने वसति। चकारा-

चाक्रियादिभिश्च। यथाह कण्वः—
चाक्रिकः पुल्कसो जम्भः स्वरजीवी-
प्रदीपकः। एते च इन्द्रप्रसवा अस्पृ-
श्याः परिकीर्तिताः॥ इति॥
अन्तावसायिन्या वसेदिति संबन्धः।
तया सह मैथुनमाचरतीत्यर्थः। अथ
किमेतेषु राजघातकादिषु निमित्तेषु सत्सु
पतितत्वं संभवति। उत नवेति सन्देहः।
किञ्चातः। यदि तावद्भवति ततो ब्रह्म-
हसुराप इत्येवैषां पाठं कृत्वा स्वे-
च्छितरं पतितमित्येतावदेव वक्तव्यम्।
62. एवं चेह भ्रूणहनमिति न वक्तव्यम्।
भविष्यतीति। अथ न भवति। तत्रापति-
तत्यागो न युज्यते। स्मृत्यन्तरेऽपि प-
तितत्वसंनियोग एव त्यागविधिरुक्तः।
तथा च हारीतो मानवश्लोकः पतितस्यो-

इत्यं चेद्यमित्यत्रोच्यते।
पतितं तावत् भवत्येषु निमित्तेषु तथापि
पातकमध्ये न पठितः। प्रायश्चित्तलाघ-
वार्थम्। भ्रूणहाग्रहणेन तु तत्साम्य-
मापादनं तत्समप्रायश्चित्तार्थज्ञापनार्थ-
म्। यत्र तु समीक्रियते तत्र हीनतापि
गम्यते। यथा राजसमो मन्त्रीति।
येषां मध्ये केषांचित्प्रायश्चित्तं विधी-
यते राजन्यवधे षड्वार्षिकं प्राकृतं
ब्रह्मचर्यमित्यादि। तथान्तावसायिनी-
गमने कृच्छ्राब्द इति येषां नोपलभ्य-
62। ते तेषां सर्वप्रायश्चित्तं कल्प्यम्। एवं
सर्वत्र स्वीकरणविषये सर्वप्रायश्चित्त-
मेव द्रष्टव्यम्। एवं तर्हि तुल्यप्राय-
श्चित्तत्वात् कूटसाक्ष्यादीनामिह
पाठः प्रसज्येतेति चेदुच्यते॥

एतेष्वेव निमित्तेषु पिता सक्तव्यो नान्यत्रेति भेदारम्भः॥

अत्र राजघातकादिष्वबुद्धिपूर्वेऽपि पतितत्वं द्रष्टव्यम्। कुतः। सहोपदिष्टानां मध्ये एकस्याबुद्धिपूर्वविषयेऽपि पातित्यदर्शनात्। यथाह मनुः —

चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति॥

तस्येदानीं तस्य त्यागविधिरुच्यते —

॥ तस्य विद्यागुरून्योनिसंबन्धांश्च संनिपात्य सर्वाण्युदकदानादीनि प्रेतकर्माणि कुर्युः॥

622. तस्य त्याज्यस्य नाम्नः विद्यागुरवः आचार्यः गुरुरुपाध्यायः। बहुवचनप्रयोगात् त्रीनपि योनिसंबन्धान् मातुलमातामहादयः। तत्रापि बहुव-

चनमुक्तप्रयोजनम्। चकाराद्दृष्टलिङ्ग्या-
ज्यादयश्च संनिपात्य एकीकृत्य अंश-
मेवं कर्म युष्माभिरहमेनमिति प्रका-
श्य पुत्रादयो ज्ञातयः जीवत एव सर्वा-
ण्युदककदानश्राद्धादीनि प्रेतकर्माणि
कुर्युः॥

॥ पात्रं चास्य विपर्यस्येयुः॥
अस्य आज्यस्य पात्रं च विपर्यस्येयुः।
त एव ज्ञातयः विपर्यासोऽनुदकीकरणं
उदककदानेन समुच्चयार्थश्चकारः। श्राद्ध-
कर्मानन्तरं माभूदिति। ततश्चोदकानां
कृत्वा पात्रविपर्यासं च कृत्वा श्राद्धकर्म
कुर्यादिति द्रष्टव्यम्। कथं विपर्य-
स्येयुः इत्यत आह——
॥ दासः कर्मकरो वावकारादमे-
ध्यपात्रमानीय दासीघटात्पू-

रयित्वा दक्षिणामुखः पद्भ्यां
विपर्यस्येदमुमनुदकं करोमीति
नामग्राहः॥

623 दासो ध्वजाहृतादि। यथाह मनुः—
ध्वजाहृतो भक्तदासो गृहजः क्रीतदात्रिमौ।
पैतृको दण्डदासश्च सप्तैते दासयोनयः॥
इति। कर्मकरो भृतकः। संभवतश्चान-
योर्विकल्पः। अवकराद्दुर्चस्थानादशु-
चि पात्रं किञ्चिदादाय दासी:पारि
चारका तस्या घटात्पूरयित्वा अ-
नेनैवान्यत्र दासीघटस्याशुचित्वं
दृष्टव्यम्। दक्षिणाभिमुखो भूत्वा
पद्भ्यां=पादेन। विपर्यस्येदपसव्यमुत्सृ-
जेत्। अमुं देवदत्तमनुदकं करोमीति
मन्त्रमुक्त्वा अमुमित्यनेनैव नाम-
ग्राहस्य सिद्धत्वान्नामग्राह इति

विसृणार्थं न तूपांशु जपेदिति।
॥ तं सर्वेऽन्वालभेरन्प्राचीनावी-
६२४ तिनो मुक्ताशिखाः॥
तं दासं कर्मकरं वा सर्वे सपिण्डाः
न केवलं पुत्रा अन्वालभेरन् । संस्पृशे-
युः। प्राचीनावीतिनः : अपसव्ययज्ञोप-
वीतिनः। मुक्ताशिखाः : शिखां विमुच्य।
अस्मादेव ज्ञापकादन्यस्मिन्नाचमना-
दौ शुभकर्मणि मुक्ताशिखस्यायोग्य-
त्वं द्रष्टव्यम्।
॥ विद्यागुरवो योनिसंबन्धा-
श्च वीक्षेरन् ॥
न तु संस्पृशेयुरित्यर्थः। चकाराद्-
विगादयः॥
॥ अप उपस्पृश्य ग्रामं प्रविशन्ति॥
एवमिदं कर्म कृत्वा स्नात्वा गृहान्

गच्छन्ति। एकस्मिन्नेवाहनि श्राद्धादीनि गम्यन्ते गृहप्रदेशोपदेशाच्च बहिरिदं कर्तव्यम्॥

॥ अत ऊर्ध्वं तेनासंभाष्य तिष्ठेदेकरात्रं जपन्सावित्रीमज्ञानपूर्वम्॥
625 अतः सागादूर्ध्वं तेन सह संभाषणं कृत्वा अज्ञानादिदं प्रायश्चित्तं तिष्ठेदिति एकवचनात् ज्ञासादेरन्यो हि नाधिकारात् ज्ञासादय एकरात्रमेकमहोरात्रं तदहोरात्रं न भुञ्जीतेत्यर्थः॥।

(*) सावित्रीं जपन् ॥ ज्ञानपूर्वं च त्रिरात्रम्॥

यस्तु बाद्धिपूर्वं तेन सह संभाषेत स रात्रित्रयमेवं यथोक्तं विधानमातिष्ठेत्। तावच्चेतदेवं यावदसावकृत प्रायश्चित्तः कार्यान्तरसंभाषण इतीदं न पाथि प्रश्नादौ तस्मात्पाथि प्रश्नादौ पराशरे-

कं द्रष्टव्यम् ॥ —

वि क्षुते निष्ठीविते चैव दन्तस्पृष्टे तथैव च ।
पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेत् ॥

६२८ इति (न राजदण्डेन - एवं च ब्रुवतोऽ-
न्यत्र राजदण्डस्यापि शुद्धिकारण-
१ त्वमुक्तम् । एवं च ततश्चान्यत्र राज-
दण्डितस्यापि शुद्धिर्वेदितव्या । ~~[illegible]~~
१ ...चरितप्रायश्चित्त इत्यर्थः ॥) ७

॥ यस्तु प्रायश्चित्तेनैव शुध्येत्त-
स्मिन् शुद्धे शातकुम्भमयं पात्रं
पुण्यतमाद्ध्रदात्पूरयित्वा स्रव-
न्तीभ्यो वा तत एनमप उपस्पृशेयुः ॥

तुशब्दोऽवधारणार्थः । यः प्रायश्चित्ते-
नैव शुध्येन्न राजदण्डेन । एवं च ब्रुवता-
न्यत्र राजदण्डस्यापि शुद्धिकारणत्व-
म् । ततश्चान्यत्र राजदण्डस्यापि शु-

द्विर्वेदितव्या। तस्मिन् शुद्धे लोकसमक्षं चरित प्रायश्चित्त इत्यर्थः।। शातकुम्भमयं पात्रं अतिशयेन पुण्याद्ध्रदात् अशोध्यात् प्राय स पूरयित्वा स्रवन्तीभ्यो वा सदा प्रवाहाभ्यो नदीभ्यः। बहुवचनात् बहीभ्यः संभवतो विकल्पः। ततस्तस्मादेनं कृतप्रायश्चित्तं
६२१ स्नापयेयुः। वक्ष्यमाणैर्मन्त्रैः सामर्थ्यात् परिसत्कारः।।

।। अथास्मै तत्पात्रं दद्युः स तत्प्रतिगृह्य जपेत शान्ता द्यौः शान्ता पृथिवी शान्तं शिवमन्तरिक्षं यो रोचनस्तमिह गृह्णामीत्येतैर्यजुर्भिः पावमानीभिस्तरत्समन्दीभिः।।

अथ = अनन्तरमस्मै स्नाताय तत्

पूर्णपात्रं दद्युः। स तत्प्रतिग्रहोमं मन्त्रं
जपेत्। तैर्मन्त्रैः स्नातयेति वक्ष्यति।
एतैरेवोक्तैः शान्ता द्यौरित्यादिभिर्य-
जुर्भिः पवमानस्सुवर्जन इत्यष्टाभि-
स्तरत्समन्दीभिश्चतसृभिः॥
॥ कूश्माण्डैश्चाज्यं जुहुयात्॥
जुहुयादित्येकवचनादेक एव जुहुयात्।
न सर्वे शास्त्रादयः। तेषां मध्ये योग्य-
628 स्यैदं द्रष्टव्यम्। कूश्माण्डैर्यद्देवा देवहे-
डनमित्यादिभिराज्यं जुहुयात्। चशब्दा-
न्महाव्याहृतिभिश्च॥
॥ हिरण्यं ब्राह्मणाय दद्यात्॥
होमान्ते सुवर्णं ब्राह्मणाय दद्यात् गुणा-
तिशययुक्ताय। ब्राह्मणग्रहणात् ब्राह्मण-
स्यैव ~~सिद्धत्वात्~~ प्रतिग्रहाधिकारात्
ब्राह्मणस्यैव सिद्धत्वात्। कृतप्रायश्चित्त-

स्येदं न होमकर्तुः ॥

॥ गां वाऽऽचार्याय च ॥

चकारो हिरण्याधिकारार्थः। आचार्याय होमकर्त्रे गां वा हिरण्यं वा दद्यात्। एकस्या गोर्मूल्यं हिरण्यमिति द्रष्टव्यम्। समविकल्पोपदेशात्।

॥ यस्य तु प्राणान्तिकं प्रायश्चित्तं मृतः शुध्येत ॥

यस्य तु प्राणान्तिकं मरणान्तिकं प्राय-
629 श्चित्तमादिष्टं स यतमानस्सन् म्रियते असौ मरणादेव शुध्यति। म्रायमाणमप्येतदुच्यते। प्रबुद्धारे ससपि सपिण्डता प्रतिषेधार्थः। तुशब्दो विशेषणार्थः॥ प्रायश्चित्तमध्यवस्य प्रायश्चित्तमध्ये यदि म्रियते तदा विशुध्यति। विशेषतः कृतप्रायश्चित्ते मृत इति।

तथाच व्यासः।

यतमानस्सदा धर्मे म्रियेत यदि मध्यतः।
प्राप्नोत्येव तु तत्सर्वमत्र मे नास्ति संशयः॥ इति॥

॥ सर्वाण्येव तस्मिन्नुदकदानादीनि
प्रेतकर्माणि कुर्युः॥

सर्वाण्येवोदकश्राद्धादीनि यावन्ति प्रेत-
संस्काराणि तानि सर्वाणि तस्मिन्यो
630 मरणान्तिकप्रायश्चित्तात्पूतः यश्च प्रयु-
द्धृतः यश्चान्तरा म्रियते + अर्थादेतद्व्यति-
रिक्तस्य न कार्याणि। सर्वशब्दाच्छौ-
चमपि सपिण्डाः कुर्युः॥

॥ एतदेव शान्त्युदकं सर्वेषूपपातकेषु॥

एतदेव यदनन्तरमुक्तं शान्त्युदकमिति
शान्ता द्यौरित्यादिभिरभिमन्त्रितं स्नानाय
यज्जलमुक्तं तदेव सर्वेषु सर्वशब्दात् महा-
पातकसंबन्धेषु उपपातकेषु वक्ष्यमाणेषु

तत्प्रायश्चित्तात्परमेतदपि कर्तव्यमिति ॥ ३० ॥

इति मस्करीये गौतमभाष्ये
विंशोऽध्यायः ॥

॥ ॐ ॥

63। पतितानां त्यागविधिरुक्तः। के पुनस्त इ-
त्यत आह —

॥ ब्रह्महसुरापगुरुतल्पगमातृपि-
तृयोनिसंबन्धागस्तेननास्तिका-
निन्दितकर्माभ्यासिपतितात्या- (त्या)
ग्यपतितत्यागिनः पतिताः ॥

ब्रह्महा = ब्राह्मणवधकृत। सुरापः स्त्रीप्रकर-
णायां प्रतिषिद्धा यस्य या तां पिबति। १

यथाह मनुः —
गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा।
यथैवैका न पातव्या तथा सर्वा द्विजोत्तमैः ॥ इति।
गुरुतल्पगः गुरोराचार्यस्य तल्पशब्देन

श्रयनवाचिना भार्या लक्ष्यते । तां मैथु-
नाय गच्छति । मातृसंबन्धा मातृपक्षे
632 पञ्चमाद्या कन्या तां वरयिता पितृसंबन्धा-
त: पितृपक्षेऽपि सप्तमादर्वाक् योनिसंबन्धा-
त्रो भगिनीभर्ता । स्तेनस्सुवर्णचोरः । नास्ति-
कः परलोकाद्यभावाद्विनिन्दितस्य प्रतिषि-
द्धस्य बुद्धिपूर्वं सातत्येन सेवकः । कर्मग्र-
हणात् कायिकस्यैवेदं न वाङ्मनसयोरप-
चारः । ब्रह्महादीनां पतितानां यस्त्यागं
न करोति असौ पतितत्यागी । अपतितानां
द्वेषादिभिर्यस्त्यागं करोति असावपति-
तत्यागी एते ब्रह्महादयः पतिताः ॥

॥ पातकसंयोजकाश्च ॥

ये पातकेषु प्रयोजयन्ति । चशब्दादनु-
मन्ता च ।

॥ तैश्चाब्दं समाचरन् ॥

तैस्सह संवत्सरं समाचरन् याना-
सनाशनैः। तथाच कण्वः—
संवत्सरेण पतति पतितेन समाचरन्।
यानासनाशनैर्नित्यं इत्याहुर्ब्रह्मवादिनः॥
633 इति। चराब्दाद्याजनादिभिस्सद्यो ऽ-
पि। तथाच याज्ञवल्क्यः—
याजनं योनिसंबन्धं स्वाध्यायं सहभोजनम्।
कृत्वा सद्यः पतत्येव पतितेन समाचरन्॥ इति।
अविशेषात् बुद्धिपूर्वेण च पतत्येव। तत्रा-
बुद्धिपूर्वे लघुतरं प्रायश्चित्तं द्रष्टव्यम्।
यथाह वसिष्ठः— पतित संप्रयोगेन तु
ब्राह्मणेन वा यौनेन वा यास्तेभ्यस्सका-
शान्मात्रा उपलब्धाः तासां परित्याग-
स्तैश्च न संवसेदुदीचीं दिशं गत्वा
अनश्नन् संहिताध्ययनमधीयानः पूतो
भवतीति विज्ञायत इति॥ तत्र ब्राह्म-

णेन वा यौ नेन वेति द्वितीयो वाशब्दो
635 यानाशानामप्युपसंग्रहार्थः। अधी-
तवेदस्यैव संहिताध्ययनसंभवाद-
नधीतवेदस्य यावता कालेन स्वशाखा-
यां संहिताध्ययनं परिसमाप्यते ताव-
न्तं कालं सावित्रीजपो द्रष्टव्यः। संहिता-
ध्ययनमधीयीत तावन्तं वा कालं सावि-
त्रीं वा जपेदिति स्मृत्यन्तरदर्शनात्।
(कार्णा स्वाध्याय) (लिङ्ग)
तथा च तैत्तरीयारुणब्राह्मणम्।
अनश्नन्निःस्संहिताध्ययनमधीयीत
(अ) ~~मधीयीत~~ त्रिरात्रं वा सावित्रीं गायत्रीं
इत्यादि। एवं ब्राह्मणलिङ्गदर्शनात् वासि-
ष्ठे विशेषितेऽपि त्रिस्संहिताध्ययनं द्र-
ष्टव्यम्। एकस्याध्ययनस्यैकं प्राजापत्यं
वा द्रष्टव्यम्। यथाह कण्वः —
एकमध्ययनं कुर्यात् प्राजापत्यमथापि वा।

635 दद्याद्द्वादश साहस्रं गवां मुष्टिं विचक्षणः॥ इ

इति। बुद्धिपूर्वे तु मनुनोक्तं द्रष्टव्यम्।—

यो येन पतितेनैषां संसर्गं याति मानवः।

स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धये॥ इति

संवत्सरादर्वाग्व्याघ्रोक्तं द्रष्टव्यम्।—

पतितेन तु संसर्गमज्ञात्वा तु कृतं यदि।

उत्सर्गं तत्र लब्धस्य कृत्वा सान्तपनं चरेत्॥

इति। बुद्धिपूर्वे तु कण्वोक्तं द्रष्टव्यं—

पतितेन तु संसर्गमभिसन्धिकृतं यदि।

कृत्वा लब्धसमुत्सर्गं चरेच्चान्द्रायणं व्रतम्॥

इति। सह भोजने तु लौकाक्षिराह—

पतितैस्सह भुक्त्वान्नं परके (पराकेन) विशुध्यति।

636 ज्ञात्वा तु तद्व्रतं कुर्यादिति, वेदविदो विदुः॥

इति। किमेषां पतितत्वमित्यत आह—

॥ द्विजातिकर्मभ्यो हानिः पतनम्॥

अद्विजातिवर्णवद्व स्थानं पतनम्। किञ्च—

॥ परत्र चासिद्धः ॥

पतनीयसेवायाः प्रागपि यदनेन श्रेयः
समाचरितं तत्फलेनासंबन्ध इति प-
रत्रासिद्धिः। चशब्दादिह चाकीर्तिः।
तदेतत्पातकपदार्थस्वरूपावधारणा-
द्विजातिकर्मभिरनधिकारार्थं, प्राय-
श्चित्तानुष्ठानप्ररोचनार्थं च ॥

॥ तमेके नरकम् ॥

तं कर्मभिरनधिकृतं परत्र च शुभस्या-
नुपभोक्तारं नरकमित्येके मन्यन्ते। सुहृ-
ज्ज्ञातिवर्जितस्य तीव्रदुःखोत्पत्तेः। नरक-
637 मपि दुःखकारणत्वात्। यथाह निरुक्त-
भाष्यकारः — नरकं नरकं नीचैर्गमनं
नास्यास्मिन् रमणं विद्यत इति। गौतम-
स्तु नरकभागिति मन्यते ॥

॥ त्रीणि प्रथमान्यानिर्देश्यानीति मनुः ॥

एषां पातकानामाद्यानि त्रीणि ब्रह्महत्या
सुरापानगुरुतल्पगमनानि पातका-
न्यनिर्देश्यानि अनिर्देश्यप्रायश्चित्त-
त्वात्। मनुराह तत्र —
कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते ॥
इति। तथा सुरापानेऽपि मतिपूर्वमनिर्दे-
श्यम्। प्राणान्तिकमिति स्थितिरेषैव-
मादि द्रष्टव्यम्। प्रत्यापत्त्यभावान्निर्दे-
श्यानीत्युक्तम्। तथा चापस्तम्बः —
नास्यास्मिन् लोके प्रत्यापत्तिर्विद्यते।
कल्मषं तु निर्हण्यत इति। मनुग्रहणं
638 स्मार्तस्य समस्तस्य मनुरेवादिस्मर्ते-
त्येतत् प्रदर्शनार्थम्। तथा च पौराणिकाः —
ऋचो यजूंषि सामानि मन्त्रा आथर्वणाश्च ये।
सप्तर्षिभिस्तु तत्प्रोक्तं स्मार्तं तु मनुरब्रवीत्॥
इति॥

॥ न स्त्रीष्वगुरुतल्पं पततीत्येके ॥

स्त्रीषु प्रवर्तमानस्यागुरुतल्पं गुरुदारं वर्जयित्वान्यस्त्रीगमनान्न पततीत्येके मन्यन्ते। गौतमस्सर्वत्र पतत्येवेति। सोऽयं बुद्धिपूर्वाबुद्धिपूर्वभेदेन विकल्पो द्रष्टव्यः। नागुरुतल्पमित्येतावतैव सिद्धे स्त्रीग्रहणं चातुर्वर्ण्यस्यापुपसंग्रहार्थः। प्रातिलोमासु पतितत्वं यथा स्यादिति। तथाच मनुः —

639 चण्डालान्त्यास्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च।
पतत्यज्ञानतो विप्रः ज्ञानात्साम्यं तु गच्छति॥

इति। तत्र यत्र यत्कृत्वा पतति न गमनमात्रेणेति चेत्तदयुक्तम्। गमनमात्र एव पतितप्रायश्चित्तात्। स्मृत्यन्तरे यथाह वसिष्ठः — अथापरं भ्रूणहत्याया द्वादशरात्रमत्रो द्वादशरात्रमुपवसेत्। अश्वमेधावभृथं वा

गच्छेत्। एतेन एव चण्डालीव्यवायो व्याख्यातः। इति। इदं बुद्धिपूर्वे सकृद्गमने द्रष्टव्यम्। यथाह मनुः —

गुरुतल्पव्रतं कुर्याद्रेतस्सिक्त्वा स्वयोनिषु।
सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु च॥ इति।

तस्मादभ्यासे सकृद्गमने च पतितप्रायश्चित्तातिदेशात् गमनमात्रेऽपि
640 पतत्येवेति। स्त्रीष्विति बहुवचनं पूजार्थम्। साधुस्त्रीष्वपतितस्त्रीष्विति पतितस्त्रीषु पतितो भवत्येवेति। यथाह कवषः —

पतितां तु स्त्रियं गत्वा पतत्यज्ञानतो द्विजः।
तत्पव्रतं तदभ्यासे ज्ञानतस्तद्व्रतं चरेत्॥

इति। अत्राबुद्धिपूर्वेऽभ्यासे गुरुतल्पव्रतातिदेशात् सकृद्गमने वासिष्ठोक्तं

द्रष्टव्यम्। गुर्वीं सखीं गुरुसखीं नवपा-
त्रां पतितां च गत्वा कृच्छ्राब्दपादं चरे-
दिति। बुद्धिपूर्वे तु रुकृकमनेऽपि तद्धृत-
मेव चरेदिति द्रष्टव्यम्।

॥ भ्रूणहनि हीनवर्णसेवायां च
स्त्री पतति॥

८४। यच्चैतद् ब्रह्महत्यादुपदिष्टमेतत् पुरुषवत्स्त्रि-
या अपि द्रष्टव्यम्। यत्तस्या अधिकं
तदुच्यते। भ्रूणहनं सेवमाना पतति।
भ्रूणहनं पतितोपलक्षणम्। निहीनवर्णः
शूद्रः। केचिदुपसर्गप्रयोगात् प्रतिलो-
ममाहुः। यथाह वसिष्ठः —
चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या।
पतिघ्नी तु विशेषेण जुङ्गितोपगता च या॥
इति। त्यागोपदेशाद्पतितत्यागे पतितत्व-
प्रसङ्गाच्चकारो ब्रह्महत्यादिभिस्समुच्च-

यार्थः। केचिद्गर्भपतनमाहुः। तथाच
वासिष्ठः —

त्रीणि स्त्रियाः पातकानि लोके धर्मविदो विदुः।
६५२ भर्तुर्वधो भ्रूणहत्या स्वस्य गर्भस्य पातनम्॥

इति। तत्र पतितप्रातिलोमयोस्संसर्गे पु-
रुषवत्स्त्रिया अपि प्रायश्चित्तं द्रष्टव्यम्।

एतदेव व्रतं कुर्याद्योषित्सु पतितास्वपि॥

इति मनुवचनात्। शूद्रं सेवमाना सं-
सर्गं कुर्वाणा यद्यपि पतति तथाप्यप्र-
जोत्पत्तेः प्रायश्चित्तं द्रष्टव्यम्। यथाह
वसिष्ठः —

ब्राह्मणक्षत्रियविशां स्त्रियः शूद्रेण संगताः।
अप्रजाताऽपि शुध्यन्ति प्रायश्चित्तेन नेतराः॥

इति। तथा तत्रैव प्रायश्चित्तमप्युक्तम्।

प्रतिलोमं चरेयुस्ताः कृच्छ्रं चान्द्रायणोत्तरम्॥

इति। चान्द्रायणमुत्तरं चान्द्रायणोत्तरे

चान्द्रायणान्युत्तराणीति । वैश्या क्षत्रि-
643 याब्राह्मणीषु क्रमेण योज्यम् । शूद्र-
सङ्गता प्रजा विशुध्यन्ती सुकृत्वात्
क्षत्रियावैश्यासङ्गता प्रजा ता विशुध्य-
न्तीति द्रष्टव्यम् । तत्र क्षत्रियेण सङ्ग-
ताया: चान्द्रायणे उत्तरे इति कल्प्यम् ।
तथा क्षत्रियाया: वैश्यसङ्गताया श्चान्द्रा-
यणमुत्तरमिति । पुरुषाणां तु प्रातिलो-
म्यगमने शूद्रश्चेत् ब्राह्मणीमुपगच्छेत्
वीरहणैर्वैष्टाथि वेत्यादि वासिष्ठोक्तं द्रष्ट-
व्यम् ॥

आनुलोम्यगमने तु वक्ष्यति - द्वेपरदा-
र इत्यादि । अत्र पतितास्वपि चतस्त्रएव
परित्याज्या: । कुत: —
चतस्रस्तु परित्याज्या: शिष्यगा गुरुगा च या ।
पतिघ्नी तु विशेषेण जुङ्गितोपगता च या ॥

६५५ इति। तुशब्देन नियमवाचिना चत-
सृणामेव परित्यागो वसिष्ठेन प्रति-
पादितत्वात्। इतरासां तु मनुनोक्तं
द्रष्टव्यम्॥—

एतमेव विधिं कुर्याद्योषित्सु पतितास्वपि।
वस्त्रा(न्न)हमासां देयं तु वसेयुश्च गृहान्तिके॥
इति। अयमपि वक्ष्यति। स्त्र्यातिचारि-
णीत्यादि॥

॥ कौटसाक्ष्यं राजगामि पैशुनं
गुरोरनृताभिशंसनं पातकसमानि॥

कौटसाक्ष्यं साक्ष्यनृतवादित्वं अन्यत्र
नानृतवचने दोष इत्यपवाददर्शनात्।
राजगामि पैशुनं, राजकुले परदोषक-
थनं। राजनीति वक्तव्ये गामिवचनात्
राजकुलादन्यत्रापि यत्पारंपर्येणापि
राजानं गच्छति तदपि गृह्यते। गुरो-

६४५ राचार्यस्य केनचिदनृतदोषेणाभिमु-
ख्येन शंसनमभ्याख्यानं एतानि
पातकतुल्यानि । पातक इति महापा-
तकतुल्यानि द्रष्टव्यानि ॥ —
गुरोश्चालीकनिर्बन्धस्समानि ब्रह्महत्यया ।
इति । स्मृत्यन्तरदर्शनात् बुद्धिपूर्व-
व्यतिक्रम एषां पातकसमत्वं न प्रमाद-
मदमोहादिभिरिति विसमासकरणम् ।
एवं च प्रमादादिभिर्न दोषः ॥
॥ अपाङ्क्त्यानां प्राग्दुर्बलाद्गोहन्तृ-
ज्ञ ब्रह्मोज्झ तन्मन्त्रकृदवकीर्णिपतित-
सावित्रीकेषूपपातकम् ॥
दुर्बलात् प्राग्ये उपदिष्टा अभोज्यान्नाः
पतितकूटसाक्षिवर्जिताः नास्तिकस्तु
पातकान् पृथग्भूत एवाभोज्यान्नम-
ध्ये पठितः । कुतः । त्रिविधा नास्तिकाः ।

यथाहुः पौराणिकाः —

646 नास्तिकास्त्रिविधाः प्रोक्ता धर्मज्ञैर्ब्रह्मवादिभिः।
क्रियादुष्टो मनोदुष्टो वाग्दुष्टश्च तथैव च॥
उपपातकस्तु वाग्दुष्टो मनोदुष्टस्तु पातकः।
अभ्यासात्तु क्रियादुष्टो महापातक उच्यते॥

अत्र वाग्दुष्ट उपपातक मध्ये पठितः।
मनोदुष्टः पातकमध्ये, क्रियादुष्टः
निन्दितकर्माभ्यासात् पतनीयेनैव
उक्त इति। अत्र य उपपातकमध्ये पठितः
तस्य वसिष्ठोक्तं प्रायश्चित्तं द्रष्टव्यम्।
नास्तिकः कृच्छ्रं द्वादशरात्रं चरित्वा
विरमेन्नास्तिक्यादिति॥

यस्तु पातकमध्ये पठितः तस्याब्द-
म्बोक्तं द्रष्टव्यम्। एतदेवान्येषां पतनी-
यानामिति यस्तु महापातकस्तस्या-
647 भ्यासात् प्राक् सर्वप्रायश्चित्तं द्रष्टव्यम्।

अभ्यासे तु ब्रह्महत्या प्रायश्चित्तं यद्वसि-
ष्ठोक्तं अथापरं भ्रूणहत्यादि द्रष्टव्यम्।
अत्र पातकमध्ये पठिता अविहितप्रायश्चित्ता
येषां सर्वेषामापस्तम्बोक्तं द्रष्टव्यम्।
एतदेवान्येषामपि पतनीयानामिति ए-
तादृशेवं प्रायश्चित्तं द्रष्टव्यम्।
अलमतिप्रसङ्गेन। प्रस्तुतं व्याख्यास्यामः॥
गोहन्ता गोघातकः। ब्रह्मोज्झा योऽधी-
तं वेदं प्रमादाद्विस्मरति स गृह्यते।
यस्तु बुद्धिपूर्वमेव त्यजति नास्तिकवा-
सनया तस्य विशिष्टतरो दोष इति।
एवं चात्र यः प्रमादाद्विस्मरति तस्य
वसिष्ठोक्तं प्रायश्चित्तं द्रष्टव्यम्।
ब्रह्मोज्झः कृच्छ्रं द्वादशरात्रं चरित्वा
६५४ पुनरुपयुञ्जीत वेदमाचार्यादिति। इत-
रस्य तु मनुनोक्तं द्रष्टव्यम्॥ —

ब्रह्मोज्झो वेदनिन्दा च कौटसाक्ष्यं सुहृद्वधः।
गर्हितान्नाद्ययोर्जग्धिः सुरापानसमानि षट्॥

इति। तन्मन्त्रकृद्यः गोहन्त्र ब्रह्मोज्झ-
यो र्याजनादि करोति। अवकीर्णि वि-
प्लुतब्रह्मचर्यो ब्रह्मचारी। अस्यापङ्क्त्य वै-
नैव गृहीतत्वात् पुनर्वचनं यो ब्रह्मचा-
री प्रजामुत्पादयति असौ कृतप्रायश्चि-
त्तः। अपि यावदसौ पुनरप्युपपातकप्रा-
यश्चित्तं न करोति तावदसौ उपपात-
कत्वेन वर्जनीय इति॥

केचिदेवं वर्णयन्ति। नैष्ठिकानै-
ष्ठिकत्वे गुरुलघुप्रायश्चित्तकल्पनार्थं
पुनर्वचनम्। उपकुर्वाणस्य लघुनैष्ठिक-
६५१ स्य गुर्विति। तदपि द्विगुणं नैष्ठिकस्या-
वकीर्णिनो द्विगुणो दण्ड इति कवषधर्मे
द्विगुणदण्डदर्शनात् पतितसावित्रीकौ

श्राहः॥ – प्राकु निर्मिते फुपपातकं भवति । संज्ञाकरणं प्रायश्चित्तविधानार्थम् ॥

॥ अज्ञानानध्यापनादृत्विगाचार्यौ पतनीयसेवायां च हेयौ ॥

अज्ञानादृत्विगनध्यापनादाचार्यः। एत-योर्निमित्तयोः परित्यागः। अनभिज्ञस्या-र्त्विज्यासंभवात् तं त्यजतो नास्ति यज-मानस्य दोषः। एवमाचार्य आलस्यादि-ना यस्सम्यक् नाध्यापयति तं परित्य-जतो नास्ति दोषः। शिष्यस्य पतनीय-सेवायां च न पतिता त्यागिन इत्येव सि-द्धत्वात् प्रागवद् परित्यागार्थमिदं व-
६५० चनम्। अत्राप्यपतितत्यागदोषः प्रसज्यत इति चेत् – अत्रोच्यते॥ नेह सहासनादेस्त्यागोऽभिप्रेतः। किं तर्हि ऋत्विगन्तरोपादानं आचा-

र्थान्तरगमनं चेति तस्य सहासनादे-
स्त्यागं कुर्वतस्स दोषः। न ऋत्विगा-
चार्यान्तरगमनं कुर्वत इति। चकारा-
दुपपातकावाप्ति ॥

॥ अन्यत्र हानात्पतति ॥

अन्यत्र पूर्वोक्तादज्ञानानध्यापनाभावा-
न्निमित्तादन्यत्र हानात् त्यागात् पतति।
अतस्तयोरन्यत्र त्यागो न कर्तव्यः॥

॥ तस्य च प्रतिगृहीतेत्येके ॥

तस्य च ऋत्विजमाचार्यं वा त्यजतः
प्रतिग्रहीता ऋत्विगाचार्यो वा तस्या-
र्त्विज्यमध्यापनं वान्यः करोति इत्यर्थः।
६५। चकारात्तेन सहाध्यायीत पततीत्येके म-
न्यन्ते। जानन् पतति अज्ञानादिति
गौतमः॥

॥ न कर्हिचिन्मातापित्रोरवृत्तिः॥

न कस्यां चिदवस्थायां पतितावस्थाया-
मपीत्यर्थः। अवृत्तिरशुश्रूषा सा न
कर्तव्या। तस्यामवस्थायां शुश्रूषित-
व्या चेत्यर्थः। शुश्रूषा = नमस्कारादि।

॥ दायं तु न भजेरन् ॥

दायं तदीयं धनं न भजेरन्। नग्ट-
क्षीयुरित्यर्थः। मातुर्दायं स्त्रीधनं दायाभा-
व आत्मीयादपि द्रव्याद्दर्शनाच्छादने
दातव्येति। तुशब्दोपादानं निश्चयो:
१ पतितावस्थायामशनाच्छादने न चोदना
भवति। तयोरर्थं सिद्धम्। अत्र पतिता-
652 या अपि मातुस्त्यागो नास्तीति द्रष्ट-
व्यः। कुतः। स्मृत्यन्तर दर्शनात्।
यथाह वसिष्ठः— माता पुत्रं प्रति न
पतति। इति। पुत्रेण माता न त्याज्या इ-
त्यभिप्रायेणैतदुक्तमिति॥

॥ ब्राह्मणाभिशंसने दोषस्तावान् ॥

येन दोषेण ब्राह्मणमभियुङ्क्ते इदमनेन-
त्वया कृतमिति एवमभियोगे यावां-
स्तस्याधर्मो भवति अभियोक्तुरपि
तावानेवेति तद्यथा - पतित इत्यभि-
योगे च पतितः यथा स लोकैः परि-
हरणीयः तथाभियोक्तापि परिहर-
णीयः। तदीयेन प्रायश्चित्तेनाधिक्रि-
यत इति ॥

॥ द्विरनृतेनासि ॥

यस्त्वनृतेनाभिशंसनं करोति। तस्य
653 द्विगुणमभियोक्तुर्दोषो भवति।अनृता-
भिवदनानभिशंसनाञ्चेति ब्राह्मणग्रह-
णं चात्र प्रदर्शनार्थम्। तथा चाविशेषे-
णैव स्मृत्यन्तरम् ——

पतितं पतितेत्युक्त्वा चोरं चोरेति वा पुनः।

वचनात्तुल्यदोषस्स्यान्मिथ्या द्विर्दोषतां व्रजेत् ॥ इति ॥ तत्रापि पतितदर्शनार्थं तथाचाविशेषेणैव स्मृत्यन्तरम् — ब्राह्मणमनृतेनाभिशस्य पतनीये नोपपतनीयेन वा मासमब्भक्षः शुद्धवतीरावर्तयेन्न पूतो भवतीति विज्ञायते। एतेनैवाभिशस्तो व्याख्यातः इति लिङ्गात्। एवं चात्र पातकोपपातकाभिशंसन एव दोषः। न सर्वदोषसेतदपि द्रष्टव्यम्। पूर्वमाख्यातुरेवायं दोषः।
654 न सर्वैर्व्यवहृतस्य। तथाचापस्तम्बः — न पूर्वं पतितस्य समाख्याता स्यादिति।

॥ दुर्बलहिंसायां चाविमोचने
शक्तश्चेत् ॥

यत्र दुर्बलस्य हिंसा विनाशो भवति तत्र तद्विमोचनेऽपि मोक्षणे शक्तश्चेत्

समर्थश्चेत् तदापि मोचने यावान्
हन्तुर्दोषस्तावानस्यापि भवति। चश-
ब्दात् क्षुधाधिगृहीतादिपीडितस्य च
भक्तौ पथ्याच्छादनाद्यदाने शक्तौ सत्यां
तद्धनने यावान्दोषस्तावानस्य भवति।

ननु चाहारार्थं यः प्रमापय-
ति तद्विच्छेदेऽपि दोषः प्राप्नोति।
उच्यते। न अतुल्यबलत्वादाहार-
विच्छेदप्राणविच्छेदयोः आहारवि-
655 च्छेदे मूलफलादिभिः अपि क्षुन्नि-
वृत्तिः शक्या कर्तुं, प्राणविच्छेदे तु
न कश्चिदस्ति प्रतीकार इति॥

॥ अभिक्रुद्धावगुरणं ब्राह्मणस्य
वर्षशतमस्वर्ग्यम्॥

अभिक्रुद्धेन परिहासादिना अवगुरणं
प्रहारायोद्यमनं ब्राह्मणस्यापराधिनः

आततायित्वप्रसङ्गान्न दोष इति वर्णइत-
तं अस्वर्ग्यं नरकपतनम्। समानजा-
तीयाविषयमिदम्। क्षत्रियादिभिः कृते
द्विगुणं त्रिगुणं चैव चतुर्गुणमथापि वा।
क्षत्रविट्शूद्रजातीनां ब्राह्मणस्य वधे स्मृतः॥
इति। प्राजापत्यस्मृतिलिङ्गात् वर्णा-
णामपि द्विगुणं त्रिगुणादिकल्प्यम्।
658 अनेनैव न्यायेन ब्राह्मणेन कृते क्षत्रिय-
विट्शूद्रजातीनामर्धं त्रिपादमर्धार्ध-
मिति द्रष्टव्यम्॥
ब्राह्मणक्षत्रियवत् क्षत्रियवैश्ययोरपि
एवं क्षत्रियवैश्यवत् वैश्यशूद्रयोरपि
कल्प्यम्॥ एवं सर्वस्योत्तमस्य नीचेन
नीचेन वधे कृते द्रष्टव्यम्॥

॥ निपाते सहस्रम्॥

निपात आयुधेन पाणिना वा। सहस्रंव-

र्णामस्वर्ग्यं अधिकृतम् ।

॥ लोहितदर्शने यावतस्तत्प्र-
स्कन्द्य पांसून् संगृह्णीयात् ॥
रुधिरोत्पादने तद्रुधिरं ब्राह्मणादप-
सृत्य यावत्पांसून् संगृह्णीयात् पिण्डी-
कुर्यात् तावन्ति वर्षसहस्राणि नरक-
657 पतनं अपरिमितकालमित्यर्थः । दोष-
विशेषकथनं प्रायश्चित्तविशेषज्ञाप-
नार्थम् । यथाह कण्वः —
अवगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने ।
कृच्छ्रातिकृच्छ्रौ कुर्वीत शोणितोत्पादने नरः ॥
इति प्रायश्चित्तविशेषाद्दण्डविशेषोऽ-
पि द्रष्टव्यः ॥ — ॐ —

इति मस्करीये गौतमभाष्ये
एकविंशोऽध्यायः ॥

॥ ओं ॥

प्रायश्चित्तनिमित्तान्युक्तानि । अथेदानीं प्रतिपापं प्रायश्चित्तानि वक्तव्यानीति तत्र ~~ब्रह्म~~ वधस्य तावदाह —

॥ प्रायश्चित्तमग्नौ सक्तिर्ब्रह्मघ्नस्त्रिरवच्छातस्य ॥

६५६ प्रायश्चित्तमित्यधिकारार्थम् । प्रायश्चित्तमेवैतन्नादृष्टार्थमिति । अग्नौ सक्तिः सङ्गपतनं इत्यर्थः । त्रिरिति पतनविशेषणम् । पतनेऽवाक् त्रिरस्वं द्रष्टव्यम् । स्मृत्यन्तरसामर्थ्यात् । यथाह मनुः —

प्रास्येदात्मानमग्नौ समिद्धे त्रिरवाक्शिराः ॥

इति । कस्येदं प्रायश्चित्तम् । ब्रह्मघ्नः ब्रह्महन्तुः अवच्छातस्यावशीर्णस्य भक्तत्यागेन कर्शितस्येत्यर्थः । तथा च काठकश्रुतिः — अनशनेन कर्शितोऽग्निमारोहेदिति ।

॥ लक्षं वा स्याज्जन्ये शस्त्रभृताम् ॥

लक्षं शरवेध्यं तद्वा भवेत् जन्ये सेनामध्ये। शस्त्रभृतामिति। धनुःप्राययुद्धेनान्यशस्त्रप्राय इति॥

॥ खट्वाङ्गकपालपाणिर्वा द्वादश
651 संवत्सरान् ब्रह्मचारी भैक्षाय
ग्रामं प्रविशेत् कर्माचक्षाणः॥

खट्वाङ्गं प्रसिद्धम्। कपालं शवशिरः। यथाह मनुः– 'कृत्वा शवशिरोध्वजम्' इति। तद्धारणं चिह्नार्थम्। द्वादश संवत्सरानेवं चरेत्। ब्रह्मचारी मैथुनवर्जकः। भैक्षार्थमेव ग्रामं प्रविशेत्। तदेवास्याहारः। भैक्षचरणमपि मृन्मयेन पात्रेण, स्मृत्यन्तरसामर्थ्यात्। यथाह शङ्खः– 'गृहीत्वा मृन्मयं पात्रमि'ति। अन्यदारण्य एव व्यवस्थानं ब्रह्मचर्यभै-

शापेदेशाच्च व्रतत्वमपि द्रष्टव्यम् । यथाह

कण्व: —

पवित्रपाणिर्दण्डी च पङ्कदन्तो रजस्वल: ।
तीर्थवादी कुलाच्छादी जटिलो ब्रह्महा भवेत् ॥

880 इति । कर्माचक्षाण: ब्रह्महास्मीति सर्वदा क-
थयन् ॥

॥ पथोऽपक्रमे संदर्शनादार्यस्य ॥

पथो मार्गादपयायात् दृष्टपातात् । आ-
र्यस्य द्विजाते: । अनेनैव न्यायेन पृष्ठ-
त: पार्श्वतोऽपि दूरत एव परिहरेदिति
द्रष्टव्य: । तत्र गोबालव्यजनात्संनिकृ-
ष्टे सचेलस्नानं द्रष्टव्यम् । यथाह

व्याघ्र: —

चण्डालं पतितं चैव दूरत: परिवर्जयेत् ।
गोबालव्यजनादर्वाक्सचेलस्नानमाचरेत् ॥

एवं च शूद्रोऽपि स्पर्शनात्परिहरेदिति

द्रष्टव्यम्। यथाह लोकाक्षिः —

महापातकसंस्पर्शे वर्णानां स्नानमुच्यते।

८८। अस्नात्वा भोजने चैव तप्तकृच्छ्रं समाचरेत्॥

इति॥ —

त्रिरात्रं पिबेत् अस्नात्वा चेत् शङ्खपुष्पिशृतं पयः।

एवमार्तविचण्डालशवानामपि कीर्तितम्॥ इति॥

॥ स्थानासनाभ्यां विहरन् सव-
नेषूदकोपस्पर्शी शुध्येत्॥

अन्यत्र विरोधिभ्य आचमनादिकाले-
भ्यः कृत्स्नमहास्तिष्ठेदेव रात्रिमासम-
नेन नयेत्। त्रिषवणस्नानं च कुर्वन्
ब्रह्महत्यानिमित्तादेनसो मुच्यते। शु-
ध्येदित्युपसंहारार्थः॥

॥ प्राणलाभे वा तन्निमित्ते ब्राह्मणस्य॥

ब्राह्मणस्य वा तद्धेतुके प्राणलाभे सति
शुध्येत्। चोरव्याघ्रादिभिः प्रमाप्य-

माणं मोचयित्वेत्यर्थः। एकस्मिन्विच्छि-
न्नः प्राणोऽन्यस्मै दत्त इति। अनेनैव
८८२ न्यायेन सर्वेषां हनने तज्जातीयप्राण-
विच्छेदविमोक्षणाच्छुद्धिः द्रष्टव्या।
॥ द्रव्यापचये वा त्र्यवरं प्रतिराद्धम् ॥
प्रकरणात् ब्राह्मणस्य द्रव्यं हिरण्यादि
तदपि सजीवनाय पर्याप्तं द्रविणमपि प्रा-
णरूपं 'प्राणा ह्येते बहिश्चरा' इति दर्श-
नात् तस्य दस्युभिरपह्रियमाणस्या-
पहृतस्य वापचये प्रतिमोचने शुध्ये-
त्। मोचनासंभवे त्रिर्वा प्रतिराद्धः त्रिः
कृतपुरुषका इत्यर्थः। तथा च मनुः —
त्र्यवरं प्रतिराद्धो वा सर्वस्वमवजित्य वा।
विप्रस्य तन्निमित्ते वा प्राणलाभे विमुच्यते॥
इति। अस्मादेव लिङ्गाद्धरिद्रस्याक्लेशे-
नानुभोगपर्याप्तस्य धनस्य प्रदाना-

इति शुद्धिर्ज्ञातव्या ॥

663 ॥ अश्वमेधावभृथं वा गच्छेत् ॥

अवभृथग्रहणं क्रियान्तरनिवृत्त्यर्थम्।
वचनसामर्थ्यादेनमभ्यत्र उपस्पर्शयेयुः।
शुध्यतीति वर्तते। वाशब्दग्रहणादु-
पसंहृत्याभिधानां चैतानि स्वतन्त्राण्ये-
व प्रायश्चित्तानि ॥

केचित् प्रक्रान्तद्वादशवार्षिकस्ये-
त्याहुः। यथाह शङ्खः — द्वादशे वर्षे शु-
द्धिमाप्नोतीत्युक्त्वा अन्तराले ब्राह्मणान्मोच-
यित्वा गवां द्वादशानां परित्राणादिति।
तत्राभ्यासे प्रक्रान्तद्वादशवार्षिकस्य
समाधिशेषत्वेन द्रष्टव्यम्।
अनभ्यासे स्वतन्त्राण्येवेति ॥

॥ अन्ययज्ञेऽप्यग्निष्टुदन्तश्चेत् ॥
अन्यो यज्ञोऽस्येति तदिदमहयज्ञमवभृ-

665 थो यज्ञो यथाग्निष्टुदन्ते भवति अग्निष्टु-
न्मध्य इत्यर्थः। स च सर्वमेधसत्रं वा
तत्रापि स्नात्वा शुध्येत्। न केवलं ब्राह्म-
णप्राणविच्छेदेनैव ब्रह्महा भवति।
किं तर्हि —
॥ सृष्टश्चेद्ब्राह्मणवधेऽहत्वापि ॥
विसृष्टो निश्चितः अध्यवसित इत्यर्थः।
ब्राह्मणोऽयं हन्तव्य इत्येवं येनाध्यव-
सायः कृतो भवति। ब्रह्मविषयहननवि-
षये सोऽहत्वापि ब्रह्महा भवति। तस्या-
प्येतदेव प्रायश्चित्तम्। तत्संकल्पस्य दु-
ष्टत्वादित्यभिप्रायः। अनेनैव न्यायेन
सर्वप्राणिवधे तदीयमेव प्रायश्चित्तं द्र-
ष्टव्यम्। अत्र ब्राह्मणग्रहणस्य प्रदर्श-
नार्थत्वादिति॥

॥ आत्रेय्यां चैवम्॥

आत्रेयी ऋतुमती ब्राह्मणी । यथाह वसिष्ठः —
665 रजस्वलामृतुस्नातामात्रेयीमाहुरत्र हे-
ष्यद्रूपहं भवतीति । तस्यां च हतायां
ब्रह्महा भवति । क्षत्रियवैश्ययोरपि स-
वनगतयो रूपसंग्रहार्थश्च शब्दः ।
यथाह मनुः —
हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेत् ।
राजन्यवैश्यौ चेजानौ आत्रेयीमेव चास्त्रियम् ॥
इति । एवमिति समस्तप्रायश्चित्तातिदे-
देशार्थम् । — अन्ये त्वत्रिगोत्रमाहुः ।
आत्रेयीग्रहणादनात्रेय्यां न ब्रह्महा भव-
तीति द्रष्टव्यम् ॥

॥ गर्भे चाविज्ञाते ब्राह्मणस्य ॥

ब्राह्मणगर्भे स्त्रीपुंनपुंसकत्वेनापि ज्ञा-
ते हते औषधादिना ब्रह्महा भवति यदि
ब्राह्मण्यामेवाहितो भवति । विज्ञाते तु

८८ यथालिङ्गमेवेति द्रष्टव्यम् । प्रायश्चित्ता-
तिदेशार्थश्चकारः । तदेतद् ब्रह्महत्याप्रायश्चि-
त्तं अनेकप्रकारं हन्तुर्हन्यमानस्य चा-
भिसन्ध्याद्यपेक्षया योजनीयम् ॥

अन्ये तु ब्रुवते । हन्तुस्तावदुक्तं
कुर्यात् न कुर्यादित्यत्र कामकरणे गुरुलघु-
भावस्योक्तत्वात् । निन्दितकर्माभ्यास इत्य-
नेनाभ्यासेऽपि दोषगुरुत्वश्रवणात् ।
यत्तु हन्यमानं प्रति गुरुलघुभावकल्प-
नं, तदयुक्तम् । ज्ञापकाभावात् । अपि च
ब्राह्मणो न हन्तव्य इत्यत्र ब्राह्मणोद्देशे-
न हननप्रतिषेधो विधीयते । न चोद्दि-
श्यमानस्य गुणत्वं विवक्ष्यते । गुणवा-
न्निर्गुणो वेति । यथा दशापवित्रेण ग्रहं
संमार्ष्टीत्यैकत्वमविवक्षितम् तस्मा-
द्ब्राह्मणजातिनिबन्धन एव प्रतिषेधो

662 नाङ्गीकृतगुण इति। तदयुक्तम्। ह-
न्यमानगुणापेक्षया दोषगुरुत्वस्य ज्ञाप-
नात्तस्य ज्ञापकस्य विद्यमानत्वात्।
यथाह मनुः —
गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्।
आततायिनमायान्तं हन्यादेवाविचिन्तयन्॥
इति। आततायी वधाभ्यनुज्ञानपरे
वाक्ये बहुश्रुतादीनामपि वधे सिद्धे
बहुश्रुतादीनां विशिष्टतरो दोष इति
ज्ञापनार्थं तेषामुपादानम्। तथाच प्र-
शस्तकर्मापेक्षया गुरुत्वमवगम्यते।
येन राजन्यवैश्ययोरपि सवनगत-
योः प्रमापणे ब्रह्महत्या प्रायश्चित्तमुपदि-
ष्टं राजन्यवैश्यौ चेजानौ इत्यनेन। तथा —
एतदेव चरेदब्दं प्रायश्चित्तं द्विजोत्तमः।
664 प्रमाप्य वैश्यं वृत्तस्थं दद्याच्चैकशतं गवाम्॥

इति। क्तस्य वैश्यप्रमापणे पृथगुक्तम्।
इतरस्य तु स्त्रीशूद्रविट्क्षत्रवध इत्य-
नेनोपपातकप्रायश्चित्तमिति॥

यत्तूक्तमुद्दिश्यमानस्य विशे-
षणमविवक्षितम् इति। तदप्ययुक्तम्।
प्रायश्चित्तविधिनैव ब्राह्मणवधप्रति-
षेधोऽनुमीयते। नहि ब्राह्मणवधप्रति-
षेधकं वचनमस्तीति। यस्मिन्विशेष-
णमविवक्षितमित्युच्यते, यद्यपि विध-
ते तथापि विशेषणं शक्यते। एवं
विवक्षितं तु उक्तज्ञापकसामर्थ्यादेव।
अपि च यदा विशेषणमविवक्षितं
तदा संख्याप्यविवक्षितैव प्राप्नोति।
ततश्चैकस्मिन् हते द्वयोश्च तुल्यमेव
प्रायश्चित्तं प्राप्नोति। न चैतदिष्टम्।
तस्माद्ब्राह्मणो न हन्तव्य इतिअत्रापि

६६१ गुणवतो हनने विशिष्टतरो दोष इति
ज्ञातुं शक्यत एवेत्युक्तम् सर्वमुपप-
न्नमेवेति ॥

॥ राजन्यवधे षड्वार्षिकं
प्राकृतं ब्रह्मचर्यम् ॥

क्षत्रियवधे कृते षट्सु वर्षेषु कृतं ष-
ड्वार्षिकं ब्रह्मचर्यं तदपि प्राकृतम्।
स्वाभाविकं खट्वाङ्गादिरहितं इत्यर्थः।
ततश्च ब्रह्महत्या प्रायश्चित्तमेव षड्व-
र्षाणि कर्तव्यमित्यर्थः। बुद्धिपूर्वविष-
यमिदम्। वृत्तवतश्च हनने अवृत्तवतो ह-
नने स्त्रीशूद्रविट्क्षत्रवधो नास्ति-
क्यं चोपपातकमित्युपपातकप्रायश्चित्तं
द्रष्टव्यम्। इति। एवमुत्तरत्रापि द्र-
ष्टव्यम्। तत्रापि बुद्धिपूर्वहनने यद्युच्य-
ति अग्न्युत्सादिनिराकृत्युपपातकेषु

६७० चैवमिति द्रष्टव्यम्। अबुद्धिपूर्वे तुम-
नुनोक्तं द्रष्टव्यम्॥—

एतदेव व्रतं कुर्युरुपपातकिनो द्विजाः।
अवकीर्णिवर्जं शुद्ध्यर्थं चान्द्रायणमथापि वा॥

इति। ब्राह्मणस्येत्यधिकारात् ब्राह्मण-
विषयमिदम्। स्वजातेस्तु द्वादशव-
र्षं द्रष्टव्यम्। वैश्यस्याष्टादशवर्षं शू-
द्रस्य चतुर्विंशतिवर्षमित्येवं उत्तर-
त्रापि एवं कल्प्यम्॥

॥ ऋषभैकसहस्रा गा दद्यात्॥
वृत्तवतो बुद्धिपूर्वहनन इदम्। तथा च
मनुः—

तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः।
वैश्येऽष्टमांऽशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडश॥

इति उक्त्वा पुनरप्याह—

६७१ अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः।

ऋषभैकसहस्रा गा दद्याच्छुद्ध्यर्थमात्मनः ॥
त्र्यब्दं चरेद्वा नियतो जटिलो ब्रह्महाव्रतम् ।
वसन्दूरतरे ग्रामाद्वृक्षमूलनिकेतनः ॥
इति। तत्र धनवतो दानं, निस्वस्य तप इति द्रष्टव्यम् । एवं सर्वत्र चकारात् दानसंनिहितं षड्वार्षिकं प्राकृतं ब्रह्मचर्यमिति द्रष्टव्यम् । यथाहोशना — राजन्ये षड्वार्षिकं ब्रह्महणव्रतं तस्या ऋषभैकसहस्रा गोदानं चेति । अभिषेकगुणयुक्तस्याबुद्धिपूर्वहनने इदम् । बुद्धिपूर्वे तु स एवाह — 'अष्टौ वर्षाणि वा चरेदि'ति द्रष्टव्यम् । अस्मिन्नेव ह-
६७२ नने यागो द्रष्टव्यः । यजेतेतरामिता-
दौ । — ॥ वैश्ये त्रैवार्षिकं ॥
प्राकृतं ब्रह्मचर्यं क्षत्रियविषयो द्रष्टव्यः ।
॥ ऋषभैकशताश्च गा दद्यात् ॥

पूर्ववदबुद्धिपूर्वविषयमिदम् । तथाच म-
नुनोक्तमुदाहृतं — 'एतदेव चरेदब्दमि-
त्यादि । चकारात्पूर्वेण समस्तमपि । तदध्य-
यन्तगुणवतो बुद्धिपूर्वहनने अबुद्धिपूर्व-
हनने चैतदेव व्रतं कुर्युः इत्येतद्द्रष्टव्यम् ।
क्षत्रियवैश्ययोस्तुल्यप्रायश्चित्तस्यान्याय्य-
त्वात् । अवृत्तवतो न स्यादिति । एवं तर्हि
673 अग्न्युत्सादि निराकृत्युपपातकेषु चैवमित्य-
त्रावृत्तवतोः क्षत्रियवैश्ययोस्तुल्यप्रायश्चि-
त्तत्वं प्राप्नोतीति चेत् — अत्रोच्यते । तपसा
पूरणं कर्तव्यमिति । तथाच मनुः —
यस्मिन्कर्मण्यस्य कृते मनसस्स्यादलाघवम् ।
तस्मिंस्तावत्ततः कुर्याद्यावत्तुष्टिकरं भवेत् ॥
इति । एवं सर्वत्र कल्पयितव्यम् । एवंस्थि-
ते वृत्तवतो वैश्यस्याबुद्धिपूर्वहनने स्मृ-
त्यन्तरोक्तं द्रष्टव्यम् । यथाहोशना —

वैश्यं हत्वा सप्त मासान् ब्रह्महणव्रतं च-
रेदिति। सर्वत्र गुणाधिकेऽभ्यासे जपा-
दीनामप्याधिककल्पना कर्तव्या। दद्यादि-
त्यधिकाराद्देव सिद्धे पुनर्दद्याद्ग्रहणं ग-
वामभावेऽन्यस्यापि द्रव्यस्य प्रापणा-
र्थम्। यथाह व्याघ्रः

674 गवामभावे निष्कं वा निष्कार्धं पादमेव वा।
यद्वा स प्रतिगृह्णीयात्तद्दद्याच्छ्रोत्रियाय तु॥
इति॥ ॥ शूद्रे संवत्सरम्॥
द्विजातिदासस्य बुद्धिपूर्वहनन इदम्। अ-
बुद्धिपूर्व आह —
॥ ऋषभैकादशाश्च गा दद्यात्॥
गवामधिकृतत्वात् पुनर्गोग्रहणं शुक्लवर्ण-
विशिष्टगोदानार्थम्। तथाच मनुः —
प्रमाप्य शूद्रं षण्मासानेतदेव व्रतं चरेत्।
ऋषभैकादशाश्चापि (श्वा) दद्याद्विप्राय गाः सिताः॥
श्चा

इति। चकारात्पूर्वमुक्तमपि। तदपि तस्यैव वृत्तवतो बुद्धिपूर्वहनने द्रष्टव्यम्। अबुद्धिपूर्वे ऽप्यग्न्युत्सादीसादि असद्वस्य बुद्धिपूर्वहनने एतदेव व्रतं कुर्युरित्येतदबुद्धिपूर्वे
675 तु तप्तकृच्छ्रं द्रष्टव्यम्। यथाहोशना—
'शूद्रं हत्वा तप्तकृच्छ्रमि'ति। अत्रानुलोमप्रतिलोमयोस्स्मृत्यन्तरोक्तं द्रष्टव्यम्। यथाह व्याघ्रः—

अनुलोमानां तु सर्वेषां तन्मात्रहनने तु यत्।
तदेव निर्दिशेद्विद्वान् स्त्रीणामर्धं तथैव च॥
आत्रेयीहनने कुर्याद्धर्तुरुपदिश्यते।
गर्भे चैव तथा ज्ञाते व्याघ्रस्य वचनं तथा॥

इति। एवमेव प्रतिलोमस्त्रीणामपि द्रष्टव्यम्। तथा पुरुषाणां त्वङ्गिरा आह—

अन्त्यजानां तु गमने शूद्रजानां कथं भवेत्।
ज्ञानपूर्वे पराकः स्यादज्ञाने त्वैन्दवं तथा॥

८७८ इति । शूद्रप्रभवानामसमानायां तु शूद्रा-
त्पतितवृत्तिरिति समगुणत्वात् प्रायश्चि-
त्तसाम्यमपि युक्तमेव । इतरेषामपि त-
त्रैवाह—
इतरेषां चतुर्भागं पितुरुक्तं मनीषिभिः ।
स्वजातीनां वधे यच्च शूद्रस्य विधिरुच्यते ॥
इति । अनुलोमप्रतिलोमयोर्वधे शूद्रस्य
यत्प्रायश्चित्तमुक्तं तदेव स्वजातिहननेऽ-
पि द्रष्टव्यम् । इति । तत्रार्थः — शूद्र-
स्यैव तु तत्रैवोच्यते —
सर्वमर्धं त्रिपादं च पादं चैव व्रतं भवेत् ।
वर्णक्रमादन्तरहिंसा गमनभोजने इति ॥
॥ अनात्रेय्यां चैवम् ॥
चकारादेवातिदेशे सिद्धे एवं करणं राजन्य-
८७७ वधप्रायश्चित्तातिदेशार्थम् । अनेतरोक्त-
माश्रुदिति । तथा च वसिष्ठः — अनात्रेयीं

राजन्यहिंसायां राजन्यां वैश्यहिंसायामि-
त्यादि। तर्हि तत्रैव वक्तव्यमिति चेदुच्यते॥
अन्ते विधानं कृतप्रायश्चित्तमपि न सं-
वसेदित्येवमर्थम्। तथा च मनुः —
ब्रह्मघ्नश्च कृतघ्नश्च विशुद्धावपि धर्मतः।
शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न सं-
वसेत्॥ इति॥

॥ गां च वैश्यवत्॥

गां च हत्वा वैश्यवत्प्रायश्चित्तं कुर्यात्। तत्र
वृत्तवतो हननं बुद्धिपूर्वं च प्रकरणादधि-
क्रियते। तत्र बहुक्षीरगुणयुक्ताया बुद्धिपूर्वे
हनने वैश्योक्तं त्रैवार्षिकं द्रष्टव्यम्। तत्र
धनवत ऋषभैकसहस्रगोदानं कुतः। राज-
न्यवधे वर्षत्रयं ब्रह्मचर्यरक्षणगोसहस्रदा-
नस्य प्रतिनिधिरूपेण दृष्टत्वात्। तथैवो-
678 दाहृतं च मनुवाक्यं "ऋषभैकसहस्रा गाः"

इत्यादि बहुक्षीरयुक्ताया गुरुतरो दोषः
इति कस्मादवगम्यत इति चेत्-उच्यते ॥
क्षुद्रकाणां पशूनां तु हिंसायां द्विशतो दमः ।
इत्यत्र क्षुद्रपशुशब्देनाल्पप्रयोजनानां
गवां ग्रहणमन्यजादीनां गर्दभाजाविका-
नां तु दण्डः स्यात् पञ्चमाषिक इति तेषां
पृथग्दण्डदर्शनात् । तस्मात्तद्विषये द-
ण्डलघुत्वदर्शनात् बहुप्रयोजनानां
गुरुतरो दोष इति तस्या एवाबुद्धिपू-
र्वहनने ऋषभैकशताश्च गा दद्यादि-
ति द्रष्टव्यम् । तदसंभवेऽब्दं वा ब्र-
ह्मचर्यं यद्द्वयस्य दानतपसोरसमु-
च्चितयोरुक्तं तत्रापि द्रष्टव्यम् । तस्या-
679 पि विषयस्तस्या एव ब्राह्मणपरिगृही-
तायाः बुद्धिपूर्वे च हनने ब्राह्मणपरिगृ-
हीताया दानतपसोरसमुच्चितयोरुक्तं

तत्रापि द्रष्टव्यम्। ब्राह्मणपरिगृहीतायाः
गुरुत्वमपि गोब्राह्मणसंस्थासु स्थूरि-
कायाश्च भेदेनेति लिङ्गदर्शनात्। अत्र
गोदानाशक्तौ निष्कं निष्कार्धं वेति।
तत उदाहृतं च व्याघ्रवचनं —
गवामभावे निष्कं वा निष्कार्धं पादमेव वा।
इत्यादि। तत्र राज्ञो गोसहस्रदानं सुव-
र्णसहस्रस्य वा दानं तत्सदृशस्य नि-
ष्कार्ध इत्ययं पक्षः प्राकृतस्य तु पादं कुतः।
अस्मिन्नेव प्रकरणे जातुकर्णिवचनात्।
६४- गोसहस्रं सुवर्णस्य सहस्रं वा राज्ञ उच्यते। —
तदर्धं तत्सदृशस्योक्तं पादं स्यात्प्राकृतस्य तु।
इति। तथा कस्मिंश्चित्प्रकरणे मनुरप्याह —
कार्षापणं भवेद्दण्ड्यो यत्रान्यः प्राकृतो जनः।
तत्र राजा भवेद्दण्ड्यः सहस्रमिति धारणा॥
इति। अनेनापि प्राकृताज्जनाद्राज्ञोऽधि-

कं गम्यते । इति । सर्वासम्भवे वर्षचतु-
ष्टयस्य वा प्राकृतब्रह्मचर्यरक्षणं द्रष्ट-
व्यम् । एवं सर्वत्र । तस्या एवाबुद्धिपूर्व-
हनने वसिष्ठोक्तं द्रष्टव्यम् । यथाह —
गां चेद्धन्यात्तस्याश्चर्मणाऽऽर्द्रेण परि-
वेष्टितः षण्मासान् कृच्छ्रं तप्तकृच्छ्रं
६४। वा तिष्ठेतेत्यादि । तस्याबुद्धिपूर्वविषय-
परिज्ञानं ब्राह्मणस्येदं प्रेक्षापूर्वकमित्यप्र-
ेक्षापूर्वमित्यधिकारात् तत्र ऋषभवे-
हतौ च दद्यातामिति द्विवचनाद्द्वौ ह-
न्तारौ गम्येते । तत्र ऋषभहनने ऋषभं
गोहनने वेहतमिति द्रष्टव्यम् ॥
व्याघ्रोक्तं वा —
गां चेद्धन्यान्नरः कामात् पणसहस्रं ततः ।
श्रोत्रियाय दरिद्राय दद्याच्छुद्ध्यर्थमात्मनः ॥
इति । गां चेति चकाराच्छूद्रोक्तमपि

द्रष्टव्यम्॥ तत्राल्पप्रयोजनायाहनने
बुद्धिपूर्वे संवत्सरं तपश्चरणसहितं ऋष-
भैकादश गोदानं द्रष्टव्यम्। तस्या एवा-
बुद्धिपूर्वे जातुकर्ण्युक्तं द्रष्टव्यम्। —
गां चेदकामतो दद्याद्ब्राह्मणानुज्ञया ततः।
प्राजापत्यं कृत्वा स्वयं ब्राह्मणाय गामिति।
तस्या एव ब्राह्मणपरिगृहीतायाः बुद्धिपू-
र्वे मनुनोक्तं द्रष्टव्यम्। यथाह —
682 उपपातकेन गोघाती युक्तो मासं यवां पिबेत्।
कृतवापो वसेद्गोष्ठे चर्मणा तेन संवृतः॥
चतुर्थकालमश्नीयादक्षारलवणं मितम्।
गोमूत्रेणाचरन् स्नानं द्वौ मासौ नियतेन्द्रियः॥
दिवानुगच्छेत्तां गास्तु तिष्ठ(न्नूर्ध्वं) आर्थं रजः पिबेत्।
शुश्रूषित्वा नमस्कृत्वा रात्रौ वीरासनो भवेत्॥
तिष्ठन्तीष्वनु च तिष्ठेत्तु व्रजन्तीष्वप्यनुव्रजेत्।
आसीनासु तथासीत नियतो विगतस्पृहः॥

आतुरामभिषिक्तां च चोरव्याघ्रादिभिर्भयैः।
पतितां पङ्कलग्नां च सर्वप्राणैर्विमोचयेत्॥
उष्णे वर्षति शीते वा मारुते वाति वा भृशम्।
न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः॥
683 आत्मनो यदि वान्येषां गेहे क्षेत्रेऽथवा खले।
भक्षयन्तीं न कथयेत् पिबन्तं चैव वत्सकम्॥
अनेनैव विधिना यत्र गोघाती गामनुव्रजेत्।
स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोहति॥
ऋषभैकादशा गाश्च दद्यात्सुचरितव्रतः।
अविद्यमाने सर्वस्वं ब्राह्मणेभ्यो निवेदयेत्॥

इति। अबुद्धिपूर्वे तु संवत्सरं प्राकृतं ब्रह्मचर्यं द्रष्टव्यम्। यदि वत्सस्याकामतो मृत्युर्भवति, तदा ऋषभैकादशगोदानं द्रष्टव्यम्। वत्सं प्रति लघुत्वमपि -

वत्सानामर्धधनदण्डस्स्यात्सर्वो दण्डः पयस्विनाम्।
बलीवर्दवृषाणां च तथैवोक्तं मनीषिभिः॥

684 इति प्राजापत्यस्मृतिदर्शनात् तस्य
बुद्धिपूर्वं (श्रो)त्रियं हत्वा नरो बुद्ध्या ततश्चा-
न्द्रायणं चरेत् ।
पञ्चैव च शतं चापि दद्याच्छुद्ध्यर्थमात्मनः ॥
इति कण्वस्मृत्युक्तं द्रष्टव्यम् ॥ —
स्वामिने तन्मूल्यं द्रष्टव्यं दाप्यस्तस्य च तद्धनम् ।
इति लिङ्गात् । अस्मिन्वधे शूद्राणामर्ध-
दण्डः लोकाक्षिवचनात् —
द्विजातीनां तु सर्वेषां सर्वो दण्डो विधीयते ।
शूद्राणामर्धदण्डस्स्यादिति धर्मविदो विदुः ॥ इति ।
॥ मण्डूकनकुलकाकबिम्बदहर-
मूषिकश्वाहिंसासु च ॥
अत्र काकग्रहणं मनुना बिडूराहश्लोकपठि-
तानां क्रव्यादश्लोकपठितानां बिडालश्लो-
685 कपठितानां मार्जारश्लोकपठितानां
चोपलक्षणम् ॥ —

विड्वराहखरोष्ट्राणां गोमायोः कपिकाकयोः ।
प्राश्य मूत्रपुरीषाणि द्विजश्चान्द्रायणं चरेत् ॥
क्रव्यादसूकरोष्ट्राणां कुक्कुटानां च भक्षणे ।
नरकाकखराणां च ततः कृच्छ्रं विशोधनम् ॥
बिडालकाकाखूच्छिष्टं जग्ध्वा श्वनकुलस्य च ।
केशकीटावपन्नं च पिबेद्ब्राह्मीं सुवर्चलाम् ॥
मार्जारनकुलौ हत्वा चाषं मण्डूकमेव च ।
श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत् ॥
इति । एतेषां समुदायवधे शूद्रहत्याव्र-
तं चरेदिति द्रष्टव्यम् । शूद्रप्रायश्चित्ता-
नुकर्षणार्थश्चकारः । इति बुद्धिपूर्वाबु-
द्धिपूर्ववधेऽपि शूद्रवदेव । प्रत्येकवधे
686 तु अबुद्धिपूर्वे विड्वराहादीनां मध्ये के-
षां चिद्दाहः स विधीयते । स्मृत्यन्तरे —
घृतकुम्भं वराहं तु तिलद्रोणं तु तित्तिरिम् ।
शुकं द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायणम् ॥

हत्वा हंसबलाकं च बकं बर्हिणमेव च।
वानरं श्येनभासौ च स्पर्शयेत् ब्राह्मणाय गाम्॥
इदमपि संहतानाम्। प्रत्येकवधे तु कार्षापण-
मात्रं देयम्। यथाह व्याघ्रः —
हंसानां च मयूराणां जलस्थानां च पक्षिणाम्।
कपीनां श्येनभासानां हत्वा दद्यात्पणं द्विजः॥ इति।
वासो दद्याद्धयं हत्वा पञ्च नीलान् वृषान् गजम्।
अजमेषावनड्वाहं खरं हत्वैकहायनम्॥
681 क्रव्यादांस्तु मृगान् हत्वा धेनुं दद्यात्पयस्विनीम्।
अक्रव्यादो वत्सतरीं उष्ट्रं हत्वा तु कृष्णलम्॥
इति। बुद्धिपूर्वे तु दण्डानुरूपं कल्प्यम्।
यथाह दण्डपारुष्ये —
मनुष्यमारणे क्षिप्रं चोरवत् किल्बिषं भवेत्।
प्राणभृत्सु महत्स्वर्धं गोगजोष्ट्रहयादिषु॥
क्षुद्रकाणां पशूनां तु हिंसायां द्विशतो दमः।
प्रमापणे प्राणभृतां तत्र दण्डो विचारितः॥

पञ्चाशात्तु भवेद्दण्डः शुभेषु मृगपक्षिषु ॥
गर्दभाजाविकानां तु दण्डः स्यात्पञ्चमाषिकः ॥
माषिकस्तु भवेद्दण्डः श्वसूकरनिपातने । इति ।
प्रायश्चित्तमाह यमानुक्तानां —
पयः पिबेत्त्रिरात्रं वा योजनं वाध्वनो व्रजेत् ।
उपस्पृशेत्स्रवन्त्यां वा सूक्तं वाब्दैवतं जपेत् ॥
इति द्रष्टव्यम् । तत्र बुद्धिपूर्वे पयः पानम-
ध्वगमनं वा द्रष्टव्यम् । अबुद्धिपूर्वे तु
स्नानं सूक्तजपं वेति द्रष्टव्या चोदना-
वत् ।
688 प्रवत्सानां हननेऽपि तारतम्यं द्रष्टव्यम् ।
नराणामुक्तं वर्णभेदेन वराहाणामयमपि
वक्ष्यति वराहे घृतघट इति । अनेत-
दपि द्रष्टव्यम् ॥
यत्र मूत्रपुरीषप्राशने चान्द्रायणमुक्तं त-
त्राप्येषां सर्वेषां ग्रहणम् । यत्र भक्षणे
तप्तकृच्छ्रमुक्तं यत्राप्युच्छिष्टभक्षणे ब्रह्म-

सुवर्चलापानं अग्राह्येषां सर्वेषां ग्रहणमिति।

अत्र चान्द्रायणविधाने मनुष्यमूत्रपुरीष-
प्राशने पृथगुक्त्वा तद्वर्जितानां द्रष्टव्यम्।
तत्रापि मूत्रग्रहणेन रेतसोऽपि ग्रहणम्।
मनुष्यमूत्रपुरीषप्राशने प्रायश्चित्तोपदेशः
तस्यापि समत्वेनोपदेशात्॥—

६४१ भुक्त्वातोऽन्यतमस्यान्नममत्या त्र्यहं क्षपेत्।
मत्या भुक्त्वा चरेत्कृच्छ्रं रेतोविण्मूत्रमेव च॥
इति। अयमपि वक्ष्यति मूत्रपुरीषरेतसां
च प्राशन इति चान्द्रायणमपि बुद्धिपू-
र्वे द्रष्टव्यम्। अबुद्धिपूर्वे तु सान्तपनं
द्रष्टव्यम्। यथाह लौगाक्षिः—
वराहाणां खरोष्ट्राणां कपीनां च तथैव च।
प्राश्य मूत्रपुरीषाणि चरेत्सान्तपनं द्विजः॥
इति। अग्राह्येषां सर्वेषां ग्रहणमिति त-
प्तकृच्छ्रविधानमपि बुद्धिपूर्वक एव

तत्र पुनस्संस्कारमपि द्रष्टव्यम्। तथा च
वक्ष्यति पुनस्संस्कारमधिकृत्य अप-
द्रोऽष्टस्वराणां चाद्रङ्गस्येति। बुद्धिपूर्वे तु
वसिष्ठोक्तं द्रष्टव्यम्। श्वकुक्कुरग्रामसूकर-
कङ्कगृध्रभासवायसपारावतमनुष्योलू-
610 कानां मांसादने सप्तरात्रमभोजनानि-
वपुरुषीभावः पुनस्संस्कारश्चेति।
एवं चात्राभिहितानां च तत्रान्तर्भावो द्र-
ष्टव्यः। यत्र ब्रह्मसुवर्चलापानं विहितं
तत्रापि नरोच्छिष्टं वर्जयित्वा। तत्राहो-
शना — ब्राह्मणोच्छिष्टभोजने प्राणा-
यामशतं कुर्यात्। क्षत्रियोच्छिष्टभोज-
ने प्राणायामसहस्रं, वैश्योच्छिष्टभोज-
ने दशसाहस्रं, प्राणायामं धारयेत्। मति-
पूर्वं चेत् प्राजापत्यमतिकृच्छ्रं कृ-
च्छ्रातिकृच्छ्रं च शूद्रोच्छिष्टभोजने

सप्तरात्रं यवपानं मतिपूर्वं चेत् पराक-
मेवं द्विजास्युच्छिष्टभोजने शूद्रायाश्च
ब्राह्मणोच्छिष्टानां अपां पाने षोडशप्रा-
णायामान् धारयेत्। क्षत्रियाणां त्रिंशत्
वैश्यानां चत्वारिंशत् शूद्राणां कुशवा-
६१। रिपानं त्र्यहं बुद्धिपूर्वं चेत्त्र्यहं चतुरहं
पंचरात्रं सप्तरात्रं च गव्यपानं क्रमेण।
अन्त्यजानामुच्छिष्टभोजने बुद्धिपूर्वे
महासान्तपनमबुद्धिपूर्वे चान्द्रायण-
मिति। मनुनापि किञ्चिदुक्तं —
शूद्रोच्छिष्टाश्च पीत्वापः कुशवारि पिबेत्त्र्यहम्।
अभोज्यानां तु भुक्त्वान्नं स्त्रीशूद्रोच्छिष्टमेव च॥
जग्ध्वा मांसमभक्ष्यं च सप्तरात्रं यवान् पिबेत्।
इति। सुवर्चलापानमप्यबुद्धिपूर्वे पूर्वेअ-
विशेषादेकरात्रमेव। बुद्धिपूर्वे तु सान्तप-
नम्। यथाह जातूकर्णिः —

जम्बूककाकमार्जारश्वगोधानां गवामपि।
मध्योच्छिष्टं द्विजो भुक्त्वा कृच्छ्रं सान्तपनं चरेत्॥
इति। अत्र कंबुबोधकमपि द्रष्टव्यम्। —
612 विप्रार्धं क्षत्रियस्य स्याद्वैश्यानां चैव तद्-
र्धकम्। तदर्धमेव शूद्राणां प्रायश्चि-
त्तं विदुर्बुधाः॥ इति॥
इदं सर्वत्र द्रष्टव्यम्। हिंसाग्रहणमधि-
कार सिद्धमपि क्रियते, हिंसायामेव न
तु स्पृष्टस्यापीति॥

॥ अस्थन्वतां सहस्रं हत्वा॥

अन्येषामस्थिमतां सहस्रवधे शूद्रहत्या
(सू.)
प्रायश्चित्तं भवति॥ अनस्थ्नामनडुद्धारे
च॥ अनस्थिमतां च कृम्यादीनामनडुद्भा-
रमात्रे हते एतच्छूद्रहत्या प्रायश्चित्तम्।
इतरमितरत्र द्रष्टव्यम्। एवं सर्वत्राति-
देशो द्रष्टव्यम्।

॥ अपि वास्थन्वतामेकैकस्मिन्
किञ्चित् किञ्चिद्दद्यात् ॥

693 न वा सहस्रप्रमाणे ऽकैकस्मिन् किञ्चित्
किञ्चित् काकणिकामात्रं दद्यात्। वाशब्दा-
नुपादि वा कुर्यात्। अपिशब्दादनस्थिमता-
मपि। तथाच मनुः —
किञ्चिदेव तु विप्राय दद्यादस्थिमतां वधे।
अनस्थ्नां चैव हिंसायां प्राणायामेन शुध्यति॥
तत्रास्थिमतां बुद्धिपूर्वहनने काकणिकामा-
त्रं दद्यात्। अबुद्धिपूर्वे तु षट्प्राणायाम
जपो द्रष्टव्यः। अनस्थ्नां बुद्धिपूर्वहनने
प्राणायामत्रयमबुद्ध्वैकं प्राणायाममि-
ति द्रष्टव्यम्। तथाच कण्वः —
हनने ऽस्थिमतां मह्यां दद्यात्काकणिकां नरः।
अबुद्धौ च ततस्तेषां प्राणायामान् षडाचरेत्॥

694 प्राणायामत्रयं कुर्यादनस्थ्नां हनने मतौ।

अबुद्ध्यैकं ततः कुर्यादिति धर्मविदो विदुः॥

इति॥ ॥ षण्ढे पलालभारः

सीसमाषश्च ॥

षण्ढे तृतीया प्रकृतौ न तु क्लीबे। तस्य तु श्रोत्रियत्वेन प्राप्तौ सत्यां श्राद्धे प्रतिषेधात्सं-स्कारसंबन्धित्वाच्च तस्मिन्हते तस्य जा-तिविशेषो नास्ति। पलालभारो गवां सीस-माषो ब्राह्मणाय। असमासनिर्देशात् व्य-स्तसमस्तं च। बुद्धिपूर्वं समस्तमबुद्धि-पूर्वं व्यस्तमिति॥

॥ वराहे घृतघटः॥

वराहे हते घृतपूर्णो घटो ब्राह्मणाय देयः। अस्य तूक्तो विषयः।

॥ सर्पे लोहदण्डः॥

695 लोहशब्देन कार्ष्णायसमुच्यते। तथा-च मनुः —

अहिं कार्णायसीं दद्यात्सर्पं हत्वा द्विजो-
त्तमः ॥ इति । बुद्धिपूर्वं इदमबुद्धिपूर्वे तु
माषमात्रं देयं 'सर्पं हत्वा माषमात्रं दद्यात्'
इत्यौशनसवचनात् ॥

(नी)
॥ ब्रह्मबन्ध्वां चलनायां धील: ॥

चलना व्यभिचारिणी। क्षत्रियादेर्मनु-
नोक्तं द्रष्टव्यम् । —
जीलकार्मुकवस्तावी : क्रमाद्दद्याद्विशुद्धये ।
चतुर्णामपि वर्णानां नारीं हत्वानवस्थिताम् ॥
लो इति । जील दृतिः । चलनत्वमपि गु-
रुत्वेन बहुपुरुषसेवित्वम् । तथा च
प्रजापतिः —
६९६ अधिगच्छति या नारी बहुभिः पुरुषैर्मिथः ।
व्यभिचारिणीति सा ज्ञेया प्रत्यक्षं गणिकेति च ॥
इति । एवं च पुरुषत्रयसंसर्गात् अर्वाङ्-
पूर्वोक्तं स्त्रीहननप्रायश्चित्तमेव द्रष्टव्यम् ।

तत ऊर्ध्वमिदमिति पुरुषत्रयसंसर्गा-
त् अर्वागपि पूर्वोक्तादर्धं परिकल्प्य-
म्। तथाच कवषः—
वृत्तस्थायास्त्रियास्सर्वं प्रायश्चित्तं विधीयते।
प्रतिपुरुषवृत्ताया अर्धहीनं भवेत्तु तत्॥
इति। इदमबुद्धिपूर्वे। बुद्धिपूर्वे तु व्या-
घ्रोक्तं द्रष्टव्यम्।—
चतुर्णामपि वर्णानां नारी हत्वानवस्थिताः।
शूद्रशुच्यजमेषां च क्रमाद्ध्याद्विशुद्धये॥
इत्यादि॥

॥ वैश्यिकेन किञ्चित्॥

वैश्यकर्मणा जीवन्त्यां हतायां न कि-
611 किञ्चिदपि कर्तव्यम्। अबुद्धिपूर्वे व्य-
भिचारिण्या यदुक्तं तदर्धं द्रष्टव्यम्।
व्यभिचारिण्याद्दलं पापं वैश्याया हनने भवेत्।
चतुर्णामपि वर्णानामेष धर्मस्सनातनः॥

इति। प्रजापतिधर्मलिङ्गात्। यद्वा वै-
श्यासु क्रियत इति वैशिकं तत् प्र-
ह्मबन्ध्वा सह कृते प्रकाशमाचरन्त्यां
मैथुनमाचरितमित्यर्थः। न किञ्चित्
परस्त्रीगमनप्रायश्चित्तं कर्तव्यमित्य-
र्थः। एवं च गूढमाचरन्त्या सह कृते
किञ्चित्प्रायश्चित्तमस्तीति गम्यते।
तदपि हिंसावत्। अत्रापि परदारगमन-
प्रायश्चित्तप्रतिषेधादन्यदस्तीति गम्यते।
तथाच शङ्खः — पशुवेश्यागमने प्रा-
698 जापत्यं चरेदिति। एतदपि सकृद्गमने,
अभ्यासे तु संवर्तोक्तं द्रष्टव्यम्। —
पशुवेश्यादिगमने प्राजापत्यं समादिशेत्।
गोगमे तु नरः कुर्यात् कृच्छ्रं चान्द्रायणोत्तरम्॥
इति। तस्यामत्यन्ताभ्यासे मनुनोक्तमु-
पपातकप्रायश्चित्तं द्रष्टव्यम्।

धान्यरूप्यपशुस्तेयमद्यपस्त्रीनिषेवणम्।
इति। तस्यां प्रसूतस्य कण्वोक्तं द्रष्टव्यम्॥—
प्रसूतो यस्तु वेश्यायां भैक्षं भुञ्जीयतेन्द्रियः।
शतं सहस्रमभ्यस्य सावित्रीमिति शुद्धताम्॥
इति। [illegible] शूद्रबंध्वा सह वेशिकाचरणे तद्वेव क्षत्रियवध्वादिभिरपि वेशिकाचरणे द्रष्टव्यम्। यथाह कश्यपः—
६११ ब्रह्मक्षत्रियविट्शूद्रबन्धुभिर्वैशिकीकृते।
प्राजापत्यं जपेद्विद्वानभ्यासे कृच्छ्रमेव तु॥
इति। क्षत्रियादीनामर्धमर्धं परिकल्प्यम्।
अत्र केचिद्व्याचक्षते॥ ब्राह्मण्याः शूद्रसंपर्के पातित्यमुक्तम्। भ्रूणहानिहीनवर्णसेवायां च स्त्रीपततीति। तस्माद्या ब्राह्मणी शूद्रसंबन्धा भवति तया सहान्येषां संबन्धं कुर्वतां पातागम-

प्रायश्चित्तमेव द्रष्टव्यमिति ।।

तदप्युक्तम् ।—

चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति ।।

इति लिङ्गात् महाशूद्रादिसंपर्केऽपि
ब्राह्मण्यादीनां शूद्रादिसाम्यम् । मया
चेत् तद्धीनत्वमवगम्यत इति । एवम-
700 पि यच्छूद्राया अव्यभिचारिण्या मै-
थुनाचरणे प्रायश्चित्तं तदेव ब्राह्मण्यां शू-
द्रसंबन्धायामपि प्रसज्येतेति चेत्
अत्रोच्यते । साम्यवचनान्न भवती-
ति तस्मादुक्तमेव प्रायश्चित्तम् ।।

अन्ये व्याचक्षते । अबुद्धिपूर्वं शू-
द्रादिसँपर्कं या करोति तस्यां गमने पा-
तकप्रायश्चित्तम् । बुद्धिपूर्वे तु शूद्रादि-
गमनप्रायश्चित्तं ज्ञानात्साम्यं तु गच्छ-

तीति वचनात्। इति। - तदप्ययुक्तम्।
तत्रापि बुद्धिपूर्वकृतादबुद्धिपूर्वकृत-
स्य गुरुत्वं प्राप्नोतीति॥ तदपि संकल्पेन
भूय इत्यादिभिर्विरूध्यत इति। एवं च
सति चण्डालान्त्यस्त्रियोगत्वा इत्यस्या-
प्ययमेवार्थो वेदितव्यः। चण्डालादिभि-
70। रबुद्धिपूर्वसंपर्के पतितो भवति। द्विजा-
तिकर्मभिरधिकृत इत्यर्थः। न ब्रह्महत्या-
दि पापमिति। तदुक्तं - द्विजातिकर्मभ्यो
हानिः पतनमिति न जातेरवगमः तस्मा-
त्प्रायश्चित्तमस्ति। बुद्धिपूर्वे तु जातेरप्य-
वगमो भवति। तस्मात्प्रायश्चित्तं नास्ती-
ति। पतत्यज्ञानत इति। अनेन द्विजाति-
कर्मानधिकृतोक्ता न ब्रह्महत्यादिपापसा-
म्यवचनाच्च येन संपर्कं करोति बुद्धि-
पूर्वं तेन साम्यं गच्छतीति प्रायश्चि-

तेन नाधिक्रियत इति स्वाम्यद्वारेण प्राय-
श्चित्तभाव इति ब्राह्मण्यादीनां शूद्रसंब-
न्धे बुद्धिपूर्वेऽपि प्रजातायां एव साम्यं
द्रष्टव्यम्। अप्रजातायाः शुद्धिप्रतिपादना-
त ब्राह्मणक्षत्रियविशां स्त्रियः शूद्रेण
सङ्गताः। अप्रजाता विशुध्यन्ति प्रा-
7·2 यश्चित्तेन नेतराः॥ इति॥
शूद्रेण सङ्गतायाः शुद्धिप्रतिपादनादधोजा-
तिसङ्गताया अशुद्धित्वं द्रष्टव्यम्॥
ब्राह्मणक्षत्रियविशामित्युक्तत्वात् शूद्रस्त्रि-
याः प्रजाताया अपि शुद्धित्वमन्यच्च प्र-
तिपुरुषमभ्यस्तताया अर्धहीनां भवेत्तु
तदिति। अत्र ब्राह्मण्याः क्षत्रियसंबन्धे
अर्धं, वैश्यसंबन्धे तदर्धं, तदर्धं शूद्रसं-
बन्धे, इत्येवं परिकल्प्यम्॥ मद्यपस्त्री-
निषेवणमित्यत्र चोद्यते - ब्राह्मण्यां मद्य-

पाया गमने प्रायश्चित्तं भवितुमर्हति।
नोपपातकप्रायश्चित्त, मद्यपानेन हि पति-
ता भवतीति॥ — अत्रोच्यते। पातित्यं
शूद्रातुल्यत्वं न ब्रह्महत्या समत्वम्।
तथाच मनुः —
7•3 यस्य कायगतं ब्रह्म मद्येनाप्लाव्यते सकृत्।
तस्य व्यपैति ब्राह्मण्यं शूद्रत्वं चानुगच्छति॥
इति। अतः शूद्रतुल्यत्वादुक्तमेव प्रा-
यश्चित्तं न पतितागमनप्रायश्चित्तं
इति। अथात्रापि चोक्तं — आर्यानार्य-
योर्व्यतिक्षेपे कर्मणस्साम्यं इति। व्य-
तिक्षेपस्तु शूद्रस्याप्रतिषिद्धं मद्यपानं
ब्राह्मणादीनां प्रतिषिद्धं। तत्र शूद्रे म-
द्यपानवर्जिते ब्राह्मणादौ मद्यप्रसक्ते सति
तस्माद्धेतोस्समत्वं च (?)वं च ग्रहणमि-
ति चेत् न स्मृत्यन्तरसामर्थ्यात्। यथाह

कण्वः —

ब्रह्महा मद्यपस्तेनो गुरुतल्पग एव च।
अस्पृश्याः पतिता ह्येते यैश्चैवाचरितस्समः॥

इति) पाठान्तरं — एवं च मद्यपो ब्राह्मणादिः — तद्वर्जित शूद्र इत्यवगन्तव्यम्। यद्यपि शूद्रतुल्यस्तथाप्यस्पृश्य इत्यवगन्तव्यम्॥ पतितकल्पा-

704. ॥ तल्पान्नधनलाभवधेषु पृथग्वर्षाणि॥

लाभशब्दः प्रत्येकमभिसंबध्यते। तल्पलाभो धनलाभ इत्यादि। तल्पशब्देन शयनवाचिना भार्योच्यते। तद्धेतुत्वाल्लक्षणया कन्याया अत्र ग्रहणम्। अन्नं कृतमकृतं वा धनं सुवर्णगवादिलाभः प्राप्तिः. वधो विघ्नकरणम्। एतदुक्तं भवति — कन्यान्नधनेषु लभ्यमानेषु विघ्नः प्रतिषेधं कृत्वा संवत्सरं प्राकृतं ब्रह्मचर्यं पृथ-

कर्तव्यमिति। बुद्धिपूर्वं इदमबुद्धिपूर्वे- तूशनसोक्तं द्रष्टव्यम् – 'कन्याबाध- नविधौ प्राजापत्यमिति'। ब्राह्मणलाभ- विधौ इदम्। क्षत्रियादिष्वर्धमर्धं परि- कल्प्यम्॥

7·5 ॥ द्वे परदारे ॥

परदारगमने द्वे वर्षे प्राकृतं ब्रह्मचर्यं च- रेत्। ब्राह्मणस्य ब्राह्मणीगमने गर्भोत्प- त्ताविति द्रष्टव्यम्। गर्भोत्पत्तेः प्राक् कृच्छ्रचान्द्रायणौ। यथाह व्याघ्रः –

ब्राह्मणो ब्राह्मणीं गच्छेदकामां यदि कामतः।
कृच्छ्रचान्द्रायणौ कुर्यादर्धमेव प्रमादतः॥
अर्धमेव सकामायां तप्तकृच्छ्रं सकृन्मता।
अर्धमर्धं नृपादीनां दारेषु ब्राह्मणश्चरेत्॥
एतद्व्रतं चरेत्सार्धं श्रोत्रियस्य परिग्रहे।
अश्रोत्रियश्चेद्द्विगुणं अगुप्तामर्धमेव च॥

इति। क्षत्रियस्य दारेषु गर्भोत्पत्तौ ये पर-
दार इत्यस्यार्धं द्रष्टव्यम्। अर्धमर्धं नृपा-
706 दीनामिति लिङ्गाद्वैश्यस्य दारेषु मनुनो-
क्तमुपपातकप्रायश्चित्तं द्रष्टव्यम्। एतदेव
व्रतं कुर्युः इत्यादि। शूद्रस्य दारेति कृ-
च्छ्रं द्रष्टव्यं कण्ववचनात् —

शूद्रदारगतो विप्र अतिकृच्छ्रं समाचरेत्।
चान्द्रायणं विशो राज्ञः समा ब्रह्महणव्रतम्॥

इति। यदि क्रमेणैव चातुर्वर्ण्यप्रसूता-
सु क्रमेण निर्दिष्टं तदानीं ब्राह्मणस्य
ब्राह्मणीगमने यदुक्तं तदेव पादहीनं
क्षत्रियादिगमने द्रष्टव्यं, व्याघ्रवचनात् —

विप्रेणैव निर्दिष्टा चेत् चातुर्वर्ण्यप्रसूतजाः।
क्रमेण पादशो हीनं व्रतं तासु गतश्चरेत्॥

इति। अयमेव न्यायः क्षत्रियादिष्व-
707 पि द्रष्टव्यः। ब्राह्मणभार्यां शूद्रां ब्राह्म-

णो गत्वा प्राजापत्यं कुर्यात्। वसिष्ठव-
चनात् ब्राह्मणश्चेदुपेक्षापूर्वकं ब्राह्म-
णदारमधिगच्छेत्। निवृत्तधर्म-
कर्मणः कृच्छ्रोऽनिवृत्तधर्मकर्मणोऽति-
कृच्छ्र इति। इदमबुद्धिपूर्वे सकृद्गमने।
बुद्धिपूर्वे द्विगुणं, अर्धमेव प्रमादकृत इति
लिङ्गात्। अभ्यासे तु पादहीन न्यायो
द्रष्टव्यः। ब्राह्मणस्य क्षत्रियादिभार्यागम-
ने यदुक्तं तदेव क्षत्रियादीनां स्वजाति
भार्यागमनेऽपि द्रष्टव्यं। कुतः —

विप्रो वृपस्य भार्यायां यत्करोति समागमे।
तदेव क्षत्रियश्चापि कुर्यात्तत्रैव सङ्गमे॥
इति। प्रजापतिधर्मलिङ्गात्।

708 ॥ त्रीणि श्रोत्रियस्य ॥

गर्भोत्पत्तावेवास्यां समागमे गर्भोत्पत्तेः
प्रागप्युक्तम्। —

एतद्व्रतं चरेत्सार्धं श्रोत्रियस्य परिग्रहः।
इति। गर्भोत्पत्तेरूर्ध्वमेतद्वेत्याप्रत्याद्दृष्ट-
व्यम्। कथं शूद्रोऽभ्यासे समानप्रायश्चित्त-
मयुक्तमिति चेत्-तत्रोच्यते। स्त्रीणां
गर्भोत्पत्तेः प्राक् प्रायश्चित्तस्य कथं शूद्रोऽभ्या-
सेऽपि समानत्वं दृश्यते॥-
ब्राह्मणक्षत्रियविशां स्त्रियः शूद्रेण संगताः।
इत्यत्र। तद्वदन्यापि न दोष इति। त-
थाच कवषः —
गर्भोत्पत्तौ यदुक्तं तद्देवामरणाच्चरेत्।
ब्राह्मणः क्षत्रियश्चापि वैश्यः शूद्रस्तथैव च॥
इति। जपादिभिर्वा प्रतिपूरणं कर्तव्यम्।
१०१ यदुक्तं च मानवं —
यस्मिन्कर्मण्यस्य कृते मनसस्स्याद्लाघवम्।
तस्मिंस्तावत्तपः कुर्याद्यावत्तुष्टिकरं भवेत्॥
इत्यादि। तत्रैकस्यां शूद्रः कृतप्रायश्चित्त-

संवत्सरेऽतीते पुनरपि तस्यामेव यदि
दुष्टो भवति तदा पूर्वप्रायश्चित्ताद्द्विगुणं
तेन कर्तव्यमिति। कुतः —
संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः ॥
इति दर्शनात्। संवत्सरवचना-
त् संवत्सरद्वयव्यतीतस्य तावदेव इति
द्रष्टव्यम्। संवत्सरादर्वाक् प्रथमे मासि
द्वादशगुणितस्य। एवं मासानुमासिकं
ह्रासेनेति भाष्यकारेण व्याख्यातम्।
प्रतिमासं त्रैराशिकफलं कल्प्यं कृत-
प्रायश्चित्तस्य एवेदं अभिशस्तस्य
710 दुष्टस्येति पदद्वयोपादानात्। अकृतप्रा-
यश्चित्तस्य तु जपादिभिरेव पूरणम्।
तत्र समस्तश्रोत्रियस्य ब्राह्मणस्य भार्यां
प्रजावतीं पतिव्रतां बलादालभ्याचतु-
र्थादुपशमात्पातित्यं द्रष्टव्यम्। आप-

स्तम्भवचनात् । सवर्णायामनन्यपूर्वा-
यां सकृत्संनिपाते पादः पतत्येवमभ्या-
से पादः पादः चतुर्थे सर्वमिति ।

॥ द्रव्यलाभे चोत्सर्गः ॥

यदि परस्त्रीतो द्रव्यं लब्धं ततस्तस्यो-
त्सर्गः कार्यः । त्यागश्च विना प्रतिग्रह-
धर्मेण परित्यागः । चकाराद्यच्चान्यदु-
पयुक्तं तदपि प्रतिपादयेत् ॥

॥ यथा स्थानं वा गमयेत् ॥

७॥ स्वामिन एवाभक्तादिकं केन चिद्व्याजेन
प्रतिपादयेदित्यर्थः ॥

॥ प्रतिषिद्धमन्त्रयोगे सहस्र-
पा (वा) कश्चेत् ॥

प्रतिषिद्धस्य । प्रशस्तादिजातेर्मन्त्रयो-
गोऽध्ययनाध्यापनादि क्रिया तस्मि-
न् कृते संवत्सरं प्राकृतं ब्रह्मचर्यम् ।

अज्ञानादिदमितरत्र पतितत्वं यथा
स्यादिति । वासौ मन्त्रयोगस्सहस्र-
पाकस्स्यात् । पाकशब्देन पदमुच्यते ।
सहस्रशब्दो बहुत्ववचनः । अतो यदि म-
हान्तं ग्रन्थमभ्यस्यतीत्यर्थः । एवं चाल्पे
पूर्वोक्तं संहिताध्ययनं द्रष्टव्यम् । पतितविष-
यमिदमुपपातके तु वसिष्ठोक्तं द्रष्टव्यम् ।
पतितचण्डालशवपूतिश्रवणे त्रिरात्रं
712 वाग्यतो अनश्नन्त आसीरन् सहस्रप-
रमं वा तदभ्यस्यन्तः पूता भवन्तीति
विज्ञायते । एतेनैव गर्हिताध्यापकया-
जका व्याख्याताः । दक्षिणात्यागाच्च
पूता भवन्तीति विज्ञायत इति ।
अत्राप्यज्ञानात्त्रिरात्रं वाग्यतैरनश्न-
द्भिर्भवितव्यं सहस्रपाकादर्वागूर्ध्वं-
तु यावदध्यापितं तावत्साहस्रपरं जपो

द्रष्टव्यः॥

प्रतिषिद्धे कृतमनुवाकं सहस्त्रयमभ्य-
सेदित्यौशनसवचनात्। अन्ये तु मन्त्र-
योगेन सहाध्ययनं सह याजनं चोच्यते।
अतश्च प्रतिषिद्धेन सहैकत्राध्ययनं स-
हयाजनं वा कृत्वा प्राकृतं ब्रह्मचर्यमिति।
अत्रापि पूर्वोक्तविषयभेदेषु तत्तदेव
७।३ प्रायश्चित्तं द्रष्टव्यम्। सहाध्ययनस-
ह्याजनयोस्तुल्यत्वादिति॥

॥ अग्न्युत्सादि निराकृत्युपपात-
केषु चैवम्॥

यस्य देशोपप्लवादिना श्रौतानामग्नी-
नां बहुकालं वियोगो भवति सोऽग्न्यु-
त्सादि। निराकृतिरुक्तः। न चासावुप-
पातकत्वेन गृह्यते। दुर्बलादुर्धर्म-
भिहितत्वादुत्सृष्टाग्निस्त्वन्यत्राव

ख्यातः।
श्रौतानामेव नास्तिक्येन परित्यके-
ति। अतैवं विषयविभागो द्रष्टव्यः।
यो नास्तिक्येन कर्माणि परित्यजति
यस्य देशोपप्लवादिना वा बहुकालं
गच्छति तस्य संवत्सरं प्राकृतं ब्र-
७।५ ह्मचर्यम्। अल्पकाले तु प्राजापत्यम्।
यथाह वासिष्ठः — योऽग्नीनपविध्यात्
कृच्छ्रं द्वादशरात्रं चरित्वा पुनराधा-
नं कारयेदिति। य आलस्यादिना
नास्तिक्याद्देशोपप्लवाद्यन्तरेणापि
परित्यजति। तस्य चान्द्रायणं द्रष्ट-
व्यम्। यथाह मनुः —
अग्निहोत्र्यपविध्याग्नीन् ब्राह्मणः कामकारतः।
चान्द्रायणं चरेन्मासं वीरहत्यासमं हि तत्॥
इति। मासमपविद्धस्येदं, तस्माद्-

ध्वं कृच्छ्रोत्तरं द्रष्टव्यम् ॥—

अग्निहोत्र्यपविध्याग्नीन् मासादूर्ध्वं तु कामतः ।
कृच्छ्रं चान्द्रायणं चैव कुर्याद्वै ह्यविचारयन् ॥

इति । मासादर्वागपि चान्द्रायणमेव
विस्पष्टार्थं वा मासग्रहणमिति भाष्य-
775 कारेणोक्तत्वात् सर्वत्र पुनराधानमती-
तकालहोमश्चैव न प्रायश्चित्तान्तरमस्ति ।
नास्तिक्ये तु प्राजापत्यं द्रष्टव्यम् । यथाह
व्याघ्रः —

योऽग्निं त्यजति नास्तिक्यात् प्राजापत्यं चरेद्द्विजः ।
अन्यत्र पुनराधानं दानमेव तथैव च ॥

इति । निराकृतेरन्ये येवं (अपाक्तत्वेन) सक्तत्वेनाभि- 2
हिताः उपपातकवर्जितास्तेषां मनुनोक्तं
द्रष्टव्यम् ॥—

षष्ठान्नकालता मासं संहिता जप एव च ।
होमाश्च शाकला नित्यमपङ्क्त्यानां विशोधनम् ॥

इति। उपपातकेष्विति बहुवचनं स्मृ-
त्यन्तरोक्तानामुपपातकानामप्युपलक्ष-
णार्थम्। यथाह मनुः —

716 गोवधो याज्यसंयाज्यं पारदार्यमतिक्रयः।
गुरुमातृपितृत्यागस्स्वाध्यायाग्न्योस्सुतस्य च॥
परिवित्तिताऽनुजेन परिवेदनमेव च।
तयोर्दानं च कन्यायास्तयोरेव च याजनम्॥
कन्याया दूषणं चैव वार्धुषित्वं व्रतच्युतिः।
तटाकारामदाराणामपत्यस्य च विक्रयः॥
व्रात्यता बान्धवत्यागः भृताध्यापनमेव च।
भृताच्चाध्ययनादानं अपण्यानां च विक्रयम्॥
सर्वाकरेष्वधीकारो महायन्त्रप्रवर्तनम्।
हिंसौषधीनां स्त्र्याजीवोऽभिचारो मूलकर्म च॥
717 इन्धनार्थमशुष्काणां द्रुमाणामवपातनम्।
आत्मार्थं च क्रियारम्भो निन्दितान्नस्य चादनम्॥
अनाहिताग्निता स्तेयमृणानां चानपक्रिया।

(धि)
असच्छास्त्राधिगमनं कौटिल्यं व्यसनक्रिया ॥
धान्यकुप्यपशुस्तेयं मद्यपस्त्रीनिषेवणम् ।
स्त्रीशूद्रविट्क्षत्रवधो नास्तिक्यं चोपपातकम् ॥
इति । अत्र केषांचिदाहत्यैव प्रायश्चित्ता-
नि स्मृत्यन्तरे श्रूयन्ते । यथाह वसिष्ठः —
परिवित्तिः कृच्छ्रं द्वादशरात्रं चरित्वा
पुनर्निविशेत तां चैवोपयच्छेत परि-
विदानः कृच्छ्रातिकृच्छ्रौ चरित्वा त-
स्मै दत्वा पुनर्निविशेत । अग्रे दिधि-
षूपतिः कृच्छ्रं द्वादशरात्रं चरित्वा तस्मै
7।8 दत्वा पुनर्निविशेत । दिधिषूपतिः कृच्छ्रा-
तिकृच्छ्रौ चरित्वेत्यादि गोवधेऽप्युक्तं अ-
याज्यसंयाजनपारदार्येऽप्युक्तं स्वाध्या-
याग्न्योः परित्यागेऽप्युक्तं कन्यादूषणे
च वसिष्ठ आह — गुर्वीं सखीं गुरुसखीं
नवपात्रीं पतितां च गत्वा कृच्छ्राब्द-

पादं चरेत्। इत्येतदकामतो द्रष्टव्यम्।
(श्लो)
बुद्धिपूर्वे तु गुरुतल्पव्रतं कुर्यात्
रेतस्सिक्त्वा स्वयोनिषु।
सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु च॥
इति मनुनोक्तं द्रष्टव्यम्। गुरुतल्प-
व्रतं द्रष्टव्यम्। यद्यपि सामान्येनोक्तं
तथापि जातिविशेषात् प्रायश्चित्तविशे-
षो द्रष्टव्यः। ब्राह्मणकन्यायां सर्वं क्षत्रिय-
71 कन्यायामर्धमित्यादि। व्रात्यस्य वसि-
ष्ठोक्तं द्रष्टव्यम्। पतितसावित्रीक उद्दा-
लकव्रतं चरेदित्यादि। मनुरप्याह :—
येषां द्विजानां सावित्री नानूच्येत यथाविधि।
तांश्चारयित्वा त्रीन् कृच्छ्रान्यथाविध्युपनयेदिति॥
तत्र बहुकालातिक्रम उद्दालकं मध्ये मे
कृच्छ्रत्रयं, स्वल्पकालातिक्रमे व्रात्यस्तो-
मयाग इति द्रष्टव्यम्।

तत्र भृताध्यापनं वेदविप्लावनमित्युक्तम्।
कद्रुश: कृते पातित्यं तत्र सागरप्रोक्त:।
त्यजेत्पितरमित्यादिना॥ अन्यत्र मनुराह —
720 शरणागतं परित्यज्य वेदं विप्लाव्य च द्विज:।
संवत्सरं यवाहारस्तत्पापमपसेधति ॥
इति। अभिचारस्यापि मनुराह —
व्रात्यानां याजनं कृत्वा परेषामन्त्यकर्म च।
अभिचारमहीनं च त्रिभि: कृच्छ्रैर्विशुध्यति ॥
इति। द्विजातिवध इदम्। इदमभिचा-
र्ये प्राजापत्यं चरेदिति पैठीनसिवच-
नात् निन्दिताध्यापनेन च वक्ष्यति अभो-
ज्यभोजने निष्पुरुषीभाव: इत्यादि।
तत्र बुद्धिपूर्वाभ्यासे उपपातकं वेदितव्य-
म्। येषामुपपातकानामाह स्म विधानं ना-
स्तीति तेषामिदं संवत्सरं प्राकृतं ब्रह्म-
चर्यं द्रष्टव्यम्॥

अभ्यासविषयं चेदम्। इतरत्र तु
मनुनोक्तं —

72। एतदेव व्रतं कुर्युरुपपातकिनो द्विजाः।
अवकीर्णिवर्जं शुद्ध्यर्थं चान्द्रायणमथापि वा॥

इति। तत्राप्यबुद्धिपूर्वे चान्द्रायणमितरत्र गोवधप्रायश्चित्तं द्रष्टव्यम्। चकारादेवातिदेशे सिद्धे एवंकारकरणं समस्तातिदेशार्थम्। ततश्च द्रव्यलाभे चोत्सर्ग इत्यादि द्रष्टव्यम्॥

॥ स्त्री चातिचारिणी गुप्ता
पिण्डं तु लभेत॥

स्त्री चैतदेव प्रायश्चित्तं कुर्यात्। अतिचारिणी व्यभिचारिणी। शूद्रव्यभिचारउक्तत्वात् द्विजातिव्यभिचार इदम्। बुद्धिपूर्वे सकृद्गमने चेदम्। अन्यत्र तु यत्पुंसः परदारेष्वित्युक्तत्वात्।

समानजातिव्यभिचारे चेदं ब्राह्मण्याः
७२२ क्षत्रियव्यभिचारे वसिष्ठोक्तं द्रष्टव्यम् ।
व्यवाये तु संवत्सरं घृतपटं धारयेत्
गोमयकर्दमे कुशप्रस्तरे वा भुञ्जानोऽधः
शयीत । ऊर्ध्वं संवत्सरादप्सु निमग्ना-
याः सावित्र्याष्टसहस्रेण शिरोभिर्जुहु-
यादिति । वैश्यगमने शौशनसं द्रष्टव्य-
म् । व्यभिचारिणी कृच्छ्राब्दपादं चरे-
दिति । उत्तमाभिगमने नीचाया अर्धार्धं
परिकल्प्यम् । तथा संभाषणे च श्रूयते ।
मनसा भर्तुरतिचारे त्रिरात्रं यावकं क्षीरो-
दनं वा भुञ्जानाधः शयीत, ऊर्ध्वं त्रिरा-
त्रादप्सु निमग्नायास्सावित्र्याष्टशतेन
शिरोभिर्जुहुयात् पूता भवतीति विज्ञा-
यते । वाक्संबन्ध एतदेव मासं चरित्वा
७२३ ऊर्ध्वं मासादप्सु निमग्नायास्सावित्र्या-

श्चतुर्भिरष्टशतैः शिरोभिर्जुहुयादिति।
इदमपि सकृत्स्थापणायामभ्यासे तु म-
नुनोक्तम्। पुनः शब्दश्रवणात् यथाह-
स एव सा चेत् पुनस्संप्रदुष्येत्सदृशेनोप-
मन्त्रिता। कृच्छ्रं चान्द्रायणं चैव तद-
स्याः पावनं स्मृतम्॥ इति।
हीनसंभाषणे तु द्विगुणमुक्तमसंभाषणे
तु द्विगुणं उक्तमसंभाषणे अर्धम-
त्रापि द्रष्टव्यम्। एवं व्यभिचारिणी या
न शुध्यति सा गुप्ता रक्ष्यमाणा पिण्डं
प्राणधारणमात्रमन्नं लभेत। तुशब्दात्
कौपीनाच्छादनमात्रं वासश्च लभेत।

॥ अमानुषीषु गोवर्जं स्त्रीकृते
कूश्माण्डैर्घृतहोमः॥

724. गोवर्जितास्वमानुषीषु वडवाद्यासु
स्त्रीकृते मैथुन आचरिते कूश्माण्डैर्घ-

द्वेवा द्वेवहेळनमिसादिभिरेकैकमन्त्रैर्यजुर्भिर्घृतहोमः कर्तव्यः। अभ्यासाद्धोमावृत्तिर्द्रष्टव्या॥ ॐ॥

इति मस्करीये गौतमभाष्ये
द्वाविंशोऽध्यायः॥

॥ ॐ॥

अधुना क्रमप्राप्तं सुरापानप्रायश्चित्तमाह—

॥ सुरापस्य ब्राह्मणस्योष्णामा-
725 सिञ्चेयुस्सुरामास्ये मृतः शुध्येत॥

सुराशब्देन त्रिप्रकारा सुरा गृह्यते। ब्राह्मणग्रहणात्तं प्रति त्रिप्रकारायाः प्रतिषिद्धत्वात्। यथाह मनुः—

गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा।
यथैवैका न पातव्या तथा सर्वा द्विजोत्तमैः॥

इति। अमत्या पानं इति वक्ष्यमाणत्वा-
त् मम्मति पूर्वं इदमिति चावगम्यते।
क्षत्रियवैश्ययोरपि पैष्टीपान इदमेव
द्रष्टव्यम्। तयोः प्रति इतरस्या एव
प्रतिषिद्धत्वात्। तथाच मनुः—
सुरा वै मलमन्नानां पाप्मा च मलमुच्यते।
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्॥
इति। तथा—
726 सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत्।
तया स काये निर्दग्धे मुच्यते किल्बिषात्ततः॥
इति। प्रायश्चित्तविधाने द्विजग्रहणात्
यस्य यत्प्रतिषिध्यते तस्य तत्पाने
बुद्धिपूर्वं तस्या एवाग्निवर्णायाः पानमे-
व प्रायश्चित्तमित्यवगम्यते। अत्रापि ब्रा-
ह्मणस्य गौडीमाध्व्योरबुद्धिपूर्वेऽभ्या-
से त्रयाणां पैष्ट्या बुद्धिपूर्वे सकृत्पाने

चेदं दृष्टव्यम् । कुतः । गौडीमाध्व्योर्मति-
पूर्वे सकृत्पाने प्रायश्चित्तदर्शनात् । य-
थाह वसिष्ठः — मद्यपाने त्वसुरायास्सुरा-
याश्चाज्ञाने कृच्छ्रातिकृच्छ्रौ घृतप्राशः
पुनस्संस्कारश्चेति । अत्र सुरायाश्चाज्ञा-
न इत्युक्तत्वान्मद्यपानस्य मतिपूर्वत्वम-
१२१ वगम्यते । इति । कृच्छ्रश्चात्र तप्तकृच्छ्रः ।
स्मृत्यन्तरदर्शनात् । मद्यं पीत्वा कृच्छ्र-
तप्तकृच्छ्रावातिष्ठेतेति पैठीनसिदर्शना-
त् उष्णामग्निवर्णामिति दृष्टव्यम् । मृतः
शुध्येदित्यारभ्यासिञ्चेयुरित्यभिमुख्ये-
न उपदिशेयुरित्यर्थः । हेतुकर्तृषु कर्तृव्य-
पदेशः न साक्षात्कर्तृ: । पानस्य कर्ता
स्वयमेवेति । तथाह्यापस्तम्बः —
सुरापोऽग्निस्पर्शां सुरां पिबेदिति ।
आसिञ्चेयुरिति बहुवचनमुपदेष्टॄणां

बहुत्वसूचनार्थम्। तथाच मनुः—

तेषां ब्रह्मविदो ब्रूयुस्त्रयोऽप्येनःसु निष्कृतिम्।

सा तेषां पावनाय (स्मा) स्यात् पवित्रं विदुषां हि वाक्॥

इति। शङ्खोऽप्याह—

वर्षज्ञानमतस्सम्यगेनोऽपि ख्याप्य तत्त्वतः।

७२८ यद्ब्रूयुस्तद्विधानज्ञास्तच्छुद्धिकरमुत्तमम्॥

इति। आस्ये मुखे मृतः शुध्येत् मर-
णादेव पूतो भवति। सुरामास्य इत्यत्र
सुराशब्दो गोमूत्रादीनामप्युपलक्ष-
णम्। यथाह मनुः—

गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा।

पयो घृतं वा मरणात् गोशकृद्रसमेव वा॥

इति। जातिवचनत्वात् ब्राह्मणशब्दस्य
ब्राह्मण्या अपि सुरापाने एतदेव प्रायश्चि-
त्तम्। तथा शङ्खोऽपि स्त्रिय एवाधिकृ-
त्याह— सुरालशुनपलाण्डुगृञ्जनमां-

सादीन्यभक्ष्याणि वर्जयेत। आहारमयं-
शरीरं तन्मयत्वाद्वा संकीर्यत इत्यादि।
तथा वसिष्ठोऽपि—
पतत्यर्धं शरीरस्य भार्या यस्य सुरां पिबेत्।
पतितार्धशरीरस्य निष्कृतिर्न विधीयते॥
७२१ इति। तथा तत्रैव या ब्राह्मणी सुरा पीता
देवा पतिलोकं नयन्तीहैव सा भ्रमति क्षी-
णपुण्याप्सु जलूका भवति शुक्तिका वेति।
अन्ये तु देशान्तराचारदर्शनात् —
पूर्वं स्त्रियः सुरैर्भुक्ता सोमगन्धर्ववह्निभिः।
गच्छन्ति मानुषान् पश्चात्तस्मान्निष्कसमा स्त्रियः॥
तासां सोमो ददच्छौचं गन्धर्वः शिक्षिता गिरम्।
अग्निश्च सर्वभक्षत्वं तस्मान्निष्कसमा स्त्रियः॥
इति वसिष्ठस्मृतिदर्शनाच्च ब्राह्मण्या नैत-
त्प्रायश्चित्तमिच्छन्ति। तत्र देशव्यवस्था-
यां व्यवस्थितविकल्पो द्रष्टव्यः॥

॥ अमत्या पाने पयो घृतमुदकं
वायुं प्रति त्र्यहं तप्तानि स
कृच्छ्रः ॥

अमत्या अज्ञानेन पाने गौडीमाध्व्योर्पाना-
730 धिकारे पुनः पानग्रहणात् तथाच मनुः —
अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति।
मतिपूर्वमनिर्देश्यं प्राणान्तमिति धारणा ॥
इति। अत्रापि तप्तकृच्छ्रसहितेन संस्का-
रेणेति भाष्यकृता व्याख्यातम्। एवं च
पैष्ट्या अमत्या सकृत्पाने ब्राह्मणस्यान्य-
द्द्रष्टव्यम्। यथाह मनुः —
कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि।
सुरापानापनुत्यर्थं पापवासा जटी ध्वजी ॥
इति। क्षत्रियवैश्ययोस्तु यथोदाहृतं
वसिष्ठोक्तं द्रष्टव्यम्। सुरायाश्चाज्ञान
इत्यादि। तस्या अबुद्धिपूर्वेऽभ्यासे

त्रयाणां मरणान्तिकमेव द्रष्टव्यम्। यथाह

73। वसिष्ठः — अभ्यसेतु सुरा या (स्तां) अग्निवर्णां
तां पिबेद्द्विजः इति। अत्र तु शब्दो विशे-
षवाची। द्विजातीनां पैष्ट्या अबुद्धिपूर्वेऽ-
भ्यासे विशेषतोऽग्निवर्णायास्तस्याः पाने
मरणादेव शुद्धिः। तथाच व्याघ्रः —

मत्वा[मद्यम] मत्वा[वा] पुनः पीत्वा द्विजोत्तमः।
ततोऽग्निवर्णां तां पीत्वा मृतः शुध्येत्स किल्बिषात्॥

इति। क्षत्रियवैश्ययोस्तु गौडमाध्व्यो-
रप्रतिषेधः। तथाच व्यासः —

उभौ मध्वासवं पीत्वा उभौ चन्दनचर्चितौ।
एकपर्यङ्कशायितौ दृष्टौ मे केशवार्जुनौ॥

इति। ततश्चामतिपूर्वे गौडीमाध्व्योर्ब्रा-
ह्मणस्य सकृत्पाने क्षीरादीनां त्र्यहं
कर्तव्यम्। पय आदीनां विसमासकर-
णं च क्रमनिवृत्त्यर्थं, तथाच वसिष्ठः —

732 त्र्यहमुष्णाः पिबेदापः त्र्यहमुष्णं पिबेत्पयः।
त्र्यहमुष्णं घृतं पीत्वा वायुभक्षः परं त्र्यहम्॥
इति। तप्तकृच्छ्र इति। उदकघृतपयसा-
मेवोष्णत्वं, असंभवाद्वायोः सकृच्छ्र
इति कृच्छ्रविध्युपसंग्रहार्थः। तिष्ठेद्
हनि रात्रावासीतेत्यादेः॥
॥ ततोऽस्य संस्कारः॥
तत इति कृच्छ्रानन्तरमेव संस्कार
इति। अस्य ग्रहणं वीप्सार्थः। अस्या-
स्येति। तदपि पैष्ट्या अबुद्धिपूर्वे स-
कृत्पाने क्षत्रियवैश्ययोरपि संस्कार-
प्रापणार्थम्। ब्राह्मणाधिकारात्तयोर्नि-
वृत्तिर्माभूदित्युत्तरार्थं वा। मूत्रादि
प्राशने ब्राह्मणस्यैव पुनस्संस्कार
733 इति। संस्कार उपनयनमात्रं न तु
वेदव्रतधारणादि पुनस्संस्कारस्व-

एवं च स्मृत्यन्तरावगन्तव्यम्। यथा-
ह मनुः —
वपनं मेखलौ दण्डो भैक्षचर्या व्रतानि च।
एतानि तु निवर्तन्ते पुनः संस्कारकर्मणि ॥ इति ॥

॥ मूत्रपुरीषरेतसां च प्राशने ॥

मूत्रादीनां प्राशने एतदेव प्रायश्चित्तम्।
चकारः पुनस्संस्कारानुकर्षणार्थः।
इदं बुद्धिपूर्वे। कुतः। मनुवचनात् —
भुक्त्वातोऽन्यतमस्यान्नममत्या तु त्र्यहं क्षपेत्।
मत्या भुक्त्वा चरेत्कृच्छ्रं रेतो विण्मूत्रमेव च॥
इति। अत्र कृच्छ्रशब्देन तप्तकृच्छ्रोऽभि-
हितः। इति भाष्यकारेणोक्तत्वात्। उ-
त्तरत्रान्येषामभक्ष्याणां प्रायश्चित्तो-
735 पदेशान्मनुष्याणां मूत्रादिप्राशन इ-
त्यवगन्तव्यम्। अबुद्धिपूर्वे च —
भुक्त्वाऽतोऽन्यतमस्यान्नममत्या तु त्र्यहं क्षपेत्।

इत्यनेनैव त्र्यहो वेदितव्यः। बुद्धिपूर्वे तुल्यप्रायश्चित्तदर्शनात्। तथाच कवषः—

रेतोमूत्रपुरीषाणां प्राशने मतिपूर्वके।
नाश्नीयात्तु त्र्यहं मत्या तप्तकृच्छ्रं चरेद्द्विजः॥

इति। अमतिविषये पुनस्संस्कारो द्रष्टव्यः। यथाह मनुः—

अज्ञानात्प्राश्य विण्मूत्रं सुरा संस्पृष्टमेव च।
पुनस्संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः॥

इति। केचिदेतदेव प्रायश्चित्तमिच्छन्ति। तदपि सकृत्प्राशने। एवं च यत्र मूत्रपुरीषप्राशने प्रायश्चित्तमुक्तं 'नरकाकवराहाणां च' इत्यादौ तत्र मनुष्यवर्जितस्य द्रष्टव्यम्॥

735 ॥ श्वापदोष्ट्रखराणां चाङ्गस्य॥

प्राशन इदमनुवर्तते। श्वापदाः श्वसदृशपादास्सृगालादयः। उष्ट्रखरौ

प्रसिद्धौ। तेषामङ्गस्य मांसचर्मादेर्भ-
क्षण एतदेव प्रायश्चित्तम्। श्वसदृशा-
मानां विधानादेव शुनोऽप्यर्थसिद्ध-
म्। चशब्दान्मनुष्याणां च।

॥ ग्राम्यकुक्कुटसूकरयोश्च ॥

कुक्कुटसूकरयोश्चाङ्गप्राशन एतदेव प्रा-
यश्चित्तम्। पृथग्योगः पूर्वैश्च दुष्ट-
स्येह गतः अनयोर्वर्जनार्थः। अस्मिन्
बुद्धिपूर्वादौ पूर्वमेवोक्तम्। चकारः पुनस्सं-
स्कारानुकर्षणार्थः॥

॥ गन्धाघ्राणे सुरापस्य प्राणा-
यामा घृतप्राशनं च ॥

सुरापस्याविशेषितत्वात् सर्वस्य गन्धा-
736 घ्राणे सुरागन्धागन्धोपाघ्राणेन तु
शरीरगन्धाघ्राणे तत्रापि च न चान्या-
वस्थितसुराघ्राणे सुरागन्धाघ्राण इति

वक्तव्ये सुरापस्य इति निर्देशात्।
ततश्चान्याबास्थितसुरागन्धावघ्राणे
जातिभ्रंशकरत्वं द्रष्टव्यम्। यथाह
मनुः—
ब्राह्मणस्य रुजः कृत्यं घ्रातिराघ्रेयमद्ययोः।
जैह्म्यं पुंसि च मैथुन्यं जातिभ्रंशकरं स्मृतम्॥
इति। तथा प्रायश्चित्तमपि जातिभ्रं-
शकरं कर्म कृत्वान्यतरमिच्छया चरे-
त्सान्तपनं कृच्छ्रं प्राजापत्यमनिच्छ-
येति यस्य यत्जातिसिद्धं तस्य तद्ग-
न्धाघ्राण इति च सामर्थ्याद्द्रष्टव्यम्।
अविशेषितत्वाद्द्विजातीनां सामान्यमेव
जातिभ्रंशकरप्रायश्चित्तं द्रष्टव्यम्।
737 ब्राह्मणस्यार्धं क्षत्रियस्य इत्यस्यानु-
प्रवेशो नास्ति। अत्र स्मृत्यन्तरदर्श-
नात्। यथाह कण्वः—

वैश्यश्चापि

२ ब्राह्मणः क्षत्रियो वापि तथैव च ।
सुरायाः गन्धमाघ्राय चरेत्सान्तपनं व्रतम् ॥
इति। प्राणायामास्त्रयो द्रष्टव्याः। एताव-
ता बहुवचनस्य कृतार्थत्वात्। घृतप्राशनं
कायाप्लवनमात्रं तत्कृत्वा भोक्तव्यं उपवा-
सविध्यभावात्। विसमासचकारकरणौ
व्यस्तसमस्तकल्पनार्थौ। अतो ब्राह्मणस्य
समस्तं क्षत्रियस्य प्राणायामा वैश्यस्य
घृतप्राशनमिति द्रष्टव्यम्। अत्रापि ब्रा-
ह्मणस्याहिताग्नेर्विशेषो द्रष्टव्यः।
यथाह मनुः —
ब्राह्मणस्तु सुरापस्य गन्धमाघ्राय सोमपः।
१३४ प्राणानप्सु त्रिराचम्य घृतं प्राश्य विशुध्यति॥
इति। क्षत्रियादेर्विशेषाभावो वचना-
भावात्।

॥ पूर्वैश्च दृष्टस्य ॥

पूर्वैः श्वापदादिभिस्समानुपेदष्टस्य
एतदेव प्रायश्चित्तम्। ~~श्वश्च~~ चशब्दा-
द्ग्राम्यैश्च क्रव्याद्भिः। तथाच मनुः—
श्वसृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च।
नराश्वोष्ट्रवराहैश्च प्राणायामेन शुद्ध्यति॥
इति। अत्राप्येवं विषयो द्रष्टव्यः।
एतैर्दष्टब्राह्मणस्य वसिष्ठोक्तं द्रष्टव्यम्॥—
ब्राह्मणस्तु शुना दष्टो नदीं गत्वा समुद्रगाम्।
प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति॥
इति। शुनो ग्रहणमेतेषामप्युपलक्षणा-
र्थत्वात् क्षत्रियस्येदं प्राणायामत्रयं द्र-
739 ष्टव्यम्। वैश्यस्य मनुनोक्तमेकं प्राणा-
यामं द्रष्टव्यम्। प्राणायामेनेत्येकवचन-
निर्देशात् शूद्रस्य न दोषः। स्त्रिया-
श्च सचेलस्नानं द्रष्टव्यम्॥
यथाह जातूकर्णिः—

ब्राह्मणी क्षत्रिया वैश्या शूद्रा च श्वापदैरपि।
दृष्टा सचेलमाप्लुत्य शुध्यन्तीतु न संशयः ॥ इति ॥
॥ तप्ते लोहशयने गुरुतल्पगः शयीत ॥
तप्तेऽग्निवर्णे आयसे शयने गुरुभार्यागा-
मी स्वप्स्यात् ॥
॥ सूर्मीं वा श्लिष्येज्ज्वलन्तीम् ॥
सूर्मीं लोहमयीं स्त्रीप्रतिकृतिमन्तः सुषि-
रां, अन्तस्सुषिरकाष्ठाग्निसपरे । तां ज्व-
लन्तीमुपगूहेत ॥
॥ लिङ्गं वा सवृषणमुत्कृत्याञ्जला-
740 वाधाय दक्षिणां प्रतीचीं व्रजेद-
जिह्ममा शरीरपातान्मृतः
शुध्येत ॥
पुरुषं वा जीवसहितं समूलमुत्कृत्य हस्त-
द्वये स्थापयित्वा नैरृतीं दिशं व्रजेत ।
अजिह्मं कुपाद्यपरिहरन् आशरीरपातात्

आ। विनाशान्मृतः शुध्येत। अयं च सर्व-
शेषः। मरणान्तिकत्वाद्वैतेषां विकल्पे
सिद्धे वाग्रहणं विकल्पार्थम्। ततश्च त-
योरिच्छतोस्संयोगे प्रथमं, तया प्रो-
त्साहितस्य, द्वितीयं; पुरुषेण प्रोत्साहि-
तस्य तृतीयमिति। एतदपि ब्राह्मणस्य
ब्राह्मणीगमने। बुद्धिपूर्वे तु सकृद्गमने
मनुनोक्तं द्रष्टव्यं —
खट्वाङ्गी चीरवासा वा श्मश्रुलो निर्जनेवने।
7.41 प्राजापत्यं चरेत्कृच्छ्रमब्दमेकं समाहितः॥
इति। इदमप्युभयोरिच्छतोस्संयोगे
तया प्रोत्साहितस्य, स्वेन वा प्रोत्साहिता-
यामौशनसवचनं द्रष्टव्यं — गुरुत-
ल्पगामी संवत्सरं ब्रह्महणव्रतं षण्मासं
तप्तकृच्छ्रं वेति। तत्रापि तया प्रोत्साहि-
तस्य ब्रह्महणव्रतं, पुरुषेण प्रोत्साहि-

तायां तप्तकृच्छ्रमिति द्रष्टव्यम्। अबुद्धि
पूर्वेऽभ्यासे वसिष्ठोक्तं — निष्काळको
वा घृताक्तो गोमयाग्निनापादप्रभृत्या-
त्मानमवदाहयेत्। पूतो भवती-
ति विज्ञायत इति। एवं च ब्राह्मणी-
गमने ब्राह्मणस्य बुद्धिपूर्वे चाभ्यासे
मरणान्तिकमेव। क्षत्रियागमने व्याघ्रो-
क्तं द्रष्टव्यं —
कृच्छ्रं चैवातिकृच्छ्रं च तथा कृच्छ्रातिकृ-
752 च्छ्रकम्। चरेन्मासत्रयं विप्रः क्षत्रि-
यागमने गुरोः॥ इति॥
तत्रापि बुद्धिपूर्वे सकृद्गमने उभयोरिच्छा-
तः प्रवृत्तेति कृच्छ्रः। तया प्रोत्साहित-
स्य कृच्छ्रः। स्वेन प्रोत्साहितायाः कृ-
च्छ्रातिकृच्छ्रः। तत्राप्यभ्यासे मर-
णान्तिकमेव। यथाह कवषः —

मत्वा गत्वा पुनर्भार्यां गुरोः क्षत्रसुतां द्विजः।
वृषणवर्जितं लिङ्गमुत्कृत्य च मृतः शुचिः॥

इति। अबुद्धिपूर्वे सकृद्गमने कण्वोक्तं
द्रष्टव्यं —

चान्द्रायणं तप्तकृच्छ्रं अतिकृच्छ्रं तथैव च।
सकृद्गत्वा गुरोर्भार्यामज्ञानात् क्षत्रियो द्विजः॥

इति। तत्राप्युभयोरिच्छातः प्रवृत्ते
७५३ तप्तकृच्छ्रः। तया प्रोत्साहितस्याति-
कृच्छ्रः। स्वेन प्रोत्साहितायां चान्द्राय-
णं इति द्रष्टव्यम्। अभ्यासे तु कुत्सः —

गुरोः क्षत्रसुतां भार्यां पुनर्गत्वा स्वकामतः।
वृषणमात्रमुत्कृत्य शुद्ध्येज्जीवन्मृतश्च सन्॥

इति जातुकर्ण्युक्तं द्रष्टव्यम्। वैश्याग-
मने तु बुद्धिपूर्वे सकृद्गमने कवष आह —

तप्तकृच्छ्रं पराकं च तथा सान्तपनं गुरोः।
भार्यां वैश्यां सकृद्गत्वा बुद्ध्या मासं चरेद्द्विजः॥

इति। तत्राप्युभयोरिच्छातः प्रवृत्ते तप्त-
कृच्छ्रम्। तया प्रोत्साहितस्य सान्तपनम्।
आत्मना प्रोत्साहितायां पराकः। अभ्या-
से लिङ्गस्य छेदः कर्तव्यः। यथाह लोकाक्षिः—
गुरोर्वैश्यां पुनर्गत्वा गत्वा वापि पुनः पुनः।
लिङ्गाग्रं छेदयित्वा तु ततः शुध्येत्स किल्बिषात्॥
इति। अस्मादेव च ज्ञापकादभ्यासे य-
दुक्तं गुरुतल्पप्रायश्चित्तं, तदेव बहु-
शोऽभ्यासेऽपि द्रष्टव्यम्। अबुद्धिपूर्वे
सकृद्गमने प्रजापतिराह—
पञ्चरात्रं तु नाश्नीयात् सप्ताष्टौ वा तथैव च।
वैश्यां भार्यां गुरोर्गत्वा सकृदज्ञानतो द्विजः॥
इति। तत्राप्युभयोरिच्छातः प्रवृत्तौ
सप्तरात्रम्। तया प्रोत्साहितस्य पञ्चरा-
त्रम्। आत्मना प्रोत्साहितायामष्टरात्र-
मिति। अभ्यासे त्वामरणात् ब्रह्म-

चर्यरक्षणम्। यथाह हारीतः —

745 अभ्यस्य विप्रो वेश्यायां गुरोरज्ञानमोहितः।
स षडङ्गं ब्रह्मचर्यं स चरेद्यावदायुषम्॥

इति। सकृद्गमने बुद्धिपूर्वे जाबालिराह —

अतिकृच्छ्रं तप्तकृच्छ्रं पराकं च तथैव च।
गुरोः स्त्रियं सकृद्गत्वा बुद्ध्वा विप्रश्चरेत्ततः॥

इति। तत्राप्युभयोरिच्छातः प्रवृत्तौ तप्तकृच्छ्रम्। तथैव च प्रोत्साहितस्यातिकृच्छ्रः। आत्मना प्रोत्साहितायां पराक इति द्रष्टव्यम्। अभ्यासे तु द्वादशवर्षं ब्रह्मचर्यरक्षणं कर्तव्यम्। तथाहोपमन्युः —

पुनः स्त्रियं गुरोर्गत्वा बुद्ध्वा विप्रः समाहितः।
ब्रह्मचर्यमदुष्टात्मा स चरेद्द्वादशास्समाः॥

इति। अज्ञाते दीर्घतमा(पा) आह —

746 प्राजापत्यं सांतपनं सप्तरात्रोपवासकम्।

गुरोः शय्यां सकृद् गत्वा बुद्ध्वा विप्रस्समाहितः॥

इति। तत्राप्युभयोरिच्छातः प्रवृत्तौ सांतप-
नम्। तया प्रोत्साहितस्य प्राजापत्यम् आत्मना
प्रोत्साहितायामुपवासः इति। अभ्यासे
तु मनुनोक्तं द्रष्टव्यं —

चान्द्रायणं वा त्रीन्मासान् अभ्यासे
नियतेन्द्रियः। हविष्येण यवाग्वा वा
गुरुतल्पापनुत्तये॥ इति॥

साधारणास्त्रियां गुरुतल्पदोषो नास्ति।
व्याघ्रवचनात् —

जारत्वं पारदार्यं च गुरुतल्पत्वमेव च।
साधारणास्त्रिया नास्ति कन्यादूषणमेव च॥

इति। आचार्यव्यतिरिक्ताः पित्रादयो गु-
रवः। आचार्यपुत्रशिष्यभार्यासु चैवं इत्या-
७५२ चार्यादीनां भार्यास्वतिदेशाद्बुसिष्ठेन॥

॥ सखीसयोनिसगोत्राशिष्य-

भार्यासु स्नुषायां ~~कै~~ गवि च

तल्पसमः ॥

सखीमित्रं सयोनिर्भगिनीसगोत्रा एकार्थे-

याः। एतासु शिष्यभार्यायां च पुत्रभार्या-

यां च गवि च मैथुन आचरिते गुरुतल्प-

तुल्यो निष्क्रयः। बिसमासस्सखादिभार्यो-

पसंग्रहार्थः। तथाच मनुः —

गुरुतल्पव्रतं कुर्याद्रेतस्सिक्त्वा स्वयोनिषु।

सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु च॥

इति। चशब्द आश्रितादि भार्योपसंग्र-

हार्थः। तथाच व्याघ्रः —

आश्रितस्या ~~विकुस~~ पि विदुष आहिताग्नेश्च योगिनः।

748 आचार्यस्य तु राज्ञश्च भार्यां प्रव्रजितां तथा॥

धात्रीं पुत्रीं च पौत्रीं च सखीं मातुस्तथैव च।

पितुः सखीं तथा गत्वा गुरुतल्पव्रतं चरेत्॥

इति॥

2 3 adh.

Compared by — 1. T. A. K. Venkatachariar 15-3-55

" 2. V. Rajagopala Sarma 15.3.55

॥ अवकर इत्येके ॥
एकेऽवकीर्णिव्रतं कर्तव्यं इति मन्यन्ते।
न गुरुतल्पव्रतमिति करणस्सन्देहव्या-
वृत्त्यर्थः। यद्येवमुच्यते-
2 ॥ अवकर एक इति ॥
ततोऽवकीर्णिनोऽपि गुरुतल्पसमो दो-
षः। इत्यव्ययस्याशङ्का स्यादिति। सोऽ-
यं विकल्पोऽभिसन्ध्यपेक्षया द्रष्टव्यः।
अभिसन्धौ गुरुतल्पसमव्रतमनभि-
सन्धाववकीर्णिव्रतमिति। एवं चात्र
पारदार्यं कृच्छ्रं कृत्वा पुनरवकीर्णिव्र-
749 तमिति द्रष्टव्यम्। तथाच जातुकर्णिः —
आचार्यादेस्तु भार्यासु गुरुतल्पव्रतं चरेत्।
अवकीर्णिव्रतं चैव ततः कुर्यात्समाहितः॥ इति।
गुरुतल्पसमेऽपि पारदार्यादधिकं गुरुत-
ल्पाद्धीनं कल्प्यम्। तदपि पारदार्यप्रा-

यश्चितमेव चान्द्रायणाधिकं द्रष्टव्यम्।
चान्द्रायणस्य च वर्णक्रमेण पादहीनकल्प-
ना कर्तव्या। तथाच प्रजापतिः —
आचार्यादेस्तु भार्यासु चरेच्चान्द्रायणाधिकम्।
क्रमेण पादशो हीनं वर्णानामिति च स्थितिः ॥
अवकीर्णिप्रायश्चित्तमपि रक्तोस्यं - त-
थाहुः कतिधावकीर्णिप्रविशतीत्यादि
यद्दृश्यते। तथाच प्रजापतिः - आचार्या-
दे भार्यासु प्रवर्तमानः पारदार्यं समाप्य
वर्णक्रमेण मासं पक्षं दशाहं सप्ताहं पं-
चाहं निऋयग्नावाज्येन जुहुयात्।
कामावकीर्णोऽस्म्यवकीर्णोऽस्मि काम-
कामाय स्वाहा कामाभिद्रुग्धोऽस्म्य-
भिद्रुग्धोऽस्मि कामकामाय स्वाहे-
२५० एतद्धोमं श्रोत्रियभार्यागमने द्विगुणं
कुर्यादित्यादि कन्यागमनेऽर्धमित्युपादि-

प्नोतीति सर्वेषां समीकरणाभिप्राये सर्वत्र प्रायश्चित्तमेव द्रष्टव्यम्। इति यदुक्तं तदन्यप्रायश्चित्तानुपलब्धौ द्रष्टव्यः। २
हीनवर्णगमने स्त्रियाः पातित्यमुक्तम्। तस्याः सामान्येन पतितप्रायश्चित्तं प्राप्तमत उच्यते।

॥ श्वभिः खादयेद्राजा निहीन-
वर्णगमने स्त्रियं प्रकाशम् ॥

निहीनवर्णो व्याख्यातः। भ्रूणहानि हीनवर्णस्तत्र तद्गमने तां श्वभिः खादयेद्राजा प्रकाशं लोकसमक्षं, तथाच मनुः—
भर्तारं लङ्घयेद्या तु ज्ञातिस्त्रीगुणदर्पिता।
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते॥
७५। इति। अबुद्धिपूर्वे अयं राजदण्डः। बुद्धिपूर्वे तु वसिष्ठोक्तं द्रष्टव्यम्। शूद्रश्चेत् ब्राह्मणीमुपगच्छेत् वीरणैर्वेष्टयित्वा

शूद्रमग्नौ प्रास्येत् । ब्राह्मण्याः शिरसि
वपनं कारयित्वा सर्पिषाभ्यज्य
नग्नां कृष्णखरमारोप्य महापथमनुसं-
व्राजयेत्पूता भवतीति विज्ञायते ।
वैश्यश्चेद्ब्राह्मणीमुपगच्छेत् लोहितदर्भै-
र्वेष्टयित्वा वैश्यमग्नौ प्रास्येत् । ब्राह्म-
ण्याः शिरसि वपनं कारयित्वा सर्पि-
षाभ्यज्य नग्नां गौरखरमारोप्य म-
हापथमनुसंव्राजयेत् । पूता भवतीति
विज्ञायते ।
राजन्यश्चेत् ब्राह्मणीमुपगच्छेच्छर-
पत्रैर्वेष्टयित्वा राजन्यमग्नौ प्रास्येत् ।
ब्राह्मण्याः शिरसि वपनं कारयित्वा
152 सर्पिषाऽभ्यज्य नग्नां रक्तखरमारो-
प्य महापथमनुसंव्राजयेत्पूता भ-
वतीति विज्ञायते । एवं वैश्यो राजन्यायां

(नि)
शूद्रस्य राजन्यवैश्ययोरिति न हीन-
वर्णगमन इत्युक्तत्वात् क्षत्रियवैश्याभ्यां
बुद्धिपूर्वगमने ब्राह्मण्याः कल्प्यम्।
यथाह मनुः —
जघन्यं सेवमानां तु संयतां वासयेद्गृहे।
उत्तमां सेवमानस्तु जघन्यो वधमर्हति॥
इति। अयमेव क्षत्रियायाः वैश्यगमनेऽ
पि दण्ड्यम्। सामान्येनोक्तत्वात्।
एवं च निहीनवर्ण इत्ययमपि दण्डो
द्विजातिस्त्रीणां सामान्यं सामान्येनो-
क्तत्वात्। एवमनुलोमसंपर्के तु व्या-
घ्र आह —
253 वर्णानामनुलोमानां परस्परसमागमे।
व्युत्क्रमेण ततो राजा स्वादयेद्वा न-
रैः क्रियम्॥ इति।
(१) सृगालैर्बुद्धिपूर्वं चेत्पुरुषो वधमर्हति॥ इति॥

अथैषामनुलोमानां स्वजातिव्युत्क्र-
मेऽप्यपीति प्रतिलोमसमागमे बुद्धिपू-
र्वे च मनुनोक्तं द्रष्टव्यम्। —
प्रतिलोमे वधः पुंसां स्त्रीणां नासादिकृन्तनम्॥
इति। ननु च —
एवमेव विधिं कुर्याद्योषित्सु पतितास्वपि।
यः पुंसः परदारेषु तच्चैनां चारयेद्व्रतम्।
इति चासिद्धेरयं दण्डविधिरनर्थ-
क इति॥ —— अत्रोच्यते।
या स्वयमेव राजानं गच्छति तस्याः
दण्ड एव। या तु बलाद्गमीयते तस्याः
दण्डश्च प्रायश्चित्तं च। या तु स्वयमपि
गच्छति, न बलाद्ध्यानीयते तस्याः
7.54 प्रायश्चित्तमेव इत्ययमेव न्यायः सर्वत्र
दण्डप्रायश्चित्तयोर्द्रष्टव्यः।
अतः प्रतिलोमानां स्वजातिव्युत्क्रमे

प्रतिलोमास्तु धर्महीन इति प्रायश्चित्त-
स्याभावात्तेषां संकरदोषपरिहारा-
र्थं दण्डः कल्प्यः। एवं च —
प्रतिलोमे वधः पुंसां स्त्रीणां नासादिकर्तनम्।
इति तेषामपि दण्ड्यम्। तथा पात-
कोपपातकविषयेऽपि दण्ड्यम्। ब्राह्म-
ण्यामनन्तरजस्यानुलोमस्य यो दण्डः
उक्तस्तस्यार्धो दण्ड्यः। तथैकान्तर-
द्व्यन्तरयोश्च, कुतः। —
चण्डालस्य समीपे तु नाद्ययेतव्यं कदाचन।
तथा पारशवस्यापि चण्डालार्धोऽपि सस्मृतः।
इति व्याघ्रधर्मलिङ्गात्॥

॥ पुमांसं घातयेत्॥

755 प्रकाशमित्यनुवर्तते। घातनप्रकाशश्च
वासिष्ठोक्त उदाहृतः। आविशेषात् बु-
द्धिपूर्वेऽबुद्धिपूर्वे, सकृद्गमनेऽभ्यासे

विशेषवचनान्तराभावाच्च सर्वत्र हननमेव। एवं वर्णानामनुलोमानां प्रतिलोमानां च स्वर्गव्युत्क्रमे परस्परव्युत्क्रमे हननमेव द्रष्टव्यम्। तथाच स्मृत्यन्तरवाक्यानि चोदाहृतानि। एवं च स्त्रीयामपि सकृत्करणेऽभ्यासे च पूर्वोक्त एव दण्डः इति द्रष्टव्यम्॥

॥ गार्दभेनावकीर्णी निर्ऋतिं चतुष्पथे यजेत॥

अवकीर्णी विप्लुतब्रह्मचर्यो ब्रह्मचारी। यथाह जातूकर्ण्यः —

756 खण्डितं व्रतिना रेतो येन स्याद्ब्रह्मचारिणा।
कामतोऽकामतः प्राहुरवकीर्णी तु तं बुधाः॥

इति। यत्र त्वन्यत्प्रायश्चित्तं नास्ति पुत्रिकाकरणादौ तस्येदं प्रायश्चित्तं

द्रष्टव्यम्। एवं चात्र कन्यागमनादिप्राय-
श्चित्तेन सह प्रायश्चित्तद्वयसिद्धिः। ग-
र्दभेन स्वरेण काणगुणेन स अवकी-
र्णी र्णिनिर्ऋति दैवतश्चतुष्पथे अरण्य एव
न सर्वत्र लौकिकेऽग्नौ यथाह वसिष्ठः —
ब्रह्मचारी चेत्स्त्रियमुपेयादरण्यचतु-
ष्पथे लौकिकेऽग्नौ रक्षोदैवतं गर्दभं
पशुमालभेत नैर्ऋतं वा चरुं निर्वपेदि-
ति। तत्र श्रोत्रियस्य गर्दभः श्रोत्रिय-
स्य चरुरिति द्रष्टव्यम्। स्थालीपाक-
757 विधानाय यजेत जुहुयात् रात्रावेव न
दिवा। यथाह मनुः —
अवकीर्णी तु काणेन गर्दभेन चतुष्पथे।
स्थालीपाकविधानेन यजेत निर्ऋतिं निशि॥
इति। अत्रायं होमविधिर्वेदितव्यः।
अप्रधानात् स्थालीपाकविधाने होमं

कृत्वा वसिष्ठोक्तैर्मन्त्रैः पशुमांसैः
होतव्यम्। तत्र जुहुयादिति सूक्तत्वा-
त् तत्राहुतयः कामाय स्वाहा का-
माय स्वाहा, निर्ऋत्यै स्वाहा, रक्षोदे-
वताभ्यः स्वाहेति च। सा वपा होम-
त्वादत्र स्विष्टकृन्नास्ति। स्विष्टकृद-
न्तोऽन्यत्र वपाहोमाज्यहोमाभ्यां
इति जैमिनिग्रन्थे प्रतिपादितत्वात्।
एवं हविषा हुत्वा पुनस्सर्पिषा वारुणी-
754 हीनां संमासिश्चाविश्येनेन मन्त्रेण
तदन्ते होतव्यम्। यथाह मनुः —
हुत्वाग्नौ विधिवद्धोममन्ततश्च समित्यृचा।
वारुणीन्द्रगुरुवह्नीनां जुहुयात्सर्पिषाहुतीः॥
इति। एवं हुत्वा पुनरपि स्थालीपाक-
विधानेनैव होमशेषं नयेत् इति अ-
भ्यासविशेषाद्धोमवृत्तिर्द्रष्टव्या।

यथाह कण्वः —

प्रथमे दिवसे रात्रावकीर्णी गर्दभेन तु।

यजेदेवं यथाभ्यासोऽब्दे नैकेन शुध्यति ॥

इति। एवं चाभ्यासे होमावृत्तिरेव न

कालावृत्तिरिति।

॥ तस्याजिनमूर्ध्वबालं परिधाय (बा)।

लोहितपात्रः सप्त गृहान्

भैक्षं चरेत्कर्माचक्षाणः ॥

तस्य गर्दभस्य। अजिनं चर्म। अ-

751 धिकारेणैव सिद्धे तस्य ग्रहणं येन

गर्दभेन यागस्तस्यैव चर्मणा ना-

न्यस्येति नियमार्थः। तदपि साङ्गमू-

र्ध्वबालमिति ज्ञापकात् ऊर्ध्वबालं

बहिर्लोम। तदुपरि वासित्वा। लोहि-

तपात्रं रक्तवर्णं पात्रं वा प्रतिदिनं

सप्तैव गृहान्। भैक्षं चरेत्। कर्माच-

क्षाण: अवकीर्णिने भिक्षां देहीति
एवमवकीर्णोऽस्मीति वा कीर्तयन्।
एवं च भैक्षचरणकालमेव चर्मणः प-
रिधानं न होमकालमपि। तथा च म-
नुरपि— होममूर्ध्वमेव वक्ष्यति। तस्मि-
न्नेनसि प्राप्ते वसित्वा गर्दभाजिनम्।
78- सप्तागारं चरेद्भैक्षं स्वकर्म परिकीर्तयन्॥
इति। भोजनमप्येककालमेव॥
यथाह मनुः—
तेभ्यो लब्धेन भैक्षेण वर्तयन्नेककालिकम्।
उपस्पृशंस्त्रिषवणं अब्देनैकेन शुध्यति॥
इति॥ ॥ संवत्सरेण शुध्येत्॥
एवमाचरन् संवत्सरेण पूतो भवति।
अविशेषाद्द्विजातीनामिदं द्रष्टव्यम्।
तथा मनुनापि द्विजग्रहणमेव कृत-
म्। —

कामतो रेतसस्सेकं व्रतस्थस्य द्विजन्मनः।
अतिक्रमं व्रतस्याहुः धर्मज्ञा ब्रह्मवादिनः॥
इति। एवं च ब्राह्मणस्यार्धं क्षत्रिय-
स्य इत्ययं न्यायोऽत्र नास्ति। तथा
शाण्डिल्योऽपि —
अवकीर्णि द्विजो राजा वैश्यश्चापि स्वरेण तु।
76। इष्ट्या भैक्षाशिनो नित्यं शुध्यन्त्यब्दात्समाहितः॥
इति। अत्र स्त्रियमन्तरेण प्रयत्नोत्सर्गेऽ-
पि होममात्रं द्रष्टव्यम्। यथाह वसिष्ठः —
एतदेव रेतसः प्रयत्नोत्सर्गेऽपि इति।
तथा पुरुषमैथुनेऽपि। यथाह काश्यपः —
पुंसि मैथुनमासेव्य यत्नोत्सर्गे कृते तथा।
ब्रह्मचारी यथाभ्यासं स्नात्वाथ हविषा यजेत्॥
इति। वानप्रस्थादीनां चायमेव कृच्छ्रा-
धिको द्रष्टव्यः। यथाह वसिष्ठः —
वानप्रस्थो दीक्षाभेदे कृच्छ्रं द्वादश-

रात्रं चरित्वा महाकृच्छ्रं वर्धयेत् । अभि-
क्षुर्वानप्रस्थवत् सोमवृद्धिवर्जमिति
द्वादशरात्रग्रहणं पराकत्रयोपसंग्र-
हार्थम् । यथाह शाण्डिल्यः । —

762 वानप्रस्थो यतिश्चैव स्खलने सति कामतः ।
पराकत्रयसंयुक्तं अवकीर्णिव्रतं चरेत् ॥

इति । चरितप्रायश्चित्तयोरपि संस-
र्गो न कर्तव्यः । यथाह कौशिकः —

नैष्ठिकानां वनस्थानां यतीनां चावकीर्णिनाम् ।
शुद्धानामपि लोकेऽस्मिन् प्रत्यापत्तिर्न विद्यते ॥

इति । यतीनां वनस्थानां च प्रयत्नो-
त्सर्गे कण्वोक्तं द्रष्टव्यम् । —

२. यत्नोत्सर्गं गृहीत्वा वारुणीभिरुपस्पृशेत् ।
वानप्रस्थो यतिश्चैव चरेच्चान्द्रायणं व्रतम् ॥
गृह्यमस्य गिराचामेत् भूर्भुवस्वरिति त्रिभिः ।
यतिर्वनस्थश्च जपेत् प्राणायामांस्तु षोडश ॥

इदमपि स्वप्नादन्यत्र । स्वप्ने च का-
श्यप आह—

सूर्यस्य त्रिर्नमस्कारं स्वप्ने सिक्त्वा गृही चरेत् ।
763 यतिश्चैव वनस्थश्च त्रिः कुर्यादघमर्षणम् ॥

इति । गृहस्थस्य पुरुषमैथुने मनुनोक्तं
द्रष्टव्यं —

मैथुनं तु समासेव्य पुंसि योषिति वा द्विजः ।
गोषु चाप्सु दिवा चैव सवासा स्नानमाचरेत् ॥

इति । एवं च जातिभ्रंशकर प्रायश्चित्त-
मस्मादन्यत्र द्रष्टव्यम् । योषिति स्व-
भार्यायामेवर्तौ गमने । तथा चाङ्गिराः —

ऋतौ तु गर्भशङ्कित्वात् स्नानं मैथुनिनः स्मृतम् ।
अनृतौ तु यथा गच्छेच्छौचं मूत्रपुरीषवत् ॥

इति । दिवा मैथुने वारुणीभिश्चाप-
मार्जनं द्रष्टव्यम् । यथाह वृद्धवासि-
ष्ठः ——— अष्टम्यां च चतुर्दश्यां

कृत्वा पर्वणि मैथुनम् । सचेलस्स्ना-
त्वा द्विवा चैव वारुणीभिश्च मार्जयेत् ॥
शावाशौचे तथा श्राद्धे चरेच्चान्द्रायणव्रतम् ।
संक्रान्त्यामुपरागे च तप्तकृच्छ्रं समाचरेत् ॥
इति । पुरुषमैथुने वानप्रस्थपरिव्रा-
जकयोः कण्वोक्तं द्रष्टव्यं —
पुंसि मैथुनमासेव्य वानप्रस्थो यतिस्तथा ।
कृच्छ्रं चान्द्रायणं चैव कृत्वा शुध्येत्स
किल्बिषात् ॥ इति ॥
अलमतिप्रसङ्गेन । प्रस्तुतमारभ्यते ॥
॥ रेतः स्कन्दनेऽभयेऽरोगेऽस्वप्नेऽ-
ग्नीन्धनेभैक्षचरणानि सप्तरात्र-
मकृत्वाज्यहोमस्समिद्धो वा
रेतस्याभ्याम् ॥
अबुद्धिपूर्वविषयमिदं, बुद्धिपूर्वे
पूर्वमुक्तत्वाद्रेतस्कन्दने रेतसः क्षरणे

765. सति अभये अरोगे अस्वप्ने अग्नीन्धन-
भैक्षचरणानि चानातुरस्सप्तरात्रमकृत्वा।
तथा च मनुः — अकृत्वा भैक्षचरणमिसा-
दि। आज्यहोमस्समिधो वा होमः रेतस्या-
भ्यां च वानप्रस्थपरिव्राजकयोश्च य-
दुक्तं स्वप्ने रेतस्सेके तदेव भयरोगेऽ-
पीति द्रष्टव्यम्।
नैष्ठिकस्य तु यदुक्तं ब्रह्मचारिणस्तदेव
द्विगुणं द्रष्टव्यम्। यथाह हारीतः —
उपकुर्वाणस्तु यत्कुर्यात्कामतोऽकामतोऽपि वा।
तदेव द्विगुणं कुर्यात् ब्रह्मचारी च नैष्ठिकः॥
इति॥ अन्ये तु व्याचक्षते॥
रेतस्कन्दनेऽस्वप्नेऽभयरोगौ वर्जयि-
त्वा इति। तेषां मनुप्रोक्तेन तुल्यविक-
766 ल्पो द्रष्टव्यः। स्वप्नादन्यत्रापि प्राय-
श्चित्तं मृग्यम्॥

॥ सूर्याभ्युदितो ब्रह्मचारी ति-
ष्ठेदहरभुञ्जानोऽभ्यस्तमितश्च
रात्रिं जपन् सावित्रीम् ॥

सूर्याभ्युदितो यस्य शयानस्य सूर्य उ-
दितः इत्यर्थः। ब्रह्मचारिग्रहणमधिका-
रलब्धमपि क्रियते। गृहस्थादेरन्य-
त्प्रायश्चित्तमिति तेषामप्युत्तरेषां चै-
तदृष्टिविरोधीति प्राग्धर्माभ्युदिते।
गृहस्थस्य तावद्दीपस्तम्बोक्तमेकीय-
मतं द्रष्टव्यम्। आतमितोः प्राणानाय-
च्छेदिति। एक इति। यतिवनस्थयो-
र्ब्रह्मकूर्चसहित उपवासः। यथाह वृ-
द्धवासिष्ठः —

वनस्थश्च यतिश्चैव सूर्येणाभ्युदितो यदि।
767 ब्रह्मकूर्चाशिनौ भूत्वा जपेतां प्रणवं बहु: ॥

इति। ब्रह्मकूर्चविधानमपि स्मृत्यन्तरा-

द्रष्टव्यम्। यथाह प्रजापतिः —

पालाशं पद्मपत्रं वा ताम्रं वाथ हिरण्मयम्।
गृहीत्वा साधयित्वा च ततः कर्मारभेत् शुचिः॥
गायत्र्या गृह्य गोमूत्रं गन्धद्वारेति गोमयम्।
आप्यायस्वेति वै क्षीरं दधिक्राव्णेति वै दधि॥
तेजोसि शुक्रमित्याज्यं देवस्यत्वा कुशोदकम्।
चतुर्दशीमुपोष्याथ पौर्णमास्यां समाचरेत्॥
गोमयाद्द्विगुणं क्षीरं (मूत्रं) सर्पिर्दद्याच्चतुर्गुणम्।
क्षीरमष्टगुणं देयं दधि पञ्चगुणं तथा॥
स्थापयित्वाथ दर्भेषु पालाशैः पत्रकैरथ।
768 तत्समुद्धृत्य होतव्यं देवताभ्यो यथाक्रमम्॥
अग्नये चैव सोमाय सावित्र्या च तथैव च।
प्रणवेन तथा हुत्वा स्विष्टकृच्च तथैव च।
एवं हुत्वा ततः शेषं पापं ध्यात्वा समाहितः॥
आलोड्य प्रणवेनैव निर्मथ्य प्रणवेन तु।
उद्धृत्य प्रणवेनैव पिबेच्च प्रणवेन तु॥

एवं ब्रह्मकृतं कूर्चं मासि मासि चरन् द्विजः।
सर्वपापविशुद्धात्मा स्वर्गलोकं स गच्छति॥
यत्त्वगस्थिगतं पापं देहे तिष्ठति देहिनाम्।
ब्रह्मकूर्चो दहेत्सर्वं प्रदीप्तोऽग्निरिवेन्धनम्॥

इति। तिष्ठेदहरभुञ्जानः निराहारो हि
तिष्ठेद्रात्रौ तु भोक्तव्यम्। एवमभ्यस्त-
मितस्सन्ध्यामनुपासितो रविरस्तमेति।
असावपि रात्रौ नाश्नीत। अस्यासनं द्र-
७८१ ष्टव्यम्। तिष्ठेदहनि रात्रावासीतेति
लिङ्गादुभयत्र जपन् सावित्रीं तथा च मनुः—

तं चेदभ्युदियात्सूर्यः शयानं कामकारतः।
निम्लोचेद्वाप्यविज्ञानाज्जपन्नुपवसेद्दिनम्॥

इति।— बुद्धिपूर्वं चेदमेव मानवे का-
मकारतः॥
निम्लोचेद्वाप्यविज्ञानादिति च लिङ्गा-
त् अत्र सचेलस्नानं द्रष्टव्यम्।

सूर्याभ्युदितनिर्मुक्तस्सचेलस्नातस्सा-
वित्रीं सवनानुगां जपेत् । इति शङ्खवच-
नात् । अत्राव्यभये ऽरोगे इति चानुव-
र्तते । तत्रादोषख्यापनार्थम् । तथा जा-
बालिः — अभयारोगस्य स्सूर्याभ्युदितः
प्रायश्चित्तीयो भवतीति । अत्र ब्राह्मणस्य-
र्थं क्षत्रियस्यैतद्रष्टव्यम् ॥

170 ॥ अशुचिं दृष्ट्वादित्यमीक्षेत प्राणा-
याम कृत्वा ॥

अशुचिः चण्डालादिः तं दृष्ट्वैकं प्राणा-
यामं कृत्वा सूर्यमीक्षेत । प्रकरणात् ब्रह्म-
चारिणो नियमकाल इदम् । नैष्ठिकादी-
नां मनुनोक्तं द्रष्टव्यं —
आचम्य प्रयतो नित्यं जपेदशुचिदर्शने ।
सौरान्मन्त्रान्यथोत्साहं पावमानीश्च शक्तितः ॥
इति । गृहस्थस्य प्रणवं द्रष्टव्यम् ।

अशुचिदर्शने द्विजः प्रणवं जपेदिति
जाबालिगृह्यवचनात् सर्वेषां नियम-
कालादन्यत्रादित्यदर्शनमागमेव। अ-
शुचिदर्शन आदित्यदर्शनं ब्राह्मणद-
र्शनं गवामग्नेर्वा यौशानसवचनात्।
जाबालगृह्ये द्विजग्रहणाच्च द्विजाती-
77। नां सामान्यमिदं शूद्रस्य नाविधे-
र्न प्रतिषेधः॥
॥ अभोज्यभोजने निष्पुरीषीभावः॥
अभोज्यानां लशुनादीनां भोजने छर्दनेन
विरेचनेन वा निष्पुरीषीभावः कर्त-
व्यः। तथा च मनुः —
अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता।
अज्ञानाद्भुक्तमुद्धार्यं शोध्यं वाप्याशु शोधनैः॥
इति। जीर्णत्वात् कालातिक्रमे छर्दनावि-
रेचनासंभवे स्मृत्यन्तरोक्तं द्रष्टव्यम्।

यथाह प्रजापतिः —

अभोज्यभोजनं कृत्वा दद्याद्विप्राय गोद्वयम् ।
आर्द्रवासा दिनं तिष्ठेच्च द्वा दद्याद्वा द्विकम् ॥

इति । परिग्रहदुष्टभोजन इदं, विप्राय त-
द्वयं दद्यात् । यावदभ्यस्तं तदसंभवे गवां
772 द्विकं वा दद्यात् । तस्याप्यसंभवे हविष्यं
सकृद्भुक्त्वा अहोरात्रं जलार्द्रवासास्ति-
ष्ठेद्यावन्ति दिनान्यभ्यस्तानि तावन्त्य-
होरात्राणीति । तत्र क्रमः कालाश्रय-
स्वभावदुष्टानां व्याघ्रोक्तं द्रष्टव्यं —

अभोज्यभोजनं कृत्वा नक्तभोजनमाचरेत् ।
अक्षारलवणं वापि भुञ्जीयाच्च दिने दिने ॥
कपिलायास्तु मुग्धाया धारोष्णं वा पयः पिबेत् ।
एष व्यासकृतः कृच्छ्रः श्वपाकमपि शोधयेत् ॥

इति । तत्रापि कालदुष्टभोजने नक्तभोजनं
आश्रयदुष्टभोजने क्षारलवणान्नभोजनम् ।

स्वभावदुष्टभोजने कपिलाक्षीर

विशेषः। यावद्दिनानि भु-

क्तानि तावद्दिनानीत्यर्थः। अत्रापि सकृ-

द्भोजने पूर्वश्लोकोक्तानां व्ययदानादीनां

तावन्मात्रस्यैव दानं कर्तव्यमिति।

द्वयासता दिन-

मात्रमेवेति। नक्तभोजनश्लोकेऽपि सकृ-

द्भोजने संपूर्णाहारता, द्विभोजने अहार-

तेति। क्षत्रियवैश्ययोस्त्व भक्ष्य भक्षणे

ऽर्धस्यार्धस्य च प्रवेश उक्तो न्यायः। एवं

च सति व्ययदानश्लोकोक्तानामर्धमर्धं

113 परिकल्प्यम्। नक्तभोजनश्लोके रसद्रव्य-

रहितं ब्राह्मणस्य, किञ्चिद्रसद्रव्यसहितं

क्षत्रियस्य, तद्बहुलं वैश्यस्येति द्रष्टव्य-

म्। क्षीरपानश्लोकेऽपि क्षत्रियस्य द्विःपा-

नं, वैश्यस्य त्रिःपानमिति। एवं चतुर्वि-

धस्याभक्ष्यज्ञानभोजने छर्दनविरेचन-
व्ययदानानि कृत्वा वक्ष्यमाणं त्रिरात्रा-
वरमभोजनमित्यादि प्रायश्चित्तं द्रष्ट-
व्यम्। बुद्धिपूर्वे व्ययदानाद्येव कृत्वा
प्रायश्चित्तं कर्तव्यम्। व्ययदानश्लोके
विशेषाभावात्। छर्दनविषये अज्ञानज-
ग्धमित्युक्तत्वात् चेति अधुना प्रायश्चि-
त्तमाह —

॥ त्रिरात्रावरमभोजनम् ॥

775 प्राक् पंचनखेभ्य इत्यनेनाश्रयपरिग्र-
हकालदुष्टानां वक्ष्यमाणत्वात् स्वभाव-
दुष्टानामिदं वेदितव्यम्। तत्र लशुना-
दीनां पशूनां च सप्तरात्रं वा स्वयं
शीर्णानीति द्वाभ्यां सूत्राभ्यां वक्ष्यमा-
णत्वात् तेभ्योऽन्येषामिदमिति चाव-
गन्तव्यम्। तत्रापि बुद्धिपूर्वे सकृद्भो-

जन इदम्। अबुद्धिपूर्वे सकृद्भोजने
मनुनोक्तं द्रष्टव्यं - शेषेषूपवसेदहइति।
अपि बकादीनां पक्षिणां बुद्धिपूर्वे सकृ-
द्भोजने स्मृत्यन्तरोक्तं द्रष्टव्यम्। य-
थाह शङ्खः - बकबलाकहंसप्लवचक्र-
वाकखञ्जरीटककारण्डवकटभारचटक-
गृहकपोतशुकसारसटिट्टिभोलूकरक्त-
पादजालपादचाषभासमद्गुटिट्टिभ-
775 शिंशुमारनक्रमकरतिमिङ्गिलवन्मी-
कलविङ्कमांसभक्षणे द्वादशरात्रमना-
हारः पिबेद्वा गोमूत्रं यावकमिति।
अबुद्धिपूर्वे उशना आह—
बलाकप्लवहंसबककटकारण्डवचक्र-
वाकखञ्जरीटगृहकपोतकहारीचटक-
रक्तपादोलूकशुकसारसटिट्टिभचाष-
भासजालपादनक्रकुलिकाविकृतमत्स्य-

क्रव्यादामेध्यादीनां भक्षणे पञ्चगव्यं पि-
बेत्त्रिरात्रमिति। अपरग्रहणात्सर्वार्थम्।
अतश्चतुरात्रं वेति सामर्थ्यापेक्षया द्रष्टव्यम्॥

॥ सप्त रात्रं वा ॥

लशुनादिविषयमिदम्। यथाह मनुः—
776 छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम्।
पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेद्द्विजः॥
अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सान्तपनं चरेत्।
इति। एवं च सान्तपनेन विकल्पो द्रष्ट-
व्यः। अबुद्धिपूर्वे सान्तपनं सप्तरात्रोपवा-
सो वेति॥

॥ स्वयं शीर्णान्युपयुञ्जानः फला-
न्यनतिक्रामन्॥

वात्र कोऽधिक्रियते। शुध्येदिति अ-
ध्याहारः। फलानि स्वयं शीर्णानि का-
कादिभिः पातितानि। स्थावरहिंसात्र-

निषेधार्थं वा स्वयं शीर्णग्रहणम् । ता-
न्युपयुञ्जानः अनतिक्रमात् गुणदोषपरी-
क्षामकुर्वन्नित्यभिप्रायः । क्षुत्प्रमाणमिदम् ।
इयमवस्था यावता कालेन संपद्यते तावता
??? शुध्येदित्यर्थः । अभक्ष्याणामेकशा-
फादीनां पशूनां भक्षणे अबुद्धिपूर्वं इदं
मनुनोक्तं चान्द्रायणं वा द्रष्टव्यम् । —
जग्ध्वा तु शुष्कमांसानि भौमानि कवकानि च ।
अज्ञातं चैव सूनास्थमेतदेव व्रतं चरेत् ॥
इति । अबुद्धिपूर्वं तप्तकृच्छ्रसहितं चा-
न्द्रायणं द्रष्टव्यम् । यथाह शाण्डिल्यः —
अभक्ष्याणां भक्षणे विप्रः पशूनां बुद्धि-
पूर्वकृतं तप्तकृच्छ्रेण सहितं चरेच्चान्द्रा-
यणव्रतमिति ॥

॥ प्राक् पञ्चनखेभ्य छर्दनं
घृतप्राशनं च ॥

नखेभ्यः पूर्वं यदिदमभोज्यमुक्तं, तद्-
भ्यवहारे छर्दनं घृतप्राशनं च
प्रायश्चित्तं न पूर्ववत् प्रायश्चित्तान्तर-
मपि । निष्पुरीषीभाव इत्यनेनैव
११४ सिद्धे आरम्भसामर्थ्याच्छक्त्यात् कश्चि-
दुपवासश्च । असमासो दोषापेक्षया व्य-
स्तसमस्तक्रियार्थः । तत्र प्रागभिहिता-
दिभ्यो घृतप्राशनमात्रं, घृतप्राशने
चान्याहारप्रतिषेधः । तत्प्राशनं च
यावता कायाप्लवनमात्रं भवति प्रागप-
ङ्क्त्यादिभ्यश्छर्दनं घृतप्राशने प्रागगो-
क्षीरादेरेकरात्रोपवासः । प्राक्पञ्चनखे-
भ्यश्छर्दनमात्रमित्येवं कल्पना । पञ्चन-
खानां तूक्तं श्वापदोष्ट्रखराणां चाङ्गस्येति
दोषाणां स्वभावदुष्टत्वात् । उक्तं गिरात्राव-
रमभोजनमित्यादि अबुद्धिपूर्वे सकृद्भोज-

न इदम्। बुद्धिपूर्वे तु मनुनोक्तं तप्तकृ-
च्छ्रं द्रष्टव्यम्॥—

७७९ भुक्त्वातोऽन्यतमस्यान्नममत्या त्र्यहं क्षपेत्।
मत्या भुक्त्वा चरेत् कृच्छ्रं रेतो विण्मूत्रमेव च॥

इति। अत्राबुद्धिपूर्वे छर्दनासंभवे त्र्यहोप-
वासो द्रष्टव्यः। एषामुक्तानां चतुर्विधाना-
मबुद्धिपूर्वेऽभ्यासे पलाण्डुलशुनादिवर्जि-
तानां प्रतिलोमपातकसूतकग्रामान्नवर्जि-
तानां च मनुनोक्तं द्रष्टव्यम्। यथाह—

अभोज्यानां तु भुक्त्वान्नं स्त्रीशूद्रोच्छिष्टमेव च।
जग्ध्वा मांसमभक्ष्यं च सप्तरात्रं यवान् पिबेत्॥

इति। आङ्गिरसोक्तं वा—

अभक्ष्याणामपेयानामलेह्यानां च भोजने।
रेतोमूत्रपुरीषाणां प्रायश्चित्तं तथा भवेत्॥
पद्मोदुम्बरबिल्वानां कुशाश्वत्थपलाशयोः।
७८० एतेषामुदकं पीत्वा सप्तरात्रेण शुध्यति॥

इति। अत्राकस्य कृच्छ्रो द्रष्टव्यः। यथाह वसिष्ठः — श्वकाककावलीढशूद्रोच्छिष्टभोजनेष्वतिकृच्छ्रः। कृच्छ्र इतरेष्विति लशुनादीनामभ्यासे मनुनोक्तं यतिचान्द्रायणं द्रष्टव्यं —

यतिचान्द्रायणं वापि शेषेषूपवसेदहः। इति।

पशूनामभ्यासे चान्द्रायणत्रयं द्रष्टव्यम्। यथाह प्रजापतिः —

चान्द्रायणत्रयं कुर्यादभक्ष्यपशुभक्षणे।
घृतमेव सकृद्भुक्त्वा चरेदाह प्रजापतिः॥

इति। पतितो द्विप्रकारः। पतितो, महापतित इति। महापतितो महापातकी। यथाह मनुः —

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
78। महान्ति पातकान्याहुः संयोगं चैव तैः सह॥

इति। पतित एभ्योऽन्यः। यस्य द्विजाते-

कर्महानित्वं तत्र पतितोऽभोज्यमध्ये परि-
गणितः। अस्पृश्यत्वादेव इतरस्य सिद्ध-
त्वात्। एवं च पतितोऽस्पृश्यो भवति।
यथाहोशना — पतितोपपातकाभो-
ज्यावेवो, महापातकोऽस्पृश्यश्चेति।
एवं च महापातकिनो भोज्यमध्ये परि-
गणितत्वात् प्रायश्चित्तान्तरं द्रष्टव्यम्।
तत्र प्रतिलोममहापातकिनोरकामतस्स-
कृद्भोजनेति कृच्छ्रो द्रष्टव्यः। यथाह
हारीतः —
यदन्नं प्रतिलोमस्य शूद्रजस्योत्तमास्त्रियाम्।
महापातकिनश्चैव यदन्नं स्त्रीकृतघ्नयोः॥
आरूढपतितस्यैव सगोत्रा भर्तुरेव च।
142 पाषण्डानाश्रितानां च यतेश्चैव तथैव च॥
अतिकृच्छ्रं चरेद्भुक्त्वा प्रमादाद्ब्राह्मणस्सकृत्।
मत्या चान्द्रायणं कुर्यादामं चेद्दर्धमेव च॥

तद्धस्तभोजने चापि त्रिगुणं सह भोजने।
चतुर्गुणं तदुच्छिष्टे पानीयेऽर्धार्धमेव च॥
इति। एवं चामं चेदर्धमेव चेत्यादि सर्वत्र
द्रष्टव्यम्। अमहाभ्यासे तत्रैव श्रूयते —
कृच्छ्राब्दपादमुच्छिष्टमभ्यासेऽज्ञानभोजने।
महाभ्यासे तथा कुर्यात् त्रिंशत्कृच्छ्रं द्विजोत्तमः॥
इति। तत्र चण्डालादीनां महाभ्यासे तत्सा-
म्यमेव द्रष्टव्यम्। यथाह मनुः — 'चण्डा-
लान्त्यस्त्रियो गत्वेत्यादि। महापातकविषयेऽ-
783 प्यापस्तम्बोक्तं द्रष्टव्यम्। अधो नाभ्युपरि
जान्वाच्छाद्य त्रिषवणमुदकमुपस्पृशन्न-
क्षारलवणं भुञ्जानः द्वादशवर्षाणि नागारं
प्रविशेत्। अथ सिद्धेरथ संप्रयोगः स्याद्दा-
यैरेतदेवान्येषामपि पतनीयानामिति
प्रतिलोमे आमविषये सर्वप्रायश्चित्तं द्रष्ट-
व्यम्। प्रतिलोमानां शूद्रप्रभवानां अनु-

लोमानां शूद्रायां द्विजादुत्पन्नानां च
शूद्रान्नभोजनवद् दृष्टव्यम्। यथाह
शाण्डिल्यः —
शूद्रस्याशूद्रजस्यैव व्युत्क्रमात्तस्त्रियामपि।
उत्पन्नस्य द्विजातीनां सममन्नमकल्पयन्॥
इति। शूद्रान्नभोजने तु प्रजापतिराह—
ब्राह्मणस्यैव शूद्रान्नमभोज्यं परिकीर्तितम्।
784 सकृद्भुक्त्वा तदज्ञानात् ब्रह्मकूर्चं सकृत्पिबेत्॥
अभ्यासे च तदभ्यस्येत् आममन्नमगर्हितम्।
मत्या त्रिरात्रं कुर्वीत कृच्छ्रमभ्यासतश्चरेत्॥
इति। सूतकशावान्नभोजनेऽपि स्मृत्य-
न्तरोक्तं द्रष्टव्यम्। यथाह गर्गः —
शावे च सूतके चैव मत्या भुक्त्वोपवसेत् (कामेन्दुवं)
मत्याभ्यासे तथा कुर्यात् कृच्छ्रं चान्द्रायणोत्तरम्॥
त्र्यहं च कामतः कुर्यादभ्यासे कृच्छ्रमेव च।
इति। एतदपि ब्राह्मणस्य, ब्राह्मणाशौचेऽपि

तत्रैवोक्तम् ॥ —

द्विगुणं त्रिगुणं चैव चतुर्गुणमथापि वा ।
क्षत्रविट्शूद्रजातीनामाशौचे परिकीर्तितम् ॥

इति । तत्र ब्राह्मणस्य ब्राह्मणाशौचे यत्प्रायश्चित्तमुक्तं तदेव क्षत्रियादीनाम-
785 पि द्रष्टव्यम् । द्विगुणं त्रिगुणक्रमेणाधिकं हीनजातिषु द्रष्टव्यम् । उत्तमजातिषु तत्क्रमेणैव हीनं, तथा तत्राभिहितं —

समानजातौ सर्वेषां विप्रवच्छौचमिष्यते ।
क्रमाद्वृद्धं क्रमाद्धीनं हीनजात्युत्तमेष्वपि ॥

इति । सर्वत्राशौचोत्तरकालमेव प्रायश्चित्तं द्रष्टव्यम् । यद्यन्नमत्ति तेषां यस्स दशाहेन शुध्यतीति लिङ्गात् तत्र च नियोगात् भुक्तस्य वासिष्ठोक्तं द्रष्टव्यं —

आशौचे यस्तु शूद्रस्य सूतकेऽपि च भुक्तवान् ।
कामिभुक्त्वा स देहान्ते तां विष्ठामुपजीवति ॥

अनिर्दशाहे पारशवे नियोगात् भुक्तवान् द्विजः।
स गच्छेन्नरकं घोरं तिर्यग्योन्यां च जायते॥
इति। द्वादशमासान् द्वादशार्धमासा-
786 न् वाऽनश्नन् संहिताध्ययनमधीया-
नः पूतो भवतीति विज्ञायते। तत्रैवं कल्प्य-
म्। शूद्राशौचे भुक्तस्य द्वादशमासं
वैश्यस्य, दशमासं क्षत्रियस्याष्टौ ब्राह्म-
णस्याशौचे द्वादशार्धमासान् इति।
एवं लशुनादीनां पृथगुपलब्धत्वात् त-
द्वर्जितानामेव मनुनोक्तं सप्तरात्रं यवागु-
पानं द्रष्टव्यम्। उपपातकमध्ये पाठोऽपि
तद्वद्संव्यवहारार्थं, न प्रायश्चित्तप्र-
वेशार्थम्। अवकीर्णादिवत् (त्वद्बुध्य-)
शान्युदकप्रवेशनार्थं वा। बुद्धिपूर्वेऽभ्यासे
सुरापानसमप्रायश्चित्तं द्रष्टव्यम्॥—
गर्हितान्नाद्ययोर्जग्धिः सुरापानसमानि षट्॥

इति मनुवचनात्। तदपि चान्द्रायण-
द्वयम्। यथाह गर्गः —

787 अभक्ष्याणामभोज्यानां कामतो भोजने पुनः।
चान्द्रायणद्वयं कुर्यात् सुरापानसमं हि तत्॥
इति। भोजयितुर्द्विगुणं द्रष्टव्यम्। भोज-
यितुर्द्विगुणो दण्ड इति कात्यायनेनोक्त-
त्वात्। अलमतिवाचालतया। प्रस्तुतं व्या-
ख्यास्यामः॥

॥ आक्रोशानृतहिंसासु
त्रिरात्रं परमं तपः॥

आक्रोशोऽन्यत्र पातकोपपातकयुक्तात्
अनृतः अन्यत्र साक्षिप्रतिश्रुत्या दाना-
दौ हिंसायामपि स्थावराणां जङ्गमा-
नामुक्तत्वात् त्रिरात्रं परमं सर्वं बहु-
रात्रमिति यावत्। अत एकरात्रं द्विरात्रं
त्रिरात्रमिति कल्प्यम्। तपो ब्रह्मचर्या-

340 क्षत्रियाक्रोशे द्विरात्रं,

युक्तम्। तत्र ब्राह्मणाक्रोशे त्रिरात्रं, वैश्या-
क्रोशे एकरात्रं, शूद्राक्रोशे ऽहर्मात्रमित्या-
184 क्रोशविषये द्रष्टव्यम्। अनृते च ब्राह्मणा-
द्यर्धक्रमाद् द्रष्टव्यम्। हिंसायां च फलवृ-
क्षे त्रिरात्रं चैत्यवृक्षे द्विरात्रमुपजीव्य
छायावृक्ष एकरात्रमेव माद्रीनामहर्मात्रमि-
ति। इदमपि प्रयोजनमन्तरेण स्वाम्य-
नुज्ञया विनापाकृतस्येति॥

अन्ये व्याचक्षते। आक्रोशो ध्वनि-
मात्रेणाभिशस्तेन केनचित्सम्मुखं सम्मु-
खाभिशस्ते तु वसिष्ठोक्तं द्रष्टव्यम्। ब्राह्म-
णं अनृतेनाभिशस्येत्यादि। तत्र पातक-
ध्वन्यां त्रिरात्रं पातकसमे द्विरात्रमुप-
पातक एकरात्रमिति। हिंसाशब्देन
च हिंसाया कृतव्यवसायी इ उच्यते।
तथा च वसिष्ठः —

जीवन्नात्महत्यागी कृच्छ्रं द्वादशरात्रं चरेत् ।
त्रिरात्रमुपवसेद्वापि स्निग्धेन वाससा ।
१४१ प्राणायामानि संयम्य त्रिः पठेदघमर्षणम् ॥
अपि वै तेन कल्पेन गायत्रीं परिवर्तयेत् ।
अपि वाग्निमुपसमाधाय कूष्माण्डैर्जुहुयात् घृतम् ॥
तत्र ब्राह्मणानां शस्त्रादिना व्रणादि कृत्वा
जीवतां कृच्छ्रं शुद्धिमात्रे त्रिरात्रोपवासः ।
क्षत्रियस्य व्रणादि कृत्वा जीवतः जलार्द्र-
वाससा त्रिरात्रं त्रिरघमर्षणपाठो गायत्री-
जपो वा शुद्धिमात्रे त्रिरात्रं वैश्यस्य व्रणादि
कृत्वा जीवतो जलार्द्रवाससा विना हविष्यं
भुक्त्वा नित्यं त्रिसंध्यः कूष्माण्डहोमं शु-
द्धिमात्रे तपोमात्रमिदम् । शूद्रस्य व्रणादि
कृत्वा जीवतोऽहोरात्रं शुद्धिमात्रेऽहर्मात्र-
मित्येवं कल्पनेति अन्तरश्लोकार्थः ।
एषामपि स एव ॥

अपरे व्याचक्षते। आक्रोशशब्दे-
७१० न दण्डपारुष्यमुच्यते इति। तदयुक्त-
म्। ब्राह्मणस्य तावत् ब्राह्मणदण्डपा-
रुष्य उक्तं प्रायश्चित्तमभिक्रुद्धावगुर-
णमित्यादि तेनैव ब्राह्मणस्यार्धं क्षत्रि-
यस्येत्यनेनैव सर्वेषां कल्पयितुं शक्य-
त्वादिति। अतो वाक्पारुष्य एवेदम्। त-
त्रापि श्रोत्रियस्याश्रोत्रियाक्रोश इदम्।
अश्रोत्रियस्य श्रोत्रियाक्रोशे तु शतं
क्षत्रियो ब्राह्मणाक्रोशे इत्यादि दण्डानुरू-
पं कल्प्यम्। क्षत्रियादीनां स्वजात्याक्रो-
शे दण्डानुरूपं कल्प्यम्। दण्डं तु
मनुनोक्तं —

समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे।
वादेष्ववचनीयेषु तदेव द्विगुणं भवेत्॥

७११ इति। एवं च श्रोत्रियस्यापि प्रायश्चि-

त्तानुरूपो दण्डः परिकल्प्यः। यत्र प्राय-
श्चित्तं विधीयते दण्डो नोक्तः तत्र दण्ड-
परिकल्पना। यत्र तु दण्ड एवोक्तः न प्राय-
श्चित्तं, तत्र प्रायश्चित्तपरिकल्पनाकर्तव्येति।
एवं चावदनीयपादेष्वपि प्रायश्चित्तद्वै-
गुण्यं सिद्धम्। अवचनीयमपि कुष्ठादि-
भिर्बहुभिरज्ञातैराभिशंसनं न पातको-
पपातकविषयम्। तत्र प्रायश्चित्तस्य गु-
रुत्वदर्शनात्। अनृतदोषप्रायश्चित्तमपि
आहिताग्नेरर्थविषय इदम्। अनर्थविषये
पूर्णाहुतिः। तथा च प्रजापतिः —
अनृतोक्तौ सोमपं कुर्यात् त्रिरात्रं परमं तपः।
पूर्णाहुतिं वा जुहुयात् सह ते सघृतेन तु॥
इति। अनाहिताग्नेरर्थविषये वाङ्मनसो-
रपचारे व्याहृतयः पञ्चेति यद्वक्ष्यति
तद्द्रष्टव्यम्। तद्दृहस्यमिति चेत् न प्रा-

यश्चित्तम्। अविशेषादिसुक्तत्वात् रहस्ये
प्रकाशे च भवतीति। अनर्थविषये दक्षिण-
श्रवणस्पर्शनम्। तथाच व्याघ्रः —

792 अनृतोक्तौ ष्ठीवने च दन्तस्पर्शन एव च।
पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेत्॥

इति। साक्षिभावेऽनृतोक्तावाहिताग्नी-
नामन्येषां च पातकसमत्वमेव यदुक्तं
कूटसाक्ष्यमित्यादि प्रतिश्रुतानृतोक्तौ
हारीत आह —

प्रतिश्रुत्यानृतं ब्रूयान्मिथ्या सत्यमथापि वा।
स तप्तकृच्छ्रसहितं चरेच्चान्द्रायणव्रतम्॥

इति। ब्रह्मचारिणो विशेषो द्रष्टव्यः।
यथाह गर्गः —

त्रिरात्रमेकरात्रं वा ब्रह्मचार्यनृते चरेत्।
मधुमांसाशने कृच्छ्रं शवनिर्हरणे तथा॥

इति। तत्रार्थविषये त्रिरात्रमितरत्र एक-

स्त्रं मांसभक्षणस्य। अभक्ष्यमांसभक्षणे
तु तत्पूर्वमिदं कर्तव्यं, अवकीर्णिप्रायश्चि-
793 त्तवत् अबुद्धिपूर्वविषयं चेदं, बुद्धिपूर्वे
तु पुनस्संस्कारश्च। तथाच प्रजापतिः—
मांसं भुक्त्वा ब्रह्मचारी पुनस्संस्कारमाचरेत्।
अभ्यासे त्वैन्दवं चैव नैष्ठिको द्विगुणं चरेत्॥
वनस्थस्त्रिगुणं कुर्याद्यतिः कुर्याच्चतुर्गुणम्।
मांसाघ्राणेऽनृतोक्तौ च शवनिर्हरणे तथा॥
इति। शवनिर्हरणे तु ब्रह्मचारिण उपा-
ध्यायवर्जितानां यथाह मनुः—
आचार्यं समुपाध्यायं पितरं मातरं गुरुम्।
निर्हृत्य तु व्रती प्रेतान्न व्रतेन वियुज्यते॥ इति॥
तत्र स्वशब्दः प्रत्येकमभिसंबध्यत इत्युक्त-
म्। तत्र स्वमाचार्यमेवं सर्वत्र (श्लो) गुरोर्गुरौ
संनिहिते गुरुवद्वृत्तिरिष्यते॥ इतिवन्मा-
794 भूदिति। ततश्च तद्धरणे व्रतवियोगो भव-

होवेति। तत्र कृच्छ्रं कृत्वा पुनस्संस्कार इति द्रष्टव्यम्। आचार्यादौ तु व्रतवियोगाभावात् आशौचस्याभावसिद्धः। 'शावमाशौचं दशारागमनादिविदीक्षितब्रह्मचारिणां' इत्युक्तत्वात् दशाहादर्वाक् पिण्डनिर्वापकाले अशुचिर्भवति। यथाह शाण्डिल्यः —

ब्रह्मचारी यदा कुर्यात् पिण्डनिर्वापणं पितुः।
तावत्कालमशौचं स्यात् ततः स्नात्वा विशुध्यति॥

इति। अस्नात्वा भोजने प्राजापत्योक्तं द्रष्टव्यं —

अस्नात्वैव यदा भुङ्क्ते पिण्डं दत्वा पितुर्व्रती।
स्पृष्ट्वा शावमुदक्यां वा चण्डालं सूतकं तथा॥
अकामतस्त्रिरात्रं स्यात् बुद्ध्वा सान्तपनं चरेत्।

795 इति। गृहस्थानां च सूतिकादिस्पर्शनभोजने स्मृत्यन्तरोक्तं द्रष्टव्यम्। यथाह

व्याघ्रः —

अस्पृश्यस्पर्शनं कृत्वा यदा भुङ्क्ते गृहाश्रमी।
अकामतस्त्रिरात्रं स्यात् षड्रात्रं कामतश्चरेत॥
यतिश्चैव वनस्थश्च कुर्यातां तु तदैव तु॥

इति। यत्र तु ब्रह्मचार्यादीनां विशेषो नास्ति तत्र सर्वेषां समानमेव द्रष्टव्यम्। तथाहोशना —

चण्डालश्वपचैः स्पृष्टो विण्मूत्रोच्छिष्टमेव च।
त्रिरात्रेण विशुद्धिस्स्याद् भुक्तोच्छिष्टः षडाचरेत॥

इति। यथाह व्याघ्रोऽपि —

चण्डालोदकसंस्पृष्टः स्नानमेव समाचरेत।
तेनोच्छिष्टेन संस्पृष्टस्त्रिरात्रेण विशुध्यति॥

यथाह यमोऽपि —

चण्डालोदकभाण्डेषु यः पिबेत्तृषितो जलम्।
तत्क्षणात्क्षिपते यस्तु प्राजापत्यं समाचरेत॥
796 यदि न क्षिपते तोयं शरीरे तस्य जीर्यते।

प्राजापत्यं नद्यातव्यं कृच्छ्रं सान्तपनं चरेत्॥

इति। तथा व्यासोऽपि —

चण्डालभाण्डसंस्पृष्टं पिबेत्किञ्चिदकामतः।
अहोरात्रोषितः स्नात्वा पंचगव्येन शुध्यति॥
तत्र स्नात्वा तथा कुर्यात्कामात्सान्तपनं चरेत्।
तेषां तटाके कूपे च तथैवोक्तं मनीषिभिः॥

इति। व्याघ्र आह —

विण्मूत्रोच्छिष्टकूपस्था आपः प्राश्य द्विजातयः।
त्रिरात्रेणैव शुध्यन्ति कुम्भे सान्तपनं स्मृतम्॥

इति। तथा शातातपः —

मूत्रोच्चारं द्विजः कृत्वा अकृत्वा शौचमात्मनः।
मोहाद्भुक्त्वा त्रिरात्रं स्यात् बुद्ध्वा सान्तपनं चरेत्॥

797 इति। तथा वृद्धवासिष्ठः —

एकपङ्क्तिगतो भुङ्क्ते न स्पृशेदितरं यदि।
भस्मना कृतमर्यादस्तस्य पङ्क्तिर्न दुष्यति॥

इति। तथाच शङ्खोऽपि —

अनुदकमूत्रपुरीषकरणे सचेलस्नानं म-
हाव्याहृतिहोमश्चेति । तथा तत्रैवापर-
मपि । रेतो मूत्रपुरीषाण्युदके कृत्वा
त्रिरात्रोपोषित इदमापः प्रवहतेति ।
तत्रैव दुःस्वप्नारिष्टदर्शने घृतहिरण्यं
दद्यात् इति । एवमन्यान्यपि द्रष्टव्यानि ।
॥ सत्यंवाक्ये वारुणीमानवीभिर्होमः ॥
यदि तु सत्यवाक्येनाकृष्टो भवति, सत्ये-
नाक्रोशति वा एवं च पूर्वमसत्येनेति ग-
म्यते । ततो वारुणीमानवीभिः वरुणदेवता-
778 भिः प्रजापतिदेवताभिश्चाज्येन पूर्वो-
क्तवत्त्रिरात्रहोमः कार्यः । अविशेषात्स-
कृदेव होमः । वारुणीभिस्तिसृभिः मानवी-
भिश्च बहुवचनप्रयोगादेकाभिरेताभिः
समुच्चिताभिश्च । तत्र श्रोत्रियाक्रोशे अ-
श्रोत्रियस्य समुच्चिताभिर्विपरीते विक-

ल्पिताभिरिति द्रष्टव्यम् ।

॥ विवाहमैथुननर्मार्तसंयोगे-
ष्वदोषमेकेऽनृतम् ॥

विवाहकाले कन्यागतेषु वरगतेषु च ल-
क्षणेषु ज्ञातेषु च शोभनकथनेन, दोष
इत्यभिप्रायः। मैथुने गोत्रस्खलनादौ
न दोषः। नर्म परिहासः। आर्तेन दुःखि-
तेन च सह संयोगे यद्दुःखोपशमना-
योच्यते। एतेष्वनिमित्तेष्वनृताभिधा-
799 ने प्रायश्चित्ताभावो दोषाभावादित्येके
मन्यन्ते। गौतमस्त्वेतेष्वपि दोषोऽस्ती-
ति मन्यते। तत्र नियमस्थस्य गौतमा-
भिप्रायो द्रष्टव्यः। इतरस्य एकीयमत-
मिति॥ (सू) न तु खलु गुर्वर्थेषु॥ प्रयोजनेषु
अ विवाहादिषु अनृतं न वदेत्। खल्विति
निपातोऽवधारणार्थः। न कदाचिद्वदे-

कीयमतेनापि। तुशब्दो विशेषणार्थः।
मातुलादिगुर्वर्थेष्वपि नवदेत। विशेष-
त आचार्यार्थे विति। किं कारणमिदं एवम्।
यतः॥ सप्त पुरुषान् नरः परतश्च हन्ति
मनसापि गुरोरनृतं वदन् अल्पेष्वप्य-
र्थेषु ॥
सप्तगामिनः परतवतीतान पित्रादीन
400 हन्ति पीडयति। पापेन योजयति। म-
नसापि गुर्वर्थमनृतं चिन्तयन्नपि, कि-
मुत वदन्निति सर्थः। असारेष्वपि प्रयो-
जनेषु किमुत महत्सु ॥
॥ अन्त्यावसायिनीगमने कृच्छ्राब्दः॥
अन्तावसायिनी व्याख्याता। यश्चान्ता-
वसायिनीभिस्सह संवसेत इत्यगक-
स्यां मैथुन आचरिते सकृद्गमने कृच्छ्रा-
ब्दः संवत्सरं प्राजापत्यविधानवस्थानं

इत्यर्थः ॥

॥ अमत्या द्वादशरात्रः ॥

एवं च पूर्वं बुद्धिपूर्वमित्यवगम्यते। कृच्छ्र इति वक्तव्ये द्वादशरात्रग्रहणं पराकोपसंग्रहार्थम्। तथा चाङ्गिराः —

अन्त्यजानां च गमने भोजनेऽथ प्रमापणे।
पराकेण विशुद्धिः स्यात् भगवानङ्गिराब्रवीत् ॥

४०। इति। इदमपि रेतस्सेकात् प्रागेवोपरतस्य। कुतः रेतस्सिक्त्वा स्वयोन्यास्विति पूर्वकालक्रियास्मरणात्। तस्मात् प्राक् प्रायश्चित्तलाघवमवगम्यत इति। तथा दण्डविधाने चोशनसाप्युक्तम् — प्रागेतस्सेकादूर्ध्वं दण्ड इति। एवं च कुमारीगमनादावप्यर्धप्रायश्चित्तं द्रष्टव्यम्। गमने तु निर्वृत्ते वसिष्ठोक्तं द्रष्टव्यम्। द्वादशरात्रम् ॰ अब्भक्षो द्वादशरात्रमुपवसे-

दश्वमेधावभृथं वा गच्छेदिति तेनैव चण्डा-
लीव्यवायो व्याख्यात इति। अबुद्धिपूर्वा-
भ्यासे गुरुतल्पप्रायश्चित्तं द्रष्टव्यम्। तत्रापि
समशास्त्रोपाज्ञानात् मनुना सहस्रं त्वन्त्यज-
स्त्रियामिति दण्डविधानात् सहस्रदण्डतु-
४०२ ल्यत्वाच्च चान्द्रायणद्वयं द्रष्टव्यम्। तद्गा-
बुद्धिपूर्वे द्वितीयगमने यावत्प्रायश्चित्तं
तावदेवागर्भोत्पत्तेर्द्रष्टव्यम्। नाधिककल्प-
नास्ति। कुतः॥ —
संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः।
(प्रा)
दमः व्यास्या सह संवासा चण्डाल्या तावदेव तु॥
इति लिङ्गात्। कूश्माण्डहोमो वा द्रष्ट-
व्यः। यथाह प्रजापतिः —
सर्वस्त्रीणां च संयोगे गमनेऽगमने द्विजः।
प्रायश्चित्तैरसंतुष्टः कूश्माण्डैर्जुहुयाद्धृतम्॥
इति। गर्भोत्पत्तौ सत्यां प्रायश्चित्ताभावः।

तथाच शाण्डिल्यः —

अन्त्यस्त्रीषु प्रसूतस्य द्विजस्यानिच्छयापि वा।
निष्कृतिर्नोच्यते तस्य जाया चण्डाल एव सः॥

४०३ इति। बुद्धिपूर्वेऽभ्यासे च प्रायश्चित्ताभा-
वः — चण्डालान्त्यास्त्रियो गत्वा भुक्त्वा
च प्रतिगृह्य च।

पतत्यज्ञानतो विप्रः ज्ञानात्साम्यं तु गच्छति।

इति मनुवचनात्। अत्रान्नभोजने यदुक्तं
प्रायश्चित्तं तदर्धं प्रतिग्रहे विकल्प्यम्।
कुतः —

पक्वादपक्वमर्धं स्यात् योऽन्यद्रक्षणार्हकः।
तस्मादर्धमिति प्रोक्तं यदन्यद्रव्यमुच्यते॥

इति व्याघ्रवचनात्॥

॥ उदक्यागमने त्रिरात्रः॥

रजस्वलाभिगमने त्रिरात्रं अभोजनं
गमनाधिकारे पुनर्गमनग्रहणं स्वदा-

रादन्यत्र तदधिकप्रवेशार्थः। स्वदारे चास्यैव प्रवेशार्थं, तत्रैवं प्रतिपत्तव्यम्।
बुद्धिपूर्वे सकृद्गमने शातातपोक्तं द्रष्टव्यं —
४०५ अनुदकमूत्रपुरीषकरणे श्वकाकस्पर्शने सचेलस्नानं महाव्याहृतिहोमश्च। रजस्वलागमने चैतदेवमिति। अबुद्धिपूर्वेऽभ्यासे वसिष्ठोक्तं द्रष्टव्यं — रजस्वलाव्यवाये शुक्लमृषभं दद्यात्। कृष्णलिङ्गमिति। बुद्धिपूर्वे तु सकृद्गमन इदं, अभ्यासे तु मनुनोक्तं द्रष्टव्यं —

अमानुषीषु गोवर्जं उदक्यायामयोनिषु।
रेतस्सिक्त्वा जले चैव कृच्छ्रं सान्तपनं चरेत्॥

इति। अत्र क्षत्रियाया द्विगुणं वैश्यायां त्रिगुणं इत्यादि द्रष्टव्यम्। तथा ब्राह्मणस्याः क्षत्रियस्येत्याद्यपि गमनं प्रति कूश्माण्डहोमश्च द्रष्टव्यः। द्विरुक्ति—

रध्यायपरिसमाप्त्यर्थः॥ ॐ॥

४०५ इति मस्करीये गौतमभाष्ये
त्रयोविंशोऽध्यायः॥

॥ ॐ ॥

आविष्कृतैनसां प्रायश्चित्तमुक्तमनावि-
ष्कृतैनसां तु वक्तव्यमित्यत आह —
॥ रहस्यं प्रायश्चित्तमविख्यातदोषस्य ॥
रहस्यमप्रकाशं कर्तव्यं यथान्यैर्न ज्ञा-
यते प्रायश्चित्तमल्पेनापि महतः पापस्य
निष्कृतिर्भवतीत्येवमर्थम् । अविख्यात-
दोषस्येति लोके नाविज्ञातैनसः ये ना-
न्तरेण यत्कर्तव्यं न संभवति तस्माद-
न्यैर्न विज्ञातस्येत्यर्थः । पारदार्यपतित-
४०६ संप्रयोगादौ न केवलं कर्तुरेव विज्ञाना-
संभवात् । कथं पुनरप्रकाशो वाल्पैर्दोषत्वं

पुनर्विप्रक्षणादिकमेकरूपतेति नात्रोपपत्ति-
रन्वेष्या वचनगम्यत्वात्। मतिपूर्वामति-
पूर्वभेद इव अथावश्यं कर्तव्यम्। ततः
इदमुच्यते। यो हि प्रकाशं पापं करोति स
उभयलोकैर्निरपेक्षः प्रवर्तते। तस्य बहुत-
रसंकल्पो भवति। ततश्च दोषभूयस्त्वम-
न्येषां प्रवृत्तौ हेतुभावं च प्रतिपद्यते
गतानुगतिको हि प्रायशो लोक इति। त-
तश्च प्रकाशे लोकनिन्दानिवृत्तिः प्राय-
श्चित्तं च कर्तव्यम्। इतरत्र तु पापक्षपणमात्र-
मेवेति॥ (ऋचं तरत्स)

॥ चतुरृचं तरत्समन्दीयं वसु
जपेदप्रतिग्राह्यं प्रतिजिघृक्षन्
प्रतिगृह्य वा॥

802 'तरत्समन्दी धावती'त्येताश्च तस्र ऋचोऽ-
वसु अघमर्षणरूपेण अन्यथा अन्यैः ज्ञायत इति

गिराग्रजपो द्रष्टव्यः। यथाह मनुः—
प्रतिगृह्याप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितम्।
जपंस्तरत्समन्दीयं पूयते मानवस्त्र्यहात्॥
इति। हविष्यभोजनं च द्रष्टव्यम्। अप्र-
तिग्राह्यस्य जातिकर्मदुष्टस्य यद्द्रव्यं
तत्प्रतिजिघृक्षन् प्रतिगृहीतुमिच्छन्।
एवं च भुवक्ते तद्दर्शयति कामकारकृतेऽपि
पापे रहस्यमस्तीति इच्छामात्रे वा प्र-
तिग्राह्यस्य दोषोऽस्तीति प्रतिषिद्ध-
भाञ्जनसोरपचार इति यद्वक्ष्यति तद-
स्मादन्यत्र यद्द्रष्टव्यं प्रतिगृह्णीते तदेव
कुर्यात्। नाशूद्रादभोज्यं भुक्त्वा च तत्र
यत्र पूर्वमप्रतिग्राह्योऽयमिति न जा-
नाति तत्र प्रतिगृह्य जपेदितरत्र पूर्वमि-
४०४ ति द्रष्टव्यम्। अत्रापि अभोज्यभोजने मू-
त्रादिवर्जितस्य द्रष्टव्यम्। तस्य शाङ्खेनो-

कत्वात् रेतो मूत्रपुरीषप्राशने ओंकारे-
णाभिमन्त्र्यापः पिबेदिति। यत्र जपवि-
शेषो नोक्तः तत्रोंकारदशवारो द्रष्टव्यः।
अत्र बुद्धिपूर्वाबुद्धिपूर्वभेदः। एतावान्
विशेषः। बुद्धिपूर्वं कृतो मयापचारः तस्ये-
दं प्रायश्चित्तं भवेदित्येवं संकल्प्य कर्तव्य-
म्। तावता गुरुर्भवतीति। तथा उक्तं चाप-
स्तम्बवाक्यं — यः प्रमत्तेरप्रमत्तं हन्ति
प्राप्तं दोषफलं सह संकल्पेन भूय इत्यादि।
अबुद्धिपूर्वे संकल्पेन विना प्रायश्चित्तमा-
त्रमेव कर्तव्यं इति। तथा वसिष्ठोऽपि-
पापस्य ध्यानेन प्रायश्चित्तस्य गौरवं द-
४०१ र्शयति मनसा पापं ध्यात्वोंपूर्वास्सप्ता-
न्ता व्याहृतीरघमर्षणं वा पठेदिति।
ततश्च बुद्धिपूर्वाबुद्धिपूर्वभेदेन प्राय-
श्चित्तान्तरकल्पना अभ्यासे तत्तद्देवा-

भ्यसेत् ॥ —
जपादिपूरणं कुर्यात् ख्यातदोषो द्विजोत्तमः।
रहःकृतस्य पापस्य तत्तद्वाभ्यसेत्तथा ॥
इति। प्रजापतिवचनात् ॥
॥ अभोज्यं बुभुक्षमाणः पृथिवीमावपेत् ॥
अभोज्यं चतुर्विधं प्रोक्तं तद् बुभुक्षमा-
णो भोक्तुमिच्छन् आपद्दर्शनार्थं
बुभुक्षमाणः इत्यस्योपादानं, ततश्च
तदुपभोगमन्तरेण जीवनं न संभव-
तीति द्रष्टव्यम्। पृथिवीमावपेत् क्षि-
पेत्। अपरे पृथिव्यामावपेदिति पठ-
४।० न्ति व्याचक्षते च पृथिव्यां प्रक्षिपे-
दिति। तदयुक्तम्। एवं सत्यन्यैर्विज्ञा-
यत इति ॥
॥ ऋत्वन्तरारमण उदकोप-
स्पर्शनाच्छुद्धिमेके ॥

संबन्धार्थं द्वितीया ऋतुमध्य आरमणे
(कृत्वा)
उदकागमने इत्यर्थः। उदकोपस्पर्शना-
च्छुद्धिमेके आहुः। गौतमस्तु – सचेलं
स्नात्वाब्लिङ्गाभिः वारुणीभिश्चाप-
मार्जनमपीच्छति। तथाच वक्ष्यति।
अनार्जवे पैशुन इत्यादि। आरमण इत्यु-
क्तवात् स्वदारविषय इदम्। परदारे त्वे-
तदधिकं परदारप्रायश्चित्तं द्रष्टव्यम्।
तदपि वक्ष्यति तदा तदाहुः कतिधावकी-
र्णी ~~र्णी~~ प्रविशतीत्यादि॥

॥ एकेऽस्त्रीषु ॥ [?]

एके अस्त्रीषु वडवाद्यासु गोवर्जं मैथु-
४॥ नमासेवन्त एतदेवोदकस्पर्शनमिच्छन्-
ति। गौतमस्तु वक्ष्यत्यनार्जव इत्यादौ
गवि मनुनोक्तं द्रष्टव्यं —
त्र्यहं तूपवसेद्युक्तस्त्रीरहोऽभ्यवयन्नपः।

मुच्यते पातकैस्सर्वैस्त्रिर्जपित्वाघमर्षणम् ॥

इति । एते वर्णयन्ति स्त्रीषु व्यभिचारिणीषु एतदेव प्रायश्चित्तमिति । तदयुक्तम् ॥—

न स्त्री दुष्यति जारेण न विप्रो वेदकर्मणा ।
नापो मूत्रपुरीषाभ्यां नाग्निर्दहनकर्मणा ॥

इति वसिष्ठेनोक्तत्वात् । एवं चापदि वेदकर्मणा दुष्टस्य विप्रस्यादोषो द्रष्टव्यः ।

रहस्यं चेत् ब्राह्मण इदानीमाह—

॥ पयोव्रतो वा दशरात्रं ॥८
घृतेन द्वितीयं अद्भिस्तृतीयम् ॥

४।२ पयोव्रतं क्षीराहारः । एवं प्रथमं दशरात्रं द्वितीयं घृतेन तृतीयमद्भिः वर्तेत । वाशब्दादेतानि दशरात्रं हविष्यभोजनो वा शक्तितो । शक्तितो विकल्पो द्रष्टव्यः ।

अस्य गुणविधिमाह—

॥ द्विवादिष्वेकभक्तितो जलक्लिन्नवासाः ॥

द्विवादिषु प्रातः एकभक्तितः सायमभुञ्जान इत्यर्थः। बहुवचनात् त्रिषु द्वि-रात्रेषु पयोव्रतपक्ष इष्टम्। ततश्च हविष्यभोजने द्विभोजनमविरुद्धम्। जलक्लिन्नवासा आर्द्रवासाश्च स्यात्। इदमपि तद्व्रत एवेत्यादौ न भवतीति द्रष्टव्यम्। प्रकाशो माभूदिति॥

॥ लोमानि नखानि त्वचं मांसं शोणितं स्नाय्वास्थि मज्जानमिति होमा आत्मनो मुखे मृत्योरास्ये जुहोमीत्यन्तस्सर्वेषाम् ॥

413 लोमादयो मन्त्राः। कथमवगम्यते। नायं द्रव्योपदेश इति चेत्, इतिकरणान्नोपदेशात् अन्तस्सर्वेषामिति चानुषङ्गारम्भात्

होमग्रहणाच्च । ततश्चैतैर्मन्त्रैराज्यहोमम-
ग्नौ कुर्यात् । आत्मनो मुख इत्याद्यनुषङ्गः ।
सर्वेषां लोमान्यात्मनो मुखे मृत्योरास्ये जु-
होमीत्यादि प्रयोगः ॥

॥ प्रायश्चित्तं भ्रूणहत्यायाः ॥

एतद्यथोक्तं प्रायश्चित्तं भ्रूणहत्यायाः । प्रा-
यश्चित्ताधिकारे पुनः प्रायश्चित्तग्रहणं अ-
दृष्टार्थमेवैतन्नतु दृष्टार्थमपीति । भ्रूण-
हन इति च पुरुषनिर्देशो कर्तव्ये पाप-
414 निर्देशस्सकृत्क्रियायामेतदिति ज्ञाप-
नार्थम् । अभ्यासे तु गुरुतरं कल्प्य-
म् । यन्मनुनोक्तम् —
एनसां स्थूलसूक्ष्माणां चिकीर्षन्नपनोदनम् ।
अवेत्यृचं जपेदब्दं यत्किञ्चेदमितीति च ॥ इति ॥

॥ अथान्यदुक्तो नियमः ॥

अथान्यत्प्रायश्चित्तं वक्ष्यते । पूर्वकालि-

तं पूर्वप्रायश्चित्तात् भ्रूणहत्याया अन्यदिति

उक्तो नियमः। पयोव्रतो वेत्यादि विशेषा-

स्त्वभिधीयन्ते ॥

॥ अग्ने त्वं पारयेति महाव्याहृति-

भिर्जुहुयात् कूश्माण्डैश्चाज्यम् ॥

'अग्ने त्वं पारय'इत्यादिना मन्त्रेण महाव्या-

हृतिभिश्च भूराद्यैः कूश्माण्डैश्च यद्देवा दे-

वहेळनमित्यादिभिश्चान्वहं क्रमेण सकृदा-

8.5 ज्यं जुहुयात्। आज्यग्रहणं सिंहावलोकि-

तक्रमेण पूर्वत्राप्यधिकर्तव्यम्। यत्र यत्र

द्रव्यानुद्देशस्तत्र तत्र सर्वत्रेति। केचित्

चकारात्तदाहवेन च ॥

॥ तदन्ते ऽ(ब)वा ब्रह्महत्या सुरापान-

स्तेयगुरुतल्पेषु प्राणायामैस्ता-

न्तो ऽघमर्षणं जपेत् सममश्व-

मेधावभृथेन ॥

तेनैव चोक्तेन व्रतेन पयोव्रतो वेत्यादिना
ब्रह्महत्यादिषु चतुर्षु पापेषु प्रायश्चित्तं
कुर्यात्। स्तेयं चात्र सुवर्णस्तेयम्। ब्रह्म-
हत्या सुरापानगुरुतल्पादि। आहचर्यात्
प्राणायामैस्तान्तः खिन्नः अघमर्षणं न
ऋतं च सत्यं चेत्यादि जपेत्। समं तुल्य-
मेतदश्वमेधावभृथेन सुरापानादि-
ष्वश्वमेधावभृथस्नानं शुद्धिहेतुरित्य-
816 नेन दर्शयति। दण्डापूपिकयाश्वमे-
धोऽपि द्रष्टव्यः। तथा च मनुः —
यथाश्वमेधः क्रतुराट् सर्वपापप्रणोदनः।
तथाघमर्षणं सूक्तं सर्वपापप्रणोदनम्॥ इति॥
॥ सावित्रीं वा सहस्रकृत्व आवर्त-
येन्पुनीते हैवात्मानम्॥
अधिकारात्तद्कृत एवैतेष्वपि पापेषु मासं
सावित्रीं बहुकृत्वोऽभ्यस्य शीघ्रं शुद्धि-

माप्नोतीह। इतिनिपातो वैदिकार्थसम्प्रद-
र्शनार्थः। एवैत्यवधारणार्थः। वेदवचन-
मन्येष्वपि पापेषु सावित्र्यहः शुद्धिहे-
तुरिति प्रदर्शनार्थः। तथाच वसिष्ठः—
सहस्रपरमां देवीं शतमध्यां दशावराम्।
शुद्धिकामः प्रयुञ्जीत सर्वपापेष्ववस्थितः॥
४।७ इति।अवधारणं पुनीतसम्प्रदर्शनार्थम्।
तथाच व्यासः—
न सावित्रीसमं जप्यं न व्याहृतिसमं हुतम्।
(क्ष)
नाग्नितोयसमं ज्ञानं न चाहिंसासमं तपः॥इति॥
॥ अन्तर्जले वाघमर्षणं त्रिराव-
र्तयन् सर्वपापेभ्यो मुच्यते॥
तद्गत एवोदकस्यान्तः स्थितस्त्रागम-
घमर्षणं त्रिरभ्यस्य सर्वस्मात्पापा-
त् ज्ञानाज्ञानकृतान्मुच्यते शुध्य-
तीत्यर्थः॥ — ॐ॥

इति मस्करीये गौतमभा-
ष्ये चतुर्विंशोऽध्यायः ॥

॥ ॐ ॥

उक्तानि महापातकेषु रहस्यानि। अथ
इदानीमुपपातकेषु वक्तव्यानि। तत्रा-
818 व्यवकीर्णिन उपपातकित्वात् प्रायश्चि-
त्तस्यान्यगतिदेशाच्च तस्या पूर्वमुच्य-
ते। निन्दातिशयज्ञापनं कर्तुं श्रुतिरु-
पन्यस्यते —

॥ तदाहुः कतिधावकीर्यमाणः
प्रविशतीति ॥

तद्दोषगौरवत्वमस्य पश्यन्तो विशिष्टाः
आहुः। कतिधा कतिप्रकारमवकीर्णी प्र-
विशतीति। अवकीर्णिशब्दो रेतउपप्लुतेर्वा-
चकः। प्रविशति चास्य प्राणाद्यो ग-

छन्तीत्यभिप्रायः। एवं संशयमुत्था-
य स्वयमेवाह —

॥ मरुतः प्राणेनेन्द्रं बलेन बृहस्पतिं ब्रह्मवर्चसेनाग्निमेवेतरेण सर्वेणेति ॥

४।१ मरुतो वायून् प्राणेन पञ्चवृत्तिना प्रविशति। इन्द्रं बलेन उत्साहशक्त्या। बृहस्पतिमध्ययनश्रुतादिजनितेन तेजसा। अग्निमितरेण। एवकाराभ्यां मन आदिना। सर्वग्रहणाच्चक्षुःश्रोत्रादीनां, एवमुपप्लवादल्पायुर्निरुत्साहो ब्रह्मवर्चसहीनश्चक्षुरादिविरहितश्च संपद्यते। सेयमुद्योगजननार्था प्रायश्चित्तप्रवेशार्था वा श्रुतिरुदाहृता। इदानीं प्रायश्चित्तमाह —

॥ सोऽमावास्यायां निश्यग्निमुपसमाधाय प्रायश्चित्ताज्याहुतीर्जुहोति ॥

अवकीर्णिप्रस्तुतत्वात् स इत्यनर्थक-
मिति चेत्, रहसि खण्डितस्यैव परा-
मर्शनार्थः। अन्यथा ऋतुसुदाहरणास-
४२० वेषां ब्रह्मचारिणामिदं प्रायश्चित्तमित्या-
शङ्का स्यात् इति अमावास्यायां कृष्ण-
पर्वणि निशि अर्धरात्र इति द्रष्टव्यम्।
अन्यथा प्रकाशः स्यादिति द्रष्टव्यम्।
अग्निमुपसमाधाय कस्मिंश्चित्काष्ठे
माथिवेत्यर्थः। इतरथा जुहोतीति वच-
नादेवाग्नेः सिद्धत्वात्। प्रायश्चित्तग्रहणं
व्यतिक्रमानन्तरानुष्ठानज्ञापनार्थम्।
आद्यग्रहणं नियमार्थम्। एतस्मादेव लिङ्गा-
२. त्। इतरत्राद्याभावे- तत्प्रातिकृतयोऽपि
भवन्तीति द्रष्टव्यम्। अन्यथा प्रकाशः
स्यात् इति। (अग्निमुपसमाधाय कस्मिं-
श्चित्काष्ठे माथिवेत्यर्थः। इतरथा जु-

होतिवचनादेवाग्नेस्सिद्धत्वात् प्रायश्चित्त-
ग्रहणं व्यतिक्रमानन्तरानुष्ठानज्ञापनार्थ-
म्।) स्मृत्यन्तरोक्तस्य वा - सावित्रीं च ज-
पन्नित्यं पवित्राणि स्वशक्तितः॥ इति।
एवमादेस्सामान्यस्य प्रायश्चित्तविधेः प्रा-
पणार्थम्। आज्यग्रहणं नियमार्थम्।
एतस्मादेव लिङ्गात् इतरत्राज्याभावे
तत्प्रतिकृतयोऽपि भवन्तीति द्रष्टव्यम्।
तथाच गृह्यस्मृतिः — चतस्र आज्यप्र-
तिकृतयो भवन्ति ऊधन्यं वावाह्यं वा
४२। दधि पयो वेति। आहुतिग्रहणमवहितेन
होमार्थः।
॥ कामावकीर्णोऽस्म्यवकीर्णोऽस्मि
कामकामाय स्वाहा। कामाभिद्रु-
ग्धोऽस्म्यभिद्रुग्धोऽस्मि काम-
कामाय स्वाहेति॥

सकलमन्त्रपाठः प्रत्यक्षश्रुतौ तथोपलभ्य-
मानत्वात् ॥

॥ समिधमाधायानुपर्युक्ष्य यज्ञवास्तु-
कृत्वोपोत्थाय संमासिञ्चेदेतया
प्रकृतमग्निं निरूपातिष्ठेत ॥

अस्यावस्थानस्तु सर्थः। वैदिकमर्थमाह —
॥ त्रयो वा इमे लोका एषां लोका-
नामभिजित्या अभिक्रान्त्या इति ॥

त्रयो लोका भूर्भुवः स्वर्लोकाः। तेषामभि-
जितिरभिच्यवनं अभिक्रान्तिस्तत्रैवोत्प-
422 त्तिः। अभिजित्या अभिक्रान्त्या इति श्रुव-
त्कृतप्रायश्चित्तस्यावकीर्णिनः त्रिष्वपि
लोकेष्ववकाशं दर्शयति - त्रयो वा इति।
वै शब्दोऽनर्थकः। अथ नर्थं वै मिताक्षरा-
णीत्युक्तत्वात्। इमे लोका इति प्रत्यक्षेणा-
तिदेश आदरार्थः॥ एतद्वै (सु) तेषां कर्माधिकृस

यो पूत इव स्यात्। स इत्थं जुहुयादित्थ-
मभिमन्त्रयेत॥ तदेव कर्माधिकृत्य कर्मकृते-
ऽर्थः। एकेषां मतेन यो पूत इव स्यात् अ-
धिकाराद्रहस्य प्रायश्चित्ते ऽपि कृते यः पूत-
इवात्मानं मन्यते। स एवमेवं जुहुयात्
एवमेवाग्निमुपतिष्ठेत॥ (सू) वरो दक्षिणेति॥
वरो गौरं ते कर्मणो देयः स्वयं कर्तृत्वाद-
न्यस्मै ब्राह्मणाय देया दक्षिणा गौरवान्म-
हापातकविषय इदं द्रष्टव्यम्। गौतमस्य
तु तस्यैव प्रायश्चित्तस्यावर्तनम्॥ (सू) प्रायश्चि-
423 त्तमविशेषात्॥ उपपातकानां सर्वेषां सामा-
न्यमुक्तमेव प्रायश्चित्तं केचिदुपरितनसू-
त्रशेषत्वेन व्याचक्षते। प्रायश्चित्तं वक्ष्य-
माणमविशेषाद्रहस्ये प्रकाशे चेति। तत्र
प्रकाशविहितानां शेषत्वेन वर्णनीयम्।
रहस्ये तु स्वातन्त्र्यरूपेण प्रायश्चित्तग्रह-

(सू)

णं। अल्पेनानादरः कार्य इति॥ अनार्ज-
वपैशुनप्रतिषिद्धाचारान्नाद्यप्राशनेषु
शूद्रायां च रेतस्सिक्त्वाऽयोनौ च दोष-
वति कर्मण्यभिसन्धिपूर्वे त्वब्लिङ्गाभि-
रुपस्पृशेद्वारुणीभिः॥ (२९०)
अनार्जवमन्यकृतं मानसं कर्मशाठ्यं वा।
पैशुनं परिवादो वाचिकं, प्रतिषिद्धाचा-
रो यमलोकः। कायिकमनाद्यप्राशनम-
नाद्यस्यानेकविधस्योपभोगः। शूद्रा-
४२५ यां च रेतस्सिक्त्वा मैथुनमासेव्य पृथ-
गुपदेशः परपरिगृहीतायामपीत्येवमर्थः।
अस्योपपातकप्रायश्चित्तमेव यद्यपि भवति।
तथाप्याहत्योपदेशादिदमेवेति द्रष्टव्यम्।
एवं सामान्यविशेषमालोच्य सर्व-
त्र व्यवस्था कर्तव्या। चशब्दो रजस्व-
लाकन्योपसंग्रहार्थः। अयोनौ चास्यादौ

आपद्यन्ये वा। चशब्दात् क्षयत्नोत्सर्गे च
दोषवति च कर्मणि परपीडाहेतौ कर्मणि
कृते। चशब्दादहिताकरणे चाभिसंधि-
पूर्वेऽपि तादृश्यैनोपकल्पितेऽपीत्यर्थः।
अनाद्यप्राशनादि यद्यपि प्रतिषिद्धसेव-
नानि ततोऽपि यत्नतो वर्जनार्थः तेषां
पृथगुपदेशः। प्रायश्चित्तगौरवार्थं वा।
825 ततश्च बहुभिर्मार्जनं द्रष्टव्यम॥
दोषवत्कर्म स्तेयमित्येके। तत्र सुव-
र्णस्तेयादन्यदिति द्रष्टव्यम। तस्य
ब्रह्महत्या सुरापान इत्यादावुक्तत्वात्।
हिंसेत्यपरे। तत्रापि पातकोपपातकं
वर्जयित्वेति द्रष्टव्यम। तयोरुक्तत्वादभि-
सन्धिपूर्वेऽपीत्यपि शब्दात् अभ्यासेऽ
पि इति केचिद्व्याचक्षते॥
तदयुक्तम। प्रसभ्यासं प्रायश्चित्ता-

वृत्ते रुक्त्वादभिसन्धिपूर्वेऽपीत्येवम-
र्थं तत्र लघुत्वं माभूदिति । आब्लिङ्गा-
भिरब्दैवताभिरापो हिष्ठेत्येवमादिभिः
बहुवचनात् त्र्यवराभिर्वारुणीभिर्वरुण-
दैवताभिरिमं मे वरुणेत्येवमादिभिः
पूर्वं स्नात्वा मूर्धनि प्रक्षिपेत् । विसमा-
४२६ सनिर्देशो विकल्पार्थः । ततश्चाब्लिङ्गा-
भिर्वारुणीभिर्वेति द्रष्टव्यम् ॥ अ-
न्यैर्वा पवित्रैः ॥ अघमर्षणादिभिर्वा ।
पुनीतानामेव ग्रहणं यथा स्यादिति ।
पवित्रग्रहणं संभवतो विकल्पः ॥
॥ प्रतिषिद्धवाङ्मनसयोरप-
चारे व्याहृतयः पञ्च ॥
त्रयाणां पूर्वप्रायश्चित्तानां विशेषणार्थ-
मिदम् । व्याहृतयो भूराद्याः । ऊरुप-
मध्यास्सत्यान्ताः पञ्च चाब्लिङ्गाद्यप-

मार्जनानन्तरमाद्दिसोपस्थानरूपेण ए-
काद्शापरा उदाहर्तव्याः॥
॥ सर्वास्वपो वाचामेद् हश्च मादि-
त्यश्च पुनात्विति प्रातः॥
॥ रात्रिश्च मा वरुणश्च पुनात्विति
सायम्॥
सर्वासु क्रियासु अनार्जवादिकर्मस्विस-
421 र्थः। सर्वासु व्याहृतीषु अस्यर्थं प्रत्येकमा-
चमनमिति केचित्। तदयुक्तम्। सर्वाभि-
रिति प्रसङ्गादनन्तराणामेव माभूदिति
सर्वग्रहणम्। अब्ग्रहणं क्षीरादिनिवृ-
त्यर्थम्। एवं सायं प्रातरभिमन्त्र्य प्र-
तिपदमाचामेत्। संभवतो विकल्पः॥
॥ अष्टौ वा समिध आदध्याद्दे-
वकृतस्येति हुत्वैव सर्वस्मा-
देनसो मुच्यते॥

अष्टौ वा समिध आदध्याद्देवकृतस्यै-
नसोवयजनमसि स्वाहा। पितृकृतस्यै-
नसोवयजनमसि स्वाहा। मनुष्यकृत-
स्यैनसोवयजनमसि स्वाहा। ऽमकृतस्यै-
नसो वयजनमसि स्वाहा। यद्दिवा च
नक्तं चैनश्चकृम तस्यावयजनमसि
स्वाहा। य त्स्वपन्तश्च जाग्रतश्चैन-
श्चकृम तस्यावयजनमसि स्वाहा।
४२४ यद्विद्वांसश्चाविद्वांसश्चैनश्चकृम-
तस्यावयजनमसि स्वाहा। एनस एन-
सोऽवयजनमसि स्वाहा। यद्वो देवाश्चकृ-
त जिह्वया गुरुमनसो वा प्रयुती देवहेड-
नम्। अरावायो नो अभिदुच्छुनायते
तस्मिन्तदेनो वसवो निधेतन स्वाहा
इति मन्त्रै र्हुत्वेनसोवसवो निधेतनत्वे-
व अन्यमकृत्वेतस्य प्राधान्यत्वा-

पनार्थ एवकारः। ततश्च संभवमिदमेव कर्तव्यम्। सर्वस्मादेनसः न केवलमनार्जवादिभ्यः किन्तु अयाज्ययाजनादिभ्योऽपीति एनसः पापान्मुच्यते ॥

ॐ॥ इति मस्करीये
गौतमभाष्ये पञ्चविंशोऽध्यायः॥

॥ ॐ ॥

429 उक्तं कृच्छ्रातिकृच्छ्रौ चान्द्रायणमिति।

॥अथातः कृच्छ्रान् व्याख्यास्यामः॥

अथशब्दो मङ्गलार्थः। पूर्वस्याशुभसंकीर्तनस्य व्यवच्छेदनार्थः। एवं च ते धर्मार्था अभिभवन्ति। तथा शङ्खः - शक्तितः शरीरं शोषयेद्यमनियममन्त्रव्रतादिभिरिति। मन्त्रशब्देनात्र कृच्छ्राण्यभिधीयन्त इति। अतः शब्दो यतः एते मङ्गलार्थाः।

अपि भवन्ति ततोऽयाऽऽस्याम इति।
कृच्छ्रग्रहणं संज्ञार्थम्। अन्वर्थसंज्ञा च
कृच्छ्रान् दुःखान् पापान् मोचयतीति।

॥ हविष्यान् प्रातराशान् भुक्त्वा
तिस्रो रात्रीर्नाश्नीयात् ॥

हविष्यान् शुद्धान् व्रीह्यादिनिष्पन्नान्
४३० क्षारलवणवर्जितान् ग्रासानिति नाति-
सौहित्यं कुर्यादिति। त्र्यहमव्यवहितम्।
तत्रैव तिस्रो रात्रीर्नाश्नीयात्॥

ननु च सायं प्रातर्भोजनप्राप्तौ
सत्यां प्रातराशवचनादेव रात्रिभोजनप्र-
तिषेधसिद्धेः उच्यते हविष्यानिति।
विशेषारम्भात् प्रातर्हविष्यभोजनं
सायं यथाप्राप्तभोजनमित्याशङ्का स्या-
दिति रात्रौ यथाप्राप्तस्यापि प्रति-
षेधार्थं वचनम्॥

॥ अथापरं त्र्यहं नक्तं भुञ्जीत ॥

अथानन्तरं त्र्यहमपरमपि त्र्यहं, अपर-
त्र्यहग्रहणात् पूर्वस्यापि त्र्यहास्सिद्धिः।
प्रकृतं हविष्यं नक्तमेव भुञ्जीत पूर्ववत्।

॥ अथापरं त्र्यहं न कंचन याचेत ॥

४३। अथेत्यधिकारार्थम्। सकृद्भोजनस्यायाचि-
तलब्धत्वात्। नकालविशेष अपरग्रह-
णं पूर्वत्र्यहसादृश्योपादानार्थम्। ततो
हविष्यत्वं नातिसौहित्यं चात्रापि कृष्ण्य-
म। न कञ्चन न ज्ञातिमपि प्रार्थयेत। एवं
चायाचितलब्धस्यापि प्रतिषेधः केचिद्ब्रु-
वते। भोजने लभ्यमाने यदि भुक्ते हविष्यं
न भोक्ष्यत इति तथार्थाद्धविष्यभोजन-
याच्ञा कृता भवतीति अतोऽत्र हविष्य-
भोजननियमो नास्तीति ॥

अन्ये त्वाहुः। प्रतिग्रहोऽनेन प्र-

तिषिद्ध्यते। प्रतिज्ञाया अस्वीकृतस्वीक-
रणविषयत्वान्न हविष्यभोजनप्रतिषेध
इति। एवं चात्मीयस्याप्रतिषेधः। या-
चेदिति। सिद्धे कंचनेत्यारम्भात् परिचा-
रकादिविषयापि याच्ञा न कर्तव्या॥

४३२ ॥ अथापरं त्र्यहमुपवसेत्॥

अथशब्द उक्तार्थः। अनन्तरं त्र्यहं नि-
राहारस्स्यात्। इहापरग्रहणं प्रकारान्तरे-
णापि त्र्यहप्रवेशज्ञापनार्थम्। यथाह
वसिष्ठः —

अहः प्रातरहर्नक्तमहरेकमयाचितम्।
अहः पराकं तत्रैवमेकं चतुरहौ परौ॥
अनुग्रहार्थं विप्राणां मनुर्धर्मभृतां वरः।
बालवृद्धातुरेष्वेवं शिशुकृच्छ्रमुवाच ह॥
इति। उपवासं कर्तुमशक्तस्य भरद्वा-
जोक्तं कृच्छ्रत्र्यम्॥ ——

प्राजापत्यं चरन् विप्रो यद्यशक्तो दिने दिने।
विप्रान् पंचावरान्शुद्धान् भोजयेत्सम्यगर्चितान्॥
इति॥ — इदानीं गुणविधिमाह —
४३३ ॥ तिष्ठेदहनि रात्रावासीत क्षिप्रकामः॥
भोजनाद्यविरुद्धेषु कालेषु अहन्युत्थित एव
स्यात्। रात्रौ चासीनश्च एव स्यात्। एवं च
निद्राया अवश्यं भाविन्वादासीन एव निद्रां
सेवेतेति द्रष्टव्यम्। दिवा रात्रौ च क्षिप्रका-
म एव स्यात्। काम आस्था तामनुभूय
उत्पन्नसमनन्तरमेव विनाशयेत् इत्यर्थः।
अथवा सर्वयत्नेन शीघ्रं शुद्धस्स्या-
मिति। सततं संजातमतिः स्यामिति।
केचिद्व्याचक्षते- शीघ्रं शुद्धिकामास्ति-
ष्ठेदहनि रात्रावासीत यः शनैः शनैः
शुद्धिं करोमीति यस्य मतिस्तस्यानि-
यम इति। एवं च गुणबाहुल्यात् प्रा-

यश्चित्तगुरुत्वमनुमीयते। तथाच प्राजा-
पत्यद्वयस्थाने इदं गौतमोक्तमिति क-
४३५ र्तव्यतासहितं प्राजापत्यं द्रष्टव्यम्।
प्राजापत्य(मात्र)स्थाने इतिकर्तव्यतानुवि-
हितं यथाह वसिष्ठः — त्र्यहं प्रातस्त-
था सायंअयाचितमपराक इति; कृच्छ्र
इति॥ — अन्ये ब्रुवते। (ये)षां मन्त्रा-
धिकारो नास्ति स्त्रीशूद्रादीनां तेषां
मन्त्ररहितं वसिष्ठाद्युक्तेन मार्गेण द्रष्ट-
व्यम्। येषां तदधिकारोऽस्ति तेषामि-
दमिति॥ — अपरे अक्षिप्रकाम इति च
पठन्ति व्याचक्षते च। अक्षिप्रकाम एवं
प्राजापत्यं कुर्यात्। क्षिप्रकामस्तु वसिष्ठो-
क्तं कुर्यादिति। यथाह —
अथ चेत्त्वरते कर्तुं दिवसं मारुताशनः।
रात्रौ स्थिते जले व्युष्टः प्राजापत्येन तत्समम्॥

सावित्र्यष्टसहस्रं तु जप्यं कृत्वोत्थिते रवौ।
८३५ मुच्यते पातकैस्सर्वैर्यदि न भ्रूणहा भवेत् ॥इति॥

॥ सत्यं वदेत ॥

तथाभूतं वदेत् विवाहादिष्वेकीयपक्षमाश्रित्याप्यनृतं च न वक्तव्यमित्यभिप्रायः। एवं च सत्यवचनेनापि पापक्षपणं भवति इति गम्यते॥

॥ अनार्यैर्न संभाषेत ॥

अनार्याः द्विजातिभ्योऽन्ये वर्णाः। अपशब्दाश्च बहुवचनात् स्त्रीपुंसकैश्च॥

॥ रौरवयौधाजये नित्यं प्रयुञ्जीत ॥

रौरवयौधाजये सामनी पुनानस्सोमधारयेत्यस्यां ऋचि गीते नित्यमित्यस्य सर्वत्रानुषङ्गो द्रष्टव्यः। तिष्ठेदहनीत्यादौ जपेदिति
८३६ वक्तव्ये प्रयुञ्जीत इति वचनात् स्वाध्यायरूपेण नित्यशब्दादनुसवनमित्येके॥

पुनः पुनर्कहुरा इसन्ये॥ अनुसवनमुद-
कोपस्पर्शनमापोहिष्ठेति तिसृभिः पवि-
त्रवतीभिर्मार्जयीत। हिरण्यवर्णाः शुच-
य इसष्टाभिः॥ अनुसवनमुदकोपस्पर्शनं
स्नानं उपदेशाद्यात् तं कुर्यात। ततआ-
पोहिष्ठे साद्रिभिस्त्रिभिः पवित्रं ते विततं
मित्यादिभिरेव अनुक्तसंख्यत्वात्। तद्धि-
ना बहुवचनस्याकृतार्थत्वाच्च हिरण्यव-
र्णाः शुचयः इसष्टाभिश्च मार्जयीत। स-
लिलमभिमन्त्र्य मूर्ध्नि क्षिपेत॥
अन्ये करणविभक्तिनिर्देशात् ताभि-
४३७ रेव स्नानमिति वर्णयन्ति। मार्जनश-
ब्दस्य मध्योपदेशादन्यैश्च गतेः॥
॥ अथोदकतर्पणम्॥
अथानन्तरं अनुसवनं प्रापणार्थं तस्यो-
पादानम्। एवं च नैमित्तिकेष्वपि स्ना-

नेषूदकतर्पणमस्तीति गम्यते। तथाच
भृगुः —
नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते।
तर्पणं त्रिविधस्यापि एक एव विधिस्स्मृतः॥
इति। उदकोपस्पर्शनमित्यत्रोदकाधिकारे
पुनरुदकग्रहणमुदकस्थस्यापि तर्पणा-
र्थम्। तथाच स्मृत्यन्तरे विरुद्धमभिधाय
पुनः समर्थितं यथा — नोदकेषु न पात्रेषु न
क्रुद्धो नैकपाणिना। नोपतिष्ठति तत्तोयं य-
४३४ द्भूम्यां न प्रदीयते॥ तथा — उदके नोदकं दद्यात्
पितृभ्यस्तु कदाचन।
उत्तीर्य तु शुचौ देशे कुर्यादुदकतर्पणम्॥
इत्यभिधायोक्तं —
आपो देवगणास्सर्वाः आपः पितृगणाः स्मृताः।
तस्मादप्सु जलं देयं पितॄणां दत्तमक्षय्यम्॥
तथा —

देवतानां पितृणां च जले दद्याज्जलाञ्जलिम्।
असंस्कृतप्रमीतानां स्थले दद्याज्जलाञ्जलिम्॥

तत्पुनः केभ्यः कथं देयत आह—
॥ नमोऽहमाय मोहमाय मंहमाय
धून्वते तापसाय पुनर्वसवे नमो
मौञ्ज्यायौर्म्याय वसुहविन्दाय
सर्वविन्दाय नमः। पाराय सुपा-
राय महापाराय पारयिष्णवे
नमो रुद्राय पशुपतये महते देवा-
४३९ य त्र्यंबकाय एकचरायाधि-
पतये हरये शर्वायेशानायो-
ग्राय वज्रिणे घृणघृणिने कप-
र्दिने नमस्सूर्यायादित्याय नमो
नीलग्रीवाय शितिकण्ठाय न-
मः कृष्णाय पिङ्गलाय नमो
ज्येष्ठाय श्रेष्ठाय वृद्धायेन्द्राय

हरिकेशायोर्ध्वरेतसे नमस्सत्या-
य पावकाय पावकवर्णाय कामा-
य कामरूपिणे नमो दीप्ताय
दीप्तिरूपिणे नमस्तीक्ष्णाय
तीक्ष्णरूपिणे नमस्सौम्याय
पुरुषाय महापुरुषाय मध्यम-
पुरुषायोत्तमपुरुषाय ब्रह्मचा-
रिणे नमश्चन्द्रललाटाय
कृत्तिवाससे नमो नमः॥ इति॥
१ ॥ नायमेको मन्त्रः॥
८५० एता एवाज्याहुतय इति बहुवचननिर्दे-
शात्। किं तर्हि त्रयोदशैके मन्त्रा नम-
स्काराद्यो नमस्कारान्ताश्च द्रष्टव्याः।
श्रुतौ तथैव पाठदर्शनात्। ततश्चैव
नमस्कारान्तैर्मन्त्रैरुदकतर्पणं कर्त-
व्यम्॥

अन्ये पुनराहुः। संप्रदानविभक्त्यन्ताः षट्पंचानुद्दे(?)ते मन्त्रा इति॥

अपरे नमस्काराद्या एव नमस्कारान्तास्तथा पाठदर्शनात् इत्याहुः॥

॥ एतद्देवादित्योपस्थानम्॥

ननु चोपस्थानशब्दस्य क्रियावचनत्वात् यजुर्जा (षा) सह सामानाधिकरण्यानुपपत्तिः। अत एवं वक्तव्यम्। अनेनैवादित्योपस्थानमिति। नैष दोषः॥

४५। उपतिष्ठत्यनेनेत्युपस्थानमिति। एवं यजुरेवाभिधीयत इत्यदोषः। ततश्चादित्योपस्थानं कर्तव्यं इत्यर्थाच्चोदनेति। एवशब्द उदकतर्पणेऽप्ययमेव मन्त्र इति सूचनार्थः। इतरथा एतदादित्योपस्थानमित्युक्ते उदकतर्पणं गृह्योक्तेन मन्त्रेण प्रसज्येतेति। एवं च नित्याद-

धिकमिदं द्रष्टव्यम् । यथा समाम्नायप्र-
योगार्थो वा । एवं चोदकतर्पणे अन्यथैवस-
वगम्यते । ततश्च तत्र नमस्कारान्ताश्चे-
ति यदुक्तं तद्द्रष्टव्यम् ।
रौद्रेण मन्त्रेणादित्यस्तुतिरयुक्तेति चेत्
नैष दोषः । न हि वचनस्यातिभारः
रुद्रांशत्वाच्चादित्यस्य । तथाच पुराण-
८५२ उक्तं — क्षितिजलपवनहुताशनयजमा-
नाकाशसोमसूर्यमूर्तयो भगवतः शर्व-
स्याष्टाविति । एतद्विरुद्धम् । तत्रैवादि-
त्यो विष्णुरिति दर्शनात् इति चेत्—
द्वयोरभेदाददोषः । तथाच भगवद्गीतासु—
रुद्राणां शङ्करश्चास्मीति । तर्पणानन्तर-
मुपदेशात् गिरादित्योपस्थानमनुसव-
नं द्रष्टव्यम् ॥
अन्ये व्याचक्षते । अथोदकतर्पणमा-

द्विशेषपस्थानं चेति वक्तव्ये पृथग्यो-
गात् प्रसहं सकृद्वा द्विशेषपस्थानमिति॥

अपरे प्रायश्चित्तान्यपीति प्रवे-
शार्थं पृथग्योगाकरणमिति वदेकवच-
नत्वाद्बहुत्वे न विरोधः॥

॥ एता एवाज्याहुतयः (सू.)

४५३ आज्याहुतयश्चेति वक्तव्ये एता इत्य-
भिधानं उपस्थानवद्यावृत्त्याहुतिप्रति-
षेधार्थम्। अथ त्रयोदशेति आज्याहु-
तय इति द्रष्टव्यम्। पूर्ववत् साम्नाय
प्रयोगार्थः एवशब्दः। ततश्च नमस्का-
राद्यो मन्त्रा स्वाहाकारान्ताश्च द्रष्ट-
व्याः। कुतः। आहुतिग्रहणसामर्थ्याद्य-
पि पुंलिङ्गास्तथाप्याहुतिसामाना-
धिकरण्यादेता इति स्त्रीलिङ्गनिर्देशः।
केचिदाचक्षते। एतास्संप्रदानविभ-

ऋय: षट्पंचदशाज्याहुतय इति सं-
प्रदानविभक्तिपरामर्शार्थं स्त्रीलिङ्गनिर्दे-
शः। इति। एतदपि सकृत्सकृदादित्यो-
पस्थानवदनुसवनं द्रष्टव्यम्। आनन्त-
र्येणाभिधानात्। एवं द्वादशरात्रं वर्तेत
(सू)
४५५ ततः॥ द्वादशरात्रस्यान्ते चरुं श्रपयि-
त्वैताभ्यो देवताभ्यो जुहुयात्॥
द्वादशरात्रस्यान्तेन प्रतिदिनं त्रयोदशेऽ-
हनि षष्ठी निर्देशात् चरुं श्रपयित्वा
चरुणा जुहुयादिति सिद्धे श्रपयित्वाग्र-
हणमुत्पूयावचनमभिघार्यावरोहणमि-
त्येवमर्थं, जुहुयादिति होमविध्यर्थ-
म्। अतः स्वगृह्योक्तो स्थालीपाकविधा-
नेनेति द्रष्टव्यम्। एताभ्यो देवताभ्य
इति न वक्तव्यम्। वक्ष्यमाणत्वादेव
सिद्धमिति चेत् तद्ध्यानपूर्वार्थः उप-

देशा इत्यकोषः। ता आह —

॥ अग्नये स्वाहा सोमाय स्वाहा
अग्नीषोमाभ्यामिन्द्राग्निभ्या-
मिन्द्राय विश्वेभ्यो देवेभ्यो ब्र-
८४५ ह्मणे प्रजापतयेऽग्नये स्विष्टकृत इति ॥

द्विः स्वाहाकारपाठस्सर्वत्रानुषङ्गार्थः। इतिकरणः प्रकारावबोधनार्थः। अतः इन्द्रायेत्येवमादौ न पुरुहूतायेत्येवमादि योज्यम्। किन्तु तद्देवेति॥

॥ अथातो ब्राह्मणतर्पणम् ॥

होमानन्तरं वापरस्मिन्दिवसे शक्तितो ब्राह्मणतर्पणं कर्तव्यम्। अत्रापि त्र्यवरान् भोजयेदिति द्रष्टव्यम्॥

~~(॥ एतेनैवातिकृच्छ्रो व्याख्यातः॥)~~

(स्मृ) एतेनैवातिकृच्छ्रो व्याख्यातः॥

एतेनैव प्राजापत्यविधानेनातिकृच्छ्रोऽत्यतिशयपीडोत्पादको व्याख्यातः॥

कृच्छ्राणीति बहुवचनाद्वैतात्सिद्धमि-
ति चेत् उच्यते। अग्निष्टोमवत् प्रथम-
स्य प्रकृतित्वख्यापनार्थमेवमभिधा-
नमिति। ततस्सान्तपनादीपितीह-
४५६ नीत्याद्यवरोधकल्पना कर्तव्या। तत्स्व-
रूपं तु स्मृत्यन्तरादवगन्तव्यम्। यथा-
ह बोधायनः —
जितात्मनः प्रशान्तस्य
यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम्।
पराको नाम कृच्छ्रोऽयं सर्वपापप्रणोदनः॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम्॥
गोमूत्रं गोमयं चैव क्षीरं चैव घृतं तथा।
पंचरात्रं तदाहारः पंचगव्येन शुध्यति॥
गोमूत्रादिभिरभ्यस्तमेकैकं तत्त्रिसप्तकम्।
महासान्तपनं कृच्छ्रं वदन्ति ब्रह्मवादिनः॥
कणपिण्याकतक्राणि तथा चामो निराशनः।

एकत्रिपंचसप्तेति पापघ्नोयं तुला पुमान् ॥

४५७ यावकस्सप्तरात्रेण वृजिनं हन्ति देहिनाम् ।

सप्तरात्रोपवासो वा दृष्टमेतन्मनीषिभिः ॥

पौषभाद्रपदज्येष्ठास्त्वार्द्राकाशातपाश्रयाः ।

त्रीन् शुक्लान्मुच्यते पापात् पतनीयादृते द्विजः ॥

अमावास्यां निराहारः पौर्णमास्यां निराशनः ।

शुक्लकृष्णकृतात्पापात् मुच्यतेऽब्दस्य पर्वभिः ॥

भैक्षाहारोऽग्निहोत्रिभ्यो मासेनैकेन शुध्यति ।

कापोतिवृत्तिनिष्ठस्य पीत्वापः शुध्यते द्विजः ॥

ऋग्यजुस्सामवेदानां वेदस्यान्यतमस्य वा ।

पारायणं त्रिरभ्यस्येदनश्नं स्तो तिपावनः ॥

योऽब्दस्सत्यवादी च भूतेषु कृपयान्वितः ।

पूर्वोक्तयन्त्रशुद्धिभ्यस्सर्वाभ्यस्सोऽतिरिच्यते ॥

४५८ सामायुच्छन्दसा रुद्रा गायत्री प्रणवान्विता ।

सप्त व्याहृतयश्चैव जपः पापप्रणाशनः ॥

मृगारेष्टिः पवित्रेष्टिः त्रिहविः पावमान्यपि ।

इष्टय: पापनाशिन्यो वैश्वानर्यसमन्विता:॥
इदं चैवापरं गुह्यमुच्यमानं निबोधत।
मुच्यते येन पापेभ्य: सर्वेभ्य: पातकैर्विना॥
पवित्रैर्मार्जनं कुर्वन् रुद्रैकादशिनीं जपन्।
व्याहृतीभिर्घृतैर्जुह्वन् प्रयच्छन् हेमगोतिलान्॥
योऽश्नीयाद्यावकं पक्वं गोमूत्रे सशकृद्रसे।
सदधिक्षीरसर्पिष्कं मुच्यते सोंऽहसा क्षणात्॥
प्रसूतो यश्च शूद्राया येनागम्या च लंघिता।
४५१ सप्तरात्रात्प्रमुच्येत विधिनैतेन तावुभौ॥
रेतोमूत्रपुरीषाणां प्राशनेऽभोज्यभोजने।
पर्याधानेज्ययोरेतत् परिवित्ते च भेषजम्॥
अपातकानि कर्माणि कृत्वेह सुबहून्यपि।
मुच्यते सर्वपापेभ्य इत्येतद्वचनं सताम्॥
निवृत्त: पापकर्मभ्य: प्रवृत्त: पुण्यकर्मसु।
यो विप्रस्तस्य शुध्यन्ति विनायन्त्रैरपि क्रिया॥
क्षापवित्रस्सहस्राक्ष: मृगारोंहोमुचौ गणौ।

पार्थमान्यस्तु कुरमाण्डयो वैश्वानर्य ऋचश्च याः ॥
घृतोदनेन ताञ्जुह्वन् सप्ताहं सवनत्रयम् ।
मौनी व्रती हविष्याशी निगृहीतेन्द्रियक्रियः ॥
४५० सिंहे मयिसपां पूर्णे पातवेदो चतुष्पथे ।
मुच्यते सर्वपापेभ्यो महतः पातकादपि ॥
वृद्धत्वे यौवने बाल्ये यः कृतः पापसंचयः ।
पूर्वजन्मसु वा ज्ञातस्तस्मादपि बिमुच्यते ॥
भोजयित्वा द्विजानन्ते पायसेन ससर्पिषा ।
गोभूतिलहिरण्यानि भुक्तवद्भ्यः प्रदापयेत् ॥
इत्येवमादि ॥ अलमतिप्रसङ्गेन, प्रस्तुत-
मभिधीयते । यस्तस्य विशेषस्स उच्यते ॥—
॥ यावत्सकृदाददीत तावदश्नीयात् ॥
यावन्मात्रं हविष्यमेकेन पाणिना सकृदा-
दातुं शक्नुयात् । ग्रासमात्रचोदनयैषा ।
तथाच मनुः —
४५१ एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्ववत् ।

ऽयहं चोपवसेदन्यमतिकृच्छ्रस्स उच्यते॥ इति॥

॥ अब्भक्षस्तृतीयस्स कृच्छ्रातिकृच्छ्रः॥

पूर्ववत्त्र्यह एव भोजनकाल उदकस्तत्रैव केवल-
मुदकं पिबेत। स एवंरूपस्तृतीयस्स कृ-
च्छ्रातिकृच्छ्रो भवति। तृतीयग्रहणं द्वि-
तीय तृतीयमिति केवलोक्तेष्वपि तत्प्रती-
त्यर्थम। तथाच वक्ष्यति प्रथमं चरित्वेत्या-
दि। अद्भिस्तृतीयमिति वक्तव्येऽब्भक्षग्र-
हणमन्नकार्यकरणप्रापणार्थम्। ततश्चोप-
दिष्टकालव्यतिरेकेण उदकपानाभावः।
संज्ञाकरणं व्यवहारार्थम॥

फलदानमेषामाह —

॥ प्रथमं चरित्वा शुचिः पूतः
कर्मण्यो भवति॥

४५२ प्रथमं प्राजापत्यं चरित्वा कृत्वा शुचिरपहत-
विहिताकरणदोषः। पूतः प्रतिषिद्धाचरणा-

धर्मक्षय~~श्च~~। कर्मण्यः काम्यनित्यकर्मयोग्य-
श्च भवति। संपद्यते॥

ननु च इदमनर्थकम्। प्रायश्चित्तवि-
धानादेवैतत्सिद्धत्वात्। कुर्यादित्यत्र पा-
पक्षपणहेतुत्वस्य प्रतिपादितत्वात् तत्रापि
प्रथमादित्येव सिद्धत्वाच्चारित्राग्रहणमप्य-
नर्थकम्। तथा च श्रुतिः पूत इत्यनेनाध-
र्मावान्तरभेदकथनं मन्दफलम्। पूत इ-
त्येतावतैवोभयसिद्धेः। तथा च कर्मण्य इत्ये-
तदपि यदि तावदपेताधर्मत्वे कर्माधिका-
राभिप्रायः। ततोऽर्थसिद्धत्वादवचनीयं,
अथ विशिष्टतर फलप्राप्त्यभिप्रायं तदप्ययु-
453 क्तम्। यस्य कर्मणो यत्फलं तदेव तस्य
न फलातिशयो भवतीति। अत्रोच्यते।
देहान्तरकृतोभयविधाधर्मक्षपणसा-
धनार्थोऽयमारम्भः। चारित्राग्रहणं

सकृत्प्रयोगेन भवतीति ज्ञापनार्थम्। उप-
रिष्टादन्यन्महापातकेभ्य इत्यभिधानात्
प्रतिषिद्धसेवन एव प्रायशः प्रायश्चित्त-
विधानात् पूतशब्देन च प्रतिषिद्धवि-
षय एवाशङ्का स्यादिति। बुद्धिग्रहणं
तस्य ज्ञातस्येति द्रष्टव्यम्। अज्ञातस्य वे-
दोदितानां इत्युक्तत्वात्॥

नन्वेतदपि सर्वप्रायश्चित्ताभिधाना-
त् प्रतिषिद्धसेवन एव प्रायशः सिद्धं तस्य
बुद्धिपूर्वाबुद्धिपूर्वकृतानां सामान्यत्वादिति।
निर्दिष्टविषयं तदिति। एवं प्रतिषिद्धविष-
येऽपि द्रष्टव्यम्। कर्मण्य इत्येतदधर्मसं-
बन्धे सति कर्मफलप्रतिबन्धो भवतीत्ये-
तस्य ज्ञापनार्थम्॥

॥ द्वितीयं चरित्वा यदन्यन्महा-
४५५ पातकेभ्यः पापं कुरुते तस्मात्प्रमुच्यते॥

अतिकृच्छ्रं चरित्वा महापातकव्यतिरिक्त-
पापनिर्मुक्तो भवति। एवं च पूर्वेण यमनि-
यमनियमलोपजपापक्षयः क्रियते। अने-
न तूपपातककृतापापक्षपणमिति पूर्वस-
हितस्य सर्वप्रायश्चित्तवचनान्महापात-
कमप्यनभिसंधिकृतं द्रष्टव्यम्॥

॥ तृतीयं चरित्वा सर्वमेनो हन्ति॥

कृच्छ्रातिकृच्छ्रं चरित्वा महापातकमप्य-
नभिसन्धिकृतं विनाशयति। कुतः। अ-
स्य पूर्वयोस्तुल्यत्वात् चान्द्रायणसहि-
तस्य सर्वप्रायश्चित्तस्याभिसन्धिकृतस्य
महापातकस्याविनाशहेतुत्वाच्च पूर्वयोस्था-
855 न इदमपि कर्तव्यं, द्वितीयमित्यायावीहि-
तविषयं द्रष्टव्यम्। सर्वप्रायश्चित्तेन स-
र्वसमुच्चयो माभूदित्युपदेशः॥

॥ अथैतान् कृच्छ्रांश्चरित्वा सर्वे-
षु वेदेषु स्नातो भवति सर्वैर्देवै-
र्ज्ञातो भवति यश्चैवं वेद ॥

अनन्तरमव्यवहितं एतान्येव न तप्तकृ-
च्छ्रादीनि । प्रीत्यतिशयेनानुष्ठानार्थम् ।
एवं चार्द्रवस्त्रादीन्यपि द्रष्टव्यानि । त-
था जपहोमादीन्यपि । सर्वान् वेदानधी-
त्य स्नातस्य यत् तत्तुल्यफलसंबन्धो
भवतीत्यभिप्रायेणोक्तं सर्वेष्वित्यादि । सर्वै-
र्देवैर्ज्ञातो भवति तल्लोकगमनसमर्थधर्म-
४५८ संबन्धः इत्यर्थः । यश्चैवं वेद । यश्च कृच्छ्र-
स्वरूपेतिकर्तव्यताफलं विजानाति । चकारः
पूर्वेण समुच्चयार्थः । ज्ञात्वा कृतस्य पूर्वोक्तं
फलं न कर्ममात्रेण वेति । एवं च प्रत्येकमपि
फलानुरूप्येण द्रष्टव्यम् । केचित्प्रत्येकम-
पीच्छन्ति । तदयुक्तम् । अनुष्ठानादेव फलं,

न ज्ञानमात्राद्विति । तथाच मनुः —

फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम् ।

न नामग्रहणादेव तस्य वारि प्रसीदति ॥

इति ॥ ॐ ॥

इति मस्करीये गौतमभाष्ये

षड्विंशोऽध्यायः ॥

॥ ॐ ॥

457 उक्तं कृच्छ्रातिकृच्छ्रौ चान्द्रायणमि-

त्यतस्तत्र कृच्छ्रादिविधिरुक्तः । अधुना

चान्द्रायणविधिविवक्षयाह —

॥ अथातश्चान्द्रायणम् ॥

व्याख्यास्याम इति शेषः । अथशब्दोऽ-

धिकारार्थः । कृच्छ्रातिकृच्छ्रफलतुल्य-

त्वादनन्तरोक्तं न भवतीति । अतःशब्दो

हेतौ । यतोऽतत्फलसंयुक्तमिति संज्ञा

अन्वर्थत्वात् गुरुता चन्द्रगतिविज्ञात
भवति। आद्या मेकवचनम्। एवं च स्मृ-
त्यन्तरोक्तस्य यति चान्द्रायणादेः स-
र्वप्रायश्चित्तं ज्ञापितं - तथाच मनुः—
अष्टावष्टौ ग्रासमद्यात्पिण्डान्मध्यंदिने स्थिते।
नियतात्मा हविष्यस्य यतिचान्द्रायणं चरेत्॥
४५४ चतुरः प्रातरश्नीयात् पिण्डान्विप्रः कृताह्निकः।
चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं चरन्॥
यथाकथञ्चित्पिण्डानां तिस्रोऽशीतिस्समाहितः।
मासेनाश्नन् हविष्यस्य चन्द्रस्येति सलोकताम्॥
इति॥ ॥ तस्योक्तो विधिः कृच्छ्रे॥
तस्य सर्वप्रकारस्य। तच्छब्दोपादा-
नादुक्तो विधिरिति कर्तव्यता कृच्छ्रे प्र-
थमे तिष्ठेदहनीत्यादि। यस्तु विशेष-
स्स उच्यते॥

॥ वपनं व्रतं चेत्॥ (~~चरेत्~~)

वपनं केशाद्यपनयनं कर्तव्यम्। व्रतं
च प्रायश्चित्तार्थं अस्यैतद्भवतीति चेत्
व्रतशब्दे स्मृत्यन्तरे प्रायश्चित्तमुक्तमिति।
यथाह मनुः —
एते द्विजातयः शोध्याः व्रतैराविष्कृतैः सः॥
इति। एवं च यद्यदृष्टार्थं तत्तदानीं वप-
454 नमन्तरेणापि ज्ञापितं ~~म~~ भवतीति।
एवं च ब्रह्मचारिव्रतमाहुः- चतुरो ~~र~~ व-
र्तिनोऽभ्येसादौ तथा दर्शनात्। अस्मिन्प-
क्षे गृहस्थस्य तदन्तरेणापि भवति।
अयं न्यायः कृच्छ्रादावपि द्रष्टव्यः।
इदानीं स्वरूपाभिधानार्थमाह —
॥ श्वोभूतां पौर्णमासीमुपवसेत्॥
उपवासो भक्तत्यागः। तं चतुर्दश्यां कु-
र्यादित्यर्थः॥
॥ आ व्याय स्व सं ते पयांसि

नवो नव इति चैताभिस्तर्पण-
माज्यहोमो हविषश्चानुमन्त्रणम् ॥
आप्यायस्व समेतु ते। सं ते पयांसि
समुयन्तु वाजाः नवो नवो भवति जाय-
मानः इत्येताभिस्तिसृभिरुदकतर्पणं
घृतेन च होमः हविष्यश्च वक्ष्यमाण-
स्यानुमन्त्रणं कर्तव्यम् ।

460 तत्रैक आहुः। अङ्गभूयस्त्व फलभूय-
स्त्वाभ्युपगमात् कृच्छ्रविध्यतिदेशा-
च्च कृच्छ्रे रौद्रेण च उदकतर्पणादयः
उपदिष्टास्तैस्सह समुच्चीयन्त इति ।
तदयुक्तम् । अतिदेशप्राप्तमत्र प्रत्यक्षश्रुतेन
निवर्त्यत इति न्यायानिवृत्तिरेव न्या-
य्येति । अथ किमेताभिर्यथासंख्ये-
नैकैकं कर्तव्यं, उत समुच्चिताभिस्स-
र्वैतो विसमासात् समुच्चिताभिर्न्याय्यम् ॥

अन्ये आहुः। आज्यहोम इत्ये-
कवचननिर्देशादेकैकया कुर्यात्। स-
मुच्चये हि मन्त्रबहुत्वात् कर्मबहुत्वमिति।
होमबहुत्वे बहुवचनं प्रसज्येतेति उप-
स्थानं चन्द्रमसः। चशब्दादेताभिरेव
कर्तव्यम्। यद्यसौ न दृश्यते तदादित्य-
४६। स्यैव कार्यम्। सुषुम्नस्सूर्यरश्मिरित्या-
दिमन्त्रलिङ्गदर्शनात्। अत्र भिन्नार्थ-
त्वात् कृच्छ्र विध्यतिदेशप्राप्तं आदित्यो-
पस्थानं निवर्तते।।

।। यद्देवा देवहेडनमिति चतसृ-
भिर्जुहुयात्।।

यद्देवा देवहेडनमित्यादिभिरनादेशा-
दाज्यं जुहुयात्। स्त्रीलिङ्गेन संख्या-
निर्देशो ऋगर्थकः यजूंष्येवमादीनि
यजुर्वेदे पठ्यन्ते, तान्निवृत्त्यर्थमतः

पूर्वेण सहैते पञ्चाज्याहुतयः सप्त वा ॥

॥ देवकृतस्येति चान्ते समिद्धिः ॥

देवकृतस्येत्याद्य उक्तास्तैर्मन्त्रैरष्टौ समिद्धोमं च कुर्यात् । अन्ते चान्द्रायणपरिसमाप्तौ, चत्वारिंशदादौ च ॥

॥ ॐ भूर्भुवः स्वर्महर्जनस्तपः सत्यं यशः श्रीरूर्गिडौजस्तेजः पुरुषो धर्मस्ते शिव इत्येतैः ग्रासानुमन्त्रणम् ॥

रु० गि० ४८२

प्रणवाद्यः पंचदशैते मन्त्राः । एषामेकैकेनानुपूर्व्येण ग्रासानुमन्त्रणं कर्तव्यम् । पूर्वत्र हविषोऽनुमन्त्रणमुक्तम् । यदा चान्त्यः पिण्डो व्यावर्तते, तदान्त्यमन्त्रोऽपीति तन्मन्त्रो द्रष्टव्यः ।

॥ प्रतिमन्त्रं मनसा नमः स्वाहेति वा सर्वान् ॥

मन्त्रं प्रति नमस्कारं स्वाहाकारं वान्ते

कृत्वा सर्वान् ग्रासान् मन्त्रयेत। इति वि-
कल्पः। सर्वग्रहणाद्विभक्तानामनुमन्त्रण-
म्। न पुनरविभक्तानामनुमन्त्रणम्।
मन्त्राश्चैते न भक्षणमन्त्राः। अत एवमभि-
मन्त्र्य भुञ्जीत॥

॥ ग्रासप्रमाणमास्याविकारेण॥

यावता ग्रासेन मुखं न विक्रियते नाति-
४६३ विवृतमित्यर्थः। तावदेव प्रमाणं स्यात्।

॥ चरुभैक्षसक्तुकणयावकशाक-
पयोदधिघृतमुलफलोदकानि
हवींष्युत्तरोत्तरं प्रशस्तानि॥

द्वादशैतानि द्रव्याणि। एषां हविष्याणां
यद्यदुत्तरमुक्तमुत्तरतः पूर्वस्मात् प्रश-
स्ततरं, पीडातिशयहेतुत्वात्। चतुर्ह-
विष्यं तत्सर्वं श्रपयितव्यं भैक्षं यस्यो-
पपद्यते, ब्रह्मचर्यानीतं वा। शेषाणि प्रसि-

द्धानि। हविर्ग्रहणं हविष इव संस्कारा-
र्थम्। ततो लवणगुडादिवर्जनसिद्धिः।
तत्र द्रव्याणां पुटिकया ग्रासया ग्रासक-
ल्पना कर्तव्या। तत्र गुरूणि गुरूणि
इत्यनेन न्यायेन कल्पना कर्तव्या।।

।। पौर्णमास्याम् ।।

४६४ ।। पञ्चदश ग्रासान् भुक्त्वैका-
पचयेनापरपक्षमश्नीयात् ।।
चतुर्दश्यामुपवासं कृत्वान्यतमस्य
हविषः पञ्चदश्यां पञ्चदश ग्रासानाशि-
त्वा ततः परमेकहान्या कृष्णपक्षम-
श्नीयात्। अपरपक्षग्रहणं व्याप्त्यर्थं
सकलं पक्षमनेन प्रकारेण व्याप्नुयात्।
न त्वनियमेन। संख्यां पूरयेदिति सकृ-
द्भोजनार्थं वा गम्यमानस्य पुनर्वचनम्।।
।। अमावास्यायामुपोष्यैकोच्च-

येन पूर्वपक्षम् ॥

ततोऽमावास्यायामुपवासं कृत्वा प्रतिपत्प्रभृति एकैकवृद्ध्या शुक्लपक्षं भुञ्जीत। तथा पौर्णमास्यां पञ्चदश ग्रासा भवन्ति। मध्यतनुत्वात्। पिपीलिकामध्यमिदम् ॥

865 ॥ विपरीतमेकेषाम् ॥

एकेषामाचार्याणामिदमेव विपरीतं भवति। चतुर्दश्यामुपवासं कृत्वामावास्यायां एकं पिण्डमद्यात्। ततः प्रतिपदारभ्यैकैकवृद्ध्या शुक्लपक्षं अश्नीयात्। तथा चतुर्दश्यां पञ्चदश ग्रासा भवन्ति। ततः पौर्णमास्यामुपवासः। प्रतिपदि पञ्चदशग्रासास्ततः एकैकहान्या कृष्णपक्षमश्नीयात्। इति ॥

अन्ये त्वन्यथा विपरीतमाचक्षते।

पौर्णमासीमुपोष्य प्रतिपदमारभ्यैका-
पचयेनापरपक्षमश्नीयात्। ततोऽमावास्या-
प्रभृत्येकैकोपचयेन पूर्वपक्षमश्नीयादिति
पूर्वोक्तो यवमध्यः। तस्मात्पूर्वोक्तोऽयं च
पिपीलिकामध्यः॥

866 ॥ एष चान्द्रायणो मासः॥

चन्द्रो येन ग्रासवृद्धिभ्यामनुगम्यते त-
च्चान्द्रायणम्। तत्सहचरितोऽपि मा-
सश्चान्द्रायणमित्युपचर्यते॥

॥ एतमाप्त्वा विपाप्मो विपाप्मा
सर्वमेनो हन्ति॥

एतमेवं विधं चान्द्रायणं मासमाप्त्वा
चरित्वा विपापः विहिताकरणस्यैनसः क्ष-
येण विपाप्मा प्रतिषिद्धाचरणनिमित्त-
किल्बिषनाशनात् अन्यदपि देहान्तर-
कृतमपि। सर्वप्रकारमेनो हन्ति। एवं च

विहिताकरणे प्रतिषिद्धसेवने कुष्ठाद्युपहते च सति चान्द्रायणं कर्तव्यमिति सूचयति ॥

॥ द्वितीयमाप्त्वा दश पूर्वान्दश परानात्मानं चैकविंशं

467 पङ्क्तिं च पुनाति ॥

संवत्सरं चाप्त्वा चन्द्रमसस्सलोकतामाप्नोति ॥

निगदार्थं सुगम्। संवत्सरं त्वाप्त्वा चन्द्रमसस्सलोकतामाप्नोत्याप्नोति। तुशब्दो व्यवहितार्थः। सलोकतां सालोक्यं गच्छति ॥ – ॐ

इति मस्करीये गौतमभाष्ये सप्तविंशोऽध्यायः॥



॥ ॐ ॥

इदानीं स्वामी रिक्थभागीति सूचितं दाय-
विभागमाह —

॥ ऊर्ध्वं पितुः पुत्रा रिक्थं विभजेरन् ॥

४६८ कस्माद्वितरधर्मवत् प्रायश्चित्तेभ्यः प्रागभि-
धानं तत्रैक आहुः — यदि पुत्राः पितरं बला-
द्विभागाय प्रवर्तयन्ति पिता वा सुपुत्राणां क-
र्माधिकारे सति यथाप्राप्तं विभागं करोति
ततोऽनयोः प्रायश्चित्तं नास्तीत्येवमर्थमिति
पुनरेतद्विचारणीयम् । येन न कश्चिदपि व्य-
तिक्रमे प्रायश्चित्ताभाव इष्यत इति । अतः
प्रायश्चित्तगौरवार्थमेवमभिधानम् ॥

सूत्रमिदानीं विव्रियते । ऊर्ध्वं जीवनात्
पितुः प्रेते तस्मिन्नित्यर्थः । एकशेषश्च
द्रष्टव्यः । पितामात्रोरिति । तथा च मनुः —
ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः सह ।

४६९ भजेरन् पैतृकं रिक्थं अनीशास्ते हि जीवतोः॥

रिति। पितृशब्दस्य च संबन्धिशब्द-

त्वात् पुत्रग्रहणं गम्यमानमपि क्रियते।

पुरुषाणामेव विभाग इत्येवमर्थम्। तथा

स्त्रीणां तावत्तैत्तरीयश्रुतौ श्रूयते। तस्मा-

त्स्त्रियो निरिन्द्रिया अदाया इति। तथा

नपुंसकानां वसिष्ठ आह-अनाशास्त्वा-

श्रमान्तरगताः क्लीबोन्मत्तपतिताश्चेति।

जीवति चेच्छतीति वचनादूर्ध्वं इति ग-

म्यमानमप्यभिधीयते। एकोद्दिष्टादिसंस्का-

रकरणादूर्ध्वमिति प्रतिपादनार्थं, रिक्थं

पैतृकं द्रव्यं। स्व्यादि पुत्रा विभजेरन्।

अत्र विचार्यते। किं स्वत्वे(त्वे) सति विभा-

ग उत विभागे सति स्वत्वमिति॥

अत्र केचिदाहुः। विभागे सतीति।

४७० तदयुक्तम्। सर्वेषां विभागः प्राप्नोतीति

वचनात् पुत्राणामेव नियम्यत इति चेन्न।
'अनीशास्ते हि जीवतो'रिति लिङ्गात्। कुतः।
ऊर्ध्वं पितुश्च मातुश्च इति। नियमादेव
प्रागविभागे सिद्धे ईशित्वमात्रप्रतिषेधा-
त् स्वत्वास्तित्वं ज्ञापयतीति भावात्।
इतरथानर्थक इति प्राप्त्यभावात्। तस्मा-
त्स्वत्वे सत्येव विभागः। एवं तर्हि जातपु-
त्रस्य पुत्रे संक्रमितत्वात् परस्वापादानं
प्राप्नोतीति चेत् जातिवदुभयत्र वर्तत इति
अदोषः। ईशित्वप्रतिषेधात्तु पुत्राणां दा-
नाभावोऽर्थसिद्धः॥

॥ निवृत्ते रजसि मातुर्जीवति वेच्छति॥

४७। उपरतरजस्कायां मातरि जीवत्यपि पितरि
तदनुज्ञया विभागः। इच्छया पितुर्न पुत्राणां
जीवति सामानाधिकरण्यात् विभागः पुत्रा-
णां कर्माधिकारापेक्षया कृष्ण्यः॥

॥ सर्वं वा पूर्वजस्येतरान् बिभृयात्
पितृवत् ॥

ज्येष्ठ एव वा सर्वं धनमादाय इतरान् यवीयसो भ्रातॄन् पोषयेत्। न विभागं कुर्यादित्यर्थः। पितृवत् यथापि बिभर्ति अयमपि यवीयसां कर्मानुष्ठानसामर्थ्याद्भावे ज्येष्ठस्य ज्येष्ठवृत्तित्वे सति।

॥ विभागे तु धर्मवृद्धिः ॥

तुशब्दो हेत्वर्थः। यस्मात् प्रत्येकमतिथिदानकर्मानुष्ठानेन धर्मवृद्धिः तस्माद्विभा-
472 ग एव युक्ततर इति अर्भकावस्थायामपि भिन्नबुद्धित्वे सति विभागः कार्य इत्येवमर्थ उपदेशः। वृद्धिवचनाद्दशदातुरपि धर्मोऽस्यैवेति ज्ञापयति। अधुना कथं पुनस्सं विभाग इत्यत आह —

॥ विंशतिभागो ज्येष्ठस्य मिथुन-

मुभयतो दद्युक्तो रथो गोवृषः ॥
सर्वस्मात् पितृधनात् विंशतिभागो ज्येष्ठस्य मिथुनं गोमिथुनं प्रसिद्धा उभयतोदतः अश्वाश्वतरगर्दभाः एषां यथासंभवमन्यतमाभ्यां युक्तो रथः गोवृषः प्रसिद्धः। अयमुद्धारः सति संभवे ज्येष्ठस्य ॥

॥ काणखोरकूटपण्डा मध्यमस्यानेकाश्चेत् ॥

473 काणः प्रसिद्धः। खोरो वृद्धः। खोट इति पाठे पादविकलः। कूटः शृङ्गविकलः। पण्डो विलोपितवालधिः। अविशेषितत्वात् गवाश्वादीनामपि सर्वेषां यथासंभवे द्रष्टव्यः। मध्यमस्यायमुद्धारः। ते च यदि बहवो भवन्ति इतरेषामपि सन्तीत्यर्थः।

॥ अविर्धान्यायसी गृहमनोयुक्तं

चतुष्पदां चैकैकं यवीयसः ॥

अविः प्रसिद्धः। एकवचनादेकं धान्यं व्रीह्या-
दि। अयो लोहः। आनुरूप्येण धान्यायसोः
कल्पनार्थं द्विवचनम्। एवं च न सर्वं गृ-
ह्णीयात्। गृह्णीयादेकमेकं, अनः शकटं युक्तं
चतुष्पदां च गवादीनामेकैकं पृथक् पृथ-
874 गानुरूप्येण यवीयसः कनिष्ठा गृह्णी-
युः। अयं कनिष्ठस्योद्धारः ॥

॥ समधेतरत्सर्वम् ॥

एवमुद्धृतोद्धाराच्छिष्टं समं विभक्तव्यम्।
ननु च विभागे समधैव सर्वस्मिन्प्राप्ते
वचनादुद्धार उक्ते शेषं सममेव प्राप्नो-
तीति नार्थोऽनेन सूत्रेण इति। नैष दोषः॥
यदा पिता विभागं करोति तदोद्धारप्रति-
षेधार्थं इदमिति ॥

अन्ये पितुरुद्धारप्रतिषेधार्थमिति

श्रुवते। अयं प्रकारो ज्येष्ठ एव च गुणवति द्रष्टव्यम॥

॥ अंशी वा पूर्वज स्यात्॥

द्वावंशौ अंशौ तावस्य विद्यत इति अंशी

475 भागद्वयं ज्येष्ठस्योद्धार इत्यर्थः।

॥ एकैकमितरेषाम॥

अयं विभागो यदा ज्येष्ठ एव गुणवान इतरे सर्वे निर्गुणाः तदा द्रष्टव्यः॥

॥ एकैकं वा धनरूपं काम्यं पूर्वः पूर्वो लभेत॥

एकैकं वार्थजातमभिप्रेतं ज्येष्ठानुक्रमेण गृह्णीयुः। अत्राभिप्रेत विशेषग्रहणमेवा गोद्धारः। अयमपि सर्वे गुणवन्तश्चे द्रष्टव्यम। किञ्च-

॥ दशकं पशूनाम॥

(काम्य)

धनजातमित्यनेन ताभ्यस्यैकस्य पशोर्ग्रहणे प्राप्ते संख्यानियमेन ग्रहणार्थमिदं

पशूनां दश दश ग्राह्या इति। तत्रापि—
(पदम्)
॥ नैकशफाद्विवचनाः॥
. . . .
अश्वादीनां स्त्र्यादीनां च दश दश ग्राह्या
इत्यर्थः। यदि सर्वे निर्गुणास्तदा असम-
876 मेव विभागो द्रष्टव्यः। अत्राविशेषानुपादानात्
स्मृत्यन्तरे च द्विरुक्तः पूर्वस्य तत्प्रयोजन-
त्वात् यथाह वसिष्ठः — अथ भ्रातॄणां दा-
य विभाग इति केचित् गुणवन्तः, केचि-
न्निर्गुणाः ततो ज्येष्ठो दशमुद्धारं गृहीत्वा-
न्यत्समं विभक्तव्यम्। यथाहोशना—
ज्येष्ठस्य दशमोद्धारः कनिष्ठस्याभिप्रेतो
भाग इति। अस्मिन्देशेऽयमेव विभागो
द्रष्टव्यः। समाचारात्॥
समानजातीयानामेकमातॄणां दाय उक्तः।
अधुना समानजातीयत्वेऽप्यनेकमातृ-
काणामाह—

॥ ऋषभोऽधिकोऽ ज्येष्ठस्य ॥

कनीयस्याः पुत्रस्य ज्येष्ठस्य ऋषभ उद्धारः। सममन्यत।

॥ ऋषभषोडशा ज्यैष्ठिनेयस्य ॥

877 ज्येष्ठायां जातो ज्येष्ठो ज्यैष्ठिनेयः तस्य पंचदशा गाव ऋषभश्चैक उद्धारस्समितरत ॥

॥ समधा वाज्यैष्ठिनेयेन स यवीयसः ॥

सम एव विभागो भवति। अज्यैष्ठिनेयेन कनिष्ठायां जातेन ज्येष्ठेन सह यवीयसो ज्येष्ठायाः पुत्रस्य कनीयसः एकमातृतो ज्यैष्ठ्यमन्यस्य जन्मत इति। अयमपि गुणवद्विषयो द्रष्टव्यः।

॥ पितृमातृ वा स्ववर्गे भागविशेषः ॥

यदा तु बहवस्समानसा (जा) तीयास्सापत्नाश्च जाया भवन्ति। तदा पुत्राश्रयस्य विभागस्य दुष्करत्वान्मातृत एव

विभज्यते। ततः स्वे स्वे पुत्रे भागविशे-
४७८ षोऽपि कर्तव्यः। स उक्तो विंशतिभागो
ज्येष्ठस्येत्यादि। पुत्रवतस्तावदेवं अपुत्र-
वतस्तु॥ पितोत्सृजेत्॥ पुत्रिकामनपत्योऽग्निं
प्रजापतिं चेष्ट्वा(ष्ट्वा)स्मदर्थमपत्यमिति सं-
वाद्य॥ पिता न माता उत्सृजेदर्पयेत्, न तु
दद्यात्। शास्त्रेण पुत्रिकात्वात् पाणिग्रा-
हणिका मन्त्राः कस्य स्वेव प्रतिष्ठि-
ता इति चोक्तत्वात्। पुत्रिकां दुहितरं
अनपत्योऽविद्यमानपुत्रः आग्नेयीं प्राजापत्यां
चेष्टिं कृत्वा अनाहिताग्निश्चेत् स्थालीपाक-
विधानेनाहुतिद्वयं हुत्वेति द्रष्टव्यम्।
ततो दानकालेऽस्मदर्थमपत्यं यदस्यां भ-
विष्यतीत्येवं वरेण सह संवादं तत एवं
४७९ प्रतिपादितायां यः पुत्रः (पुत्रस्य) माता-
महस्य पुत्रो भवति नोत्पादयितुरित्यभिप्रायः॥

॥ अभिसन्धिमात्रात्पुत्रिकेत्येकेषाम् ॥

यदा तु पूर्वस्य विधेः करणासंभवाद्दानात् पूर्वं मरणादिना संकल्पमेव करोति। यदस्यामपत्यं भविष्यति तन्मे समेनैव पुत्रिकात्वं भवतीत्येके मन्यन्ते। संभवापेक्षया विकल्पो द्रष्टव्यः॥

॥ तत्संशयान्नोपयच्छेदभ्रातृकाम् ॥

तदाशङ्कया न गृह्णीयात् कस्यचिदप्यनपत्यस्य सर्वा दुहितरः कुतः। तामिति वक्तव्ये ऽभ्रातृकामित्यारम्भात् यस्य पुत्रिकापि न संभवति तस्य॥

॥ पिण्डगोत्रर्षिसंबन्धा रिक्थं भजेरन् ॥

440 पिण्डसंबन्धः सपिण्डः। तदभावे गोत्रसंबन्धः। तदभावे ऋषिसंबन्धः। समानार्षेयः। एवमासन्नस्याभावे विप्रकृष्टस्तद्द्रव्यस्य भागिति॥

॥ स्त्री चानपत्यस्य ॥

पुत्रिकापुत्रस्याभावे कृतः प्रतिपुत्रिका-
मनपत्य इत्यनपत्याधिकारे पुनरनपत्यग्र-
हणात् तेन यदेव पिण्डादिसंबन्धारि-
कं भजेरन्। तदा स्य विभागं लभेत।
चशब्दादाचार्यः शिष्यश्च सामर्थ्यात्
सर्वाभावे। तथा च वसिष्ठः - तदभाव
इत्याचार्य इति ॥

॥ बीजं वा लिप्सेत ॥

यद्वा सपिण्डादिभ्यो बीजमिच्छेत। अप-
४४। समुत्पादयेदित्यर्थः। इच्छातो विकल्पः।
नियोगतो वा ॥

॥ देवरवत्यामन्यजातमभागम् ॥

विद्यमानदेवरायामन्येनोत्पादितमप-
त्यं न भागभाक्। कामजत्वात्। क्षेत्रजा-
पवादोऽयम् ॥

॥ स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां (च) ॥

अदत्तानामनपत्यानां च भवति। अन्ये आहुः—अप्रतिष्ठितानां पुत्राणामकृतविवाहानामिति॥ अपरे निस्वा इति। यशोबद्धाकृतौ च। तत्रादत्तानां दुहितॄणामभावे पुत्रा निस्वा गृह्णीयुः। तदभावे कृतविवाहास्तदभावेऽनपत्या। सीयस्सर्वेषामभावे भर्तेति क्रमो द्रष्टव्यः॥

॥ भगिनीशुल्कः सोदर्याणामूर्ध्वं मातुः ॥

४४२ भगिनीप्रदाननिमित्तं यद्द्रव्यं लब्धमार्षासुरविवाहयोः तत्सोदर्याणामूर्ध्वं मातुः तस्यां मृतायामित्यर्थः। एवं च पितुरभावे मातेव तस्यैष्टयुक्तं भवति।

॥ पूर्वं चैके ॥

प्रागपि मरणात् भगिनीशुल्कं सोदर्याणां भवतीति एके मन्यन्ते। तस्या वृत्तापेक्षया विकल्पो द्रष्टव्यः। अथवा पूर्वमेव यदुक्तं स्त्रीधनं दुहितॄणामिति, तदूर्ध्वमेव मातुर्न जीवन्त्यामित्येके मन्यन्ते। उक्तो विषयः।

॥ असंसृष्टिविभागः प्रेतानां ज्येष्ठस्य ॥

असंसृष्टिनो विभक्तास्सन्तः पृथक्पृथ-
443 ग्यदा भ्रातरोऽव्यवहरन्ति तेषां यः प्रैति तस्यानपत्यस्य। कुतः। अनपत्याधिकारात् यो विभागस्स ज्येष्ठस्यैव भवति। स हि सर्वेषां पितृसम इति। द्वैमातृकासमानजातीयार्थं बहुवचनमसमानजातीयानां भिन्नमातॄणां च यो विभागस्स स्ववर्गज्येष्ठस्यैव भवति ॥

2 ॥ संसृष्टिनः प्रेते संसृष्टी रिक्थ- (रिक्थभाक्) [भावात् ॥]

यस्तु विभक्तोऽपि पुनः कार्यवशात् संसृज्यते। स एव तद्भागभाग्भवति। पुनः प्रेतसंसृष्टिग्रहणात् सोदर्यार्थमन्येषां च यामात्राहमेवेति॥

जः
॥ विभक्तजः पित्र्यमेव ॥

884 निवृत्ते रजसि मातुरिसनेन पुत्राणां विभज्य पुनर्दारक्रियायां यदि पश्चात्पुत्रो जायते स पित्र्यमेव लभेत। एवं च जीवद्विभागपक्षे पितुरत्यंशभाक्त्वमर्थसिद्धं, तदपि द्वौ भागौ पितुर्द्रव्यौ॥

॥ स्वयमार्जितमवैद्येभ्यो वैद्यः
कामं न दद्यात्॥

यत्र पितुर्द्रव्यमनुपहत्य स्वयमुपात्तं भवति। वैद्यग्रहणात् व्रतग्रहादिना तदितरेभ्यः काममिच्छातो न दद्यात्।

यथाह मनुः —

अनुपघ्नन् पितुर्द्रव्यं श्रमेण यदुपार्जितम्।
स्वयमीहितलब्धं तन्नामामो दातुमर्हति॥
४४५ विद्याधनं तु यद्यस्य तत्तस्यैव धनं भवेत्॥ इति॥

॥ अवैद्यास्समं विभजेरन्॥

यत्र मूर्खाः कृष्यादिना उपार्जयेयुः। तत्स-
ममेव विभजेयुः। तथाह —
अवैद्यानां तु सर्वेषामीहातश्चेद्धनं भवेत्।
समस्तेष्वपि भाग स्यादपित्र्य इति धारणा॥
इति। अर्थसिद्धमपि चैतदुच्यते। निय-
मार्थम्। ततश्च वैद्यो ऽसममपि न दद्याति
अवैद्योपात्तं च वैद्यो ऽपि सममेवेति पुत्राः
रिक्थं विभजेरन्निति विधानादौरसेष्वेव
संप्रत्ययो माभूदित्यत आह —

॥ औरसक्षेत्रजदत्तकृत्रिमगू-
ढोत्पन्न(त्प)न्ना विविधाः
रिक्थभाजः॥

४४६ औरसः स्वभार्यायां स्वयमुत्पाद्यते। यथाह—

स्वे क्षेत्रे संस्कृतायां तु स्वयमुत्पादयेद्धि यः।
तमौरसं विजानीयात्पुत्रं प्रथमकल्पिकमिति॥

क्षेत्रजो योगद्वारेण उत्पाद्यते। यथाह—

यस्तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा।
स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः॥ इति॥

दत्तः यः प्रतिग्रहेणान्यतो लब्धः। यथाह—

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि।
सदृशं प्रीतिसंयुक्तं संज्ञो योदात्रिमस्सुतः॥

इति। कृत्रिमो यः क्रियते त्वं मम पुत्र इति
यथाह—

सदृशं तु प्रकुर्याद्यं गुणदोषविवर्जितम्।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः॥

४४७ इति। गूढोत्पन्नो यो निगूढमुत्पादितः।
यत्र बीजी न ज्ञायते सोऽयं बीजिनो विज्ञे-
यान् मातृजातीयः। एवं सगोत्रकानिनादि-

(हो)

योऽपि। यथाह—

स:
उत्पाद्यते गृहे यस्य न च ज्ञायेत कस्यचित्।

(त)
गृहे निगूढ उत्पन्नः यस्य स्याद्यस्य कल्मजः॥

इति। अपविद्धो यः परित्यक्तो अन्येन गृ-

ह्यते त्यक्तेऽन्येन गृह्यते विज्ञानेन यथाह—

(ता)
मातृपितृभ्यामुत्सृष्टं तयोरन्यतरेण वा।

यं पुत्रं परिगृह्णीयादपविद्धस्स उच्यते॥

इति। एते रिक्थभाजः॥

(न)
॥ कानीनसहोढपौनर्भवपुत्रि-

कापुत्रस्वयंदत्तक्रीता गोत्रभाजः॥

४४४ कानीनः कन्यायामुत्पन्नः। यस्तु तामुद्वह-

ते तस्यासौ भवति। तथाह—

पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः।

(म)
कानीनं तं वदेन्नाम्ना वोढुः कन्यासमुद्भवः॥

इति। सहोढो यस्सगर्भायामूढायामु-

त्पद्यते। यथाह—

या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती।
वोढुः स गर्भो भवति सहोढ इति चोच्यते॥

इति। पौनर्भवो व्यभिचारिणीपुत्रः। यस्तां पुनस्संस्कृत्य तस्यां पुत्रमुत्पादयति तस्यासौ भवति। यथाह—

पत्या वापि परित्यक्ता विधवा स्वेच्छयापि वा।
उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते॥
४४५ सा चेदक्षतयोनि स्याद्गतप्रत्यागतापि वा।
पौनर्भवेन भर्त्रा सा पुनस्संस्कारमर्हति॥

इति। पुत्रिकापुत्रः पूर्वोक्तस्य स्वयं दत्तः यस्स्वयमेवात्मानं प्रतिपादयति। यथाह—

मातापितृविहीनो यः त्यक्तो वा स्यादकारणे।
आत्मानं स्पर्शयेद्यस्मै स्वयंदत्तस्स उच्यते॥

क्रीतो, धनेन स्वीकृतः। यथाह—

क्रीणीयाद्यस्त्वपत्यार्थे मातापित्रोर्यमन्तिकात् (त्)।
स क्रीतकस्सुतस्तस्य सदृशोऽसदृशोऽपि वा॥

इति। एते गोत्रभाजः। उदकदानादिना
पुत्रार्थं कुर्वन्तीत्यर्थः। एवं चैतेन रिक्थ-
भाजः पूर्वे तु रिक्थभाजो गोत्रभाजश्च।
कुतस्तत् औरसेन सहाभिधानात्, स्मृ-
त्यन्तराच्च। यथाह—

औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च।
४१० गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट्॥

इति। बान्धवा गोत्रभाज इत्यर्थः। पु-
त्रत्वादेव सगोत्र . . . .

. . . .

न चैतेषां रिक्थभाक्त्वप्रतिषेधार्थः। औ-
रसादिसद्भावे चैते ग्रासाच्छादनमात्रं
हरन्त्येव पुत्रत्वादेतेषां यथाह—

सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा।
ग्रासाच्छादनमात्रं तु पतितेभ्य ददन्भवेत्॥

इति। तदभावे तु भवत्येव रिक्थभा-

एवं पुत्रप्रतिनिधित्वात्। यथाह—

क्षेत्रजादीन् सुतानेतानेकादश यथोदितान्।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः॥

इति। प्रतिनिधिश्च मुख्यद्रव्यालाभे
४५। समग्रफल एव भवति। सोमाभावे पू-
तिकवत्। पुत्रिकापुत्रस्य इहाभिधानं
गोत्रभाक्त्वप्रापणार्थम्। रिक्थभाक्त्वं
त्वौरसाभावेऽपि भवत्येव। यथाह—

पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते।
समस्तस्य विभागस्स्यात् ज्येष्ठता नास्ति
हि स्त्रियाम्॥ इति॥

शूद्रापुत्रस्य इहाभिधानं औरसाद्यभा-
वेऽपि रिक्थभाक्त्वप्रतिषेधार्थम्।

यथाह—

ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक्।
यदेवास्य पिता दद्यात् तदेवास्य धनं भवेत्॥

इति ।। चतुर्थांशिनौ औरसाद्यभावे ।।

षण्णामौरसादीनामभावे कानीनाद्यश्च-
तुर्थांशभाजः समस्तभाजो वाशब्दात्।
४१२ तथाच शङ्खः - उपाधीत ज्येष्ठाय तद-
भावे क्षेत्रजपुत्रिकापुत्रयोरप्यभावे तया-
जामितरेषामप्यभावे षड्भ्य इति गुणा-
पेक्षश्चायं विकल्पः। शेषस्सपिण्डादिसं-
बन्धेभ्य इति।

अपरे त्वौरसाद्यानामभाव इत्येतदु-
त्तरसूत्रार्थमाहुः। ततश्च कानीनाद्यश्चतु-
र्थांशभाजः प्रजीवनमात्रसंबन्धिनो वेति ।।
सवर्णापुत्राणां विभाग उक्तः। असवर्णासु-
तानां तु विशेषमाह —

।। ब्राह्मणस्य राजन्यापुत्रो ज्येष्ठो
गुणसंपन्नस्तुल्यभाक् ।।

ब्राह्मणस्य राजन्यापुत्रो गुणसंपन्नो

ज्येष्ठश्च स ब्राह्मणीपुत्रेण यवीयसा

तुल्यभाक् ॥

४९३ ॥ ज्येष्ठांशाहीनमन्यत् ॥

ज्येष्ठांशो य उद्धारः पूर्वमुक्तः विंशतिभा-

ग इत्यादि तद्विरहितमन्यद्द्रव्यं स-

मं लभेत उद्धारो न भवतीत्यर्थः। यद्यपि द्रव्य-

परो निर्देशः। तथापि ज्येष्ठांशमात्रप्रतिषे-

धमात्रमेवात्र विवक्षितम्। आरम्भसामर्थ्या-

त्। अन्यथा गुणसंपन्नो ज्येष्ठभागी भवे-

त्। अन्यथा गुणसंपन्नो ज्येष्ठभागी भवे

त्। यदि गुणहीनो नासौ

वक्तव्यमासीदिति। यदि गुणहीनो नासौ

तुल्यभाक्। तत्र मनुनोक्तं द्रष्टव्यं —

चतुरोऽशान् हरेद्विप्रस्त्रीनंशान् क्षत्रियासुतः।

वैश्यापुत्रो हरेद्(द्वयं)शमंशं शूद्रासुतो हरेत्॥

इति। शूद्रापुत्रस्य प्रतिषेध उक्त इति चेत्

उच्यते। क्षतयोन्यामुत्पन्नस्य प्रतिषेधः।

४९५ अक्षतयोन्यामंशभाक्त्वमिति पुनर्भवादि-

द्वारेण क्षतयोन्यापि संभवसेवेति। येषा-
मौरसाद्यभाव इति वाक्यशेषः। औरसाद्य-
भावे तुल्यभाक्त्वं अस्य व्याचक्षते। तेषु स-
त्सु स्मृत्यन्तरोक्तं द्रष्टव्यमिति। यथाह वसिष्ठः —
त्र्यंशं ब्राह्मण्याः पुत्रो हरेद्व्यंशं राजन्या-
याः पुत्रस्समामितरे विभजेरन्नीति विवृत्ता-
पेक्षया विकल्पो द्रष्टव्यः॥

॥ राजन्यावैश्यापुत्रसमवाये
यथा स ब्राह्मणीपुत्रेण ॥

यदा वैश्यापुत्रो ज्येष्ठो गुणसंपन्नः क्ष-
त्रियासुतो यवीयान् ब्राह्मणीपुत्रस्तु ना-
स्त्येव, तदा यथा ब्राह्मणीपुत्रेण क्षत्रि-
यासुतस्तुल्यभागेवं क्षत्रियापुत्रेण वै-
४९५ श्यासुतस्तुल्यभाक् ज्येष्ठांशहीनं, एवं च
क्षत्रियापुत्रस्य ज्येष्ठस्यास्मिन् विषये
ज्येष्ठांशो नास्तीति ज्ञापितं भवति॥

॥ क्षत्रियाच्चेत् ॥

वैश्यापुत्रो ज्येष्ठो गुणसंपन्नस्तुल्यभा-
गिति वर्तते। क्षत्रियायामपि वैश्यो ज्येष्ठ-
श्चेत् क्षत्रियापुत्रेण यवीयसा तुल्यभा-
गभवतीत्यर्थः। एवं वैश्यायाः शूद्रापु-
त्रस्य द्रष्टव्यमित्येके। तदयुक्तम्। अनु-
क्तत्वात् ॥

॥ शूद्रापुत्रोऽप्यनपत्यस्य शुश्रू-
षुर्लभेत वृत्तिमूलमन्तेवासि-
विधिना। सवर्णापुत्रोऽप्यन्या-
यवृत्तो लभेतैकेषाम् ॥

शूद्रापुत्रोऽप्यनपत्यस्य शुश्रूषुश्चेल्लभे-
896 त। स च यदि शिष्यवत् शुश्रूषापरो
भवति। भ्रातरं तद्भार्यादिं च गुरुं वानु-
वर्ततेत्यर्थः॥ अन्तेवास्यपि शुश्रूषावि-
शेषणत्वात् तदुक्तं च गुर्वभावे तदपत्ये

वृत्तिरित्यादि। कुतः। क्षतयोन्याग्रहण-
मिति चेत् पापार्थापिशब्दात् इतरस्यां-
शभाक्त्वस्योक्तत्वात् ॥सवर्णासुतोऽप्य-
न्यायवृत्तः न लभेतैकेषां॥ समानवर्णा-
सुतोऽपि। अपिशब्दाज्ज्येष्ठोऽपि दुर्वृत्तः
पतित इति यावत्। न लभेतैके। तथाच
वासिष्ठः — अनंशास्त्वाश्रमान्तरगताः
क्लीबोन्मत्तपतिताश्चेति नेत्याचार्यः। प-
तितापतितापेक्षया विकल्पो द्रष्टव्यः॥

॥ श्रोत्रिया ब्राह्मणस्यानपत्यस्य रि-
क्थं भजेरन् ॥

४९१ श्रोत्रियास्ते विद्यावृद्धाः। न तु छन्दो-
मात्राध्यायिनः। तथाच मनुः —
त्रैविद्याः शुचयो दान्ता इत्यादि। अ-
नपत्यस्य धनभाज इत्यर्थः। राजानु-
ज्ञातः।

॥ राजेतरेषाम् ॥

क्षत्रियादीनां राजैव हरेत्सर्वाभावे ॥

॥ जड(ड)क्लीबौ भर्तव्यौ ॥

जडः उपहतमनाः क्लीबस्तृतीया प्रकृतिः। एतावशनाच्छादने पोषणीयौ। मूकादीनामप्युपलक्षणम्। तथा च मनुः —

अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः॥

इति ॥ ॥अपत्यं जडस्य भागार्थम् ॥

जडस्य यद्यपत्यं भवति। तत्। तथा च मनुः —

८९८ यद्यर्थिता तु दारैः स्यात् क्लीबादीनां कथंचन।
तेषामुत्पन्नतन्तूनामपत्यं दायमर्हति ॥

इति। अस्मादेव लिङ्गात् तेषां यथासंभवं संस्कारानुमानम्। अन्यथा सावित्रीपतितत्वे सति तदपत्यस्याप्ययोग्यत्वमे-

वेति कृतप्रायश्चित्तस्य वा द्रष्टव्यम्।

एवं च तत्पूर्वमुपतिष्ठतीति। तस्यानु- २
ज्ञातं तदविकृतप्रायश्चित्तस्येति द्रष्ट-
व्यम्। एवं च ब्रुवाणो तत् ज्ञापयति।
विभागोत्तरकालमपि तद्रूपसस्य भागो
दातव्य इति॥

॥ शुद्रापुत्रवत् प्रतिलोमासु॥

स्त्रीषु जातानामपि शुश्रूषाणां शूद्रा-
पुत्रवद्वृत्तितुल्यं दातव्यं इत्यर्थः। तत्र
चण्डालादीनां शुश्रूषासंभवाद्धि हीन-
४११ तरं देयमिति द्रष्टव्यम्। एवं च प्रति-
लोमानामप्ययमेव धर्म इति द्रष्टव्यम्।

॥ उदकयोगक्षेमकृतान्नेष्वविभागः॥

उदकं कूपादि। योग इष्टं क्षेमः पूर्तम्।
यथाह लोकाक्षिः —
क्षेमः पूर्तं योग इष्टमित्याहुस्तत्त्वदर्शिनः।

अविभाज्ये च ते प्रोक्ते शयनं धनमेव च॥

इति। कृतान्ने उत्सवार्थमुपकल्पिते। कृता-
न्नग्रहणात्तण्डुलादीनां न दोषः। एतेष्वपि
भागो नास्ति। शयनपक्वतण्डुलादीन्येत-
स्यैव दातव्यानि। ज्येष्ठस्य कनिष्ठस्य
वेच्छति। अन्यानि समुदाय एव स्था-
प्यानि द्रव्याणि॥

॥ स्त्रीषु च संयुक्तासु॥

१०० याश्च स्त्रियो मैथुनोपभोगार्थेन परिगृहीताः
परलोकवीतभयैः पितृभिः दोषाभावं त-
स्मान्न गृह्णत इति चेत् प्रातिलोमास्वपि प्राप्तेः
तत्र-प्रतिलोमे वधः पुंसां स्त्रीणां नासादिकृन्तनम्॥
इति प्रायश्चित्तश्रवणात् तासु च पुत्रैर्न
विभागः। तासां वृद्धानामशनाच्छादनं
दातव्यम्। अन्याभिर्गन्तव्यमित्यभिप्रा-
यः। चकारादन्यद्द्रव्येकत्वादृशाक्यम्।

यथाह मनुः —

वस्त्रं पत्रमलङ्कारं कृतान्नमुदकं स्त्रियः।
योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते ॥इति।

॥ अनाज्ञाते दशावरैः शिष्टैरूहवद्भिरलुब्धैः प्रशस्तं कार्यम् ॥ (७)

१०। अज्ञातमज्ञानं तद्विपरीतमनाज्ञातं तस्मिन्यथावदनवगते संदिग्धे वा दशावरैस्सर्वोत्कृष्टैरित्यर्थः। शिष्टैरवगतवेदार्थैः।

तथाह मनुः —

धर्मेणाधिगतो यैस्तु वेदस्सपरिबृंहणः।
ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः॥

इति। ऊहवद्भिः ऊहापोहसमर्थैर्मीमांसादिशास्त्रकृतबुद्धिभिरित्यर्थः। अलुब्धैर्वितृष्णैः प्रशस्तं स्तुतं, इदमत्र युक्तमिति तत्कार्यमनुष्ठेयम्। तत्सां निधाने कर्तव्यमित्यभिप्रायः। ते च —

॥ चत्वारः चतुर्णां पारगा वेदानां
1.2 प्रागुत्तमास्त्रय आश्रमिणः पृथग्ध-
र्मविदः त्रयः एता दशावरा परिषद-
दित्याचक्षते ॥

ब्राह्मणा एवैते धर्मप्रवचने तेषामेवाधिका-
रात्। तथाच वसिष्ठः – ब्राह्मणो धर्मान्ब्रू-
यादिति। चत्वारो नैकश्चतुर्वेदाभिज्ञोऽपी-
ति। चतुर्णां नैकः पारगः। चत्वारोऽपि पा-
रगाः। सरहस्यमधीताः। वेदानामङ्गाना-
मुत्तमात् प्राक् त्रय आश्रमिणस्तृतीयेऽध्या-
य उक्ताः। ब्राह्मणात् प्राग्वर्णानां माभूदि-
त्याश्रमग्रहणम्। एतेऽपि वेदार्थज्ञा एव
परिगृह्यन्ते। अज्ञानामनधिकारात्। स्व-
कर्मानुष्ठानापेक्षया ह्येवमुक्तम्। पृथग्ध-
1.3 र्मशास्त्रज्ञास्त्रयः नैकस्सर्वधर्मज्ञोऽपि
ते च वेदवित्वे सत्याश्रमित्वे च तात्पर्यम-

ङ्गीकृत्य प्रथम उच्यन्ते। एतानः दशाव-
रान पर्षदिति शिष्टा आचक्षते। एतदपि
स्मृत्यन्तरेण सहैकवाक्यतार्थम्। तद-
प्येतेषामभावे त्र्यवरादीनामुपसंग्रहा-
र्थम्। तथाच मनुः —
दशावरा वा परिषद्यं धर्मं (धर्म्यं) परिकल्पयेत्।
त्र्यवरा वापि वृत्तस्थास्तद्धर्मं न विचारयेत्॥
इति॥ तथाच वसिष्ठोऽपि —
चत्वारो वा त्रयो वापि यं ब्रूयुर्वेदपारगाः।
स धर्म इति विज्ञेयो नेतरेषां सहस्रशः॥
इति। तत्र बहुत्वासंभवे स्वल्पं स्वल्पं
ग्राह्यमिति द्रष्टव्यम्। ~~असंभवे त्वे.~~
१०५ ॥ असंभवे त्वे(तेषां) श्रोत्रियो
वेदविच्छिष्टो विप्रतिपत्तौ यदाह॥
तत् कर्तव्यमिति शेषः। तुशब्दोऽवधा-
रणार्थः। असंभव एवैतेषां यथासंभवः।

कतिपयानामप्यसंभव इति। श्रोत्रियो वे-
दभावविकल्पेन वाशब्देनैव सिद्ध एवमु-
पदेशः पूर्वोक्तानां सर्वेषामभावे न दशा-
वरमात्र संभव इति। श्रोत्रियस्समस्तवेद-
पारगः। न स्मृत्यन्तरो मन्त्रब्राह्मणाध्यायी
बहुपाठस्याभीष्टत्वात् परिच्छेदे वेद-
वित्तदर्थज्ञं विना विप्रकर्षेण तदर्थज्ञानस्य
दर्शनाच्छिष्टः स्वधर्मावस्थितः विप्रति-
पत्तावभिप्राय भेदे तत्प्रमाणमत्र कारण-
105 माह — ॥ यतोऽयमप्रभवः॥
यतो यस्माद्वेदात्। अयंशब्देन संसार-
निवृत्तिरुच्यते। प्रभवशब्देन तस्यैव प्र-
तिपत्तिः। उभय साधनश्च वेदाधिगमः।
ततो वेदाः प्रमाणमस्मिन् विप्रतिपत्तौ।
तथाच मनुः —
चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्।

भूतं भव्यं भविष्यश्च सर्वं वेदात्प्रसिध्यति॥
इति॥ आदौ धर्मग्रहणं स एव परः पुरुषार्थः इति ज्ञापनार्थम्। किञ्च - हिंसानुग्रहयोगेषु॥ वेदाः प्रमाणमिति वाक्यशेषः। हिंसासंबन्धे एके पश्वादयो हि
१०८ यज्ञे हिंस्याः। सर्वत्र ब्राह्मणादयोऽनुग्राह्याः। इत्यत्र तस्मात्तत्रापि तद्वचनमेवानुष्ठेयमित्यभिप्रायः। सांप्रतं ज्ञानिनः फलमाह —
॥ धर्मिणां विशेषेण स्वर्गं लोकम्॥
॥ वेद धर्मविदाप्नोति ज्ञानाभिनिवेशाभ्याम्॥
धर्मी तु केवलकर्मी। विशेष नुष्ठायी। कुतः; डित्यभिप्रायः। धर्मं ज्ञात्वानुष्ठीकृतम्। (~~स्वितम्~~) ज्ञानग्रहणात् अभिनिवेशः तदनुष्ठानम्। तथा च वसिष्ठः —
यो धर्ममनुतिष्ठति स धार्मिक इत्यादि।
॥ इति धर्मो धर्मः॥

वेदो धर्ममूलमित्यारभ्य एतत्पर्यन्तं धर्मसंज्ञा गौतमस्येति वाक्यशेषः ॥ ॐ ॥

१०२ इति मस्करीये गौतमभाष्ये

अष्टाविंशोऽध्यायः ॥

ॐ श्रीगुरुभ्यो नमः ॥

गौतमाय नमः ॥

पुनर्मस्करिणे नमः ॥

ॐ श्रीरामाय नमः। श्रीवेदव्यासाय नमः।

श्रीरामवल्लभाय नमः। श्रीरुद्राय नमः।

॥ ॐ ॥ शुभमस्तु ॥

Copied by. V. Rajagopala Sarma
31-3.55.

Compared by - 1. T. A. K. Venkatachariar
2- 4- 55

" 2. V. Rajagopala Sarma
2.4.55.

450

Transcribed from a Ms. preserved in the Govt Oriental Manuscripts Library. Chepauk. Madras. under D.No. 15267.